THE NALODAYA

A SANSKRIT HISTORICAL POEM

THE

NALODAYA

A

SANSKRIT HISTORICAL POEM

IN

FOUR BOOKS.

॥ नलोदयः ॥

चतुःसर्गसम्वलितं

सुबोधिनीटीकासहितं श्रीकालिदासकृतं

सत्काव्यं

कलिकाताराजधान्यां मिशम्‌यन्त्रालये मुद्रितमभूत्।

१८४२

15
Judawe' Pandit's

॥ परमेश्वरो जयति ॥

॥ अथ नलोदयः ॥

हृदय सदायादवतः पापाटव्या दुरासदायादवतः।
अरिसमुदायादवतस्त्रिजगन्मागाःस्मरेणदायादवतः॥

सन्धिवर्ज्जितः

हृदय सदा यादवतः पापाटव्याः दुरासदायाः दवतः।
अरिसमुदायात् अवतः त्रिजगत् मा गाः स्मरेण दायादवतः॥ १॥

सटीकः

हृदयेति। हे हृदय अन्तःकरण यादवतः यादवात् पञ्चम्यास्तसिल्। त्वं मागाः मा गच्छेः। कथम्भूतात्? पापाटव्याः पापारण्याद् दुरासदायाः दुःखेन सोढुं शक्यायाः। दवतः दवाग्नेः। अरि-समुदायाच् शत्रुसमूहात् त्रिजगत् त्रैलोक्यं सदा अवतः पालयतो रक्षतो वा। यद्वा। कीदृशाद् यादवतः? दुःसोढा या पापाटवी तस्या दवाग्नेरिति रूपकं। पुनः कीदृशात्? अरि-समूहात् त्रैलोक्यमवत इति। पुनः कीदृशात्? स्मरेण कामेन दायादवतः पुत्रवतः। दायादौ सुतबान्धवावित्यमरः॥ १॥

योजनिनागोपीतश्चचारयोवल्लवांगनागोपीतः।
भूर्येनागोपीतः कंसाद्यो द्वेषमेव नागोपीतः॥

यः अजनि ना गोपीतः चचार यः वल्लवांगना[illegible]तः।
भूः येन अगोऽपि दूतः कंसात् यः द्वेषं एव नागः [illegible] तः॥ २॥

य इति। यः ना पुरुषः गोपीतः यशोदातः। [illegible] देवकीतो वाऽजनि जातः। यः वल्लवा आभीरास्तेषाम् अङ्गनास्तासां गोभिर्नेत्रैः पीतः सन् सादरम् अवलोकितः सन् चचार। दिङ्नेत्रघृणिभूजलेष्वच्युदृष्ट्या स्त्रियां पुंसि गौरित्यमरः। येन भूरगोऽपि अरक्षि। यः कंसाद् द्वेषमेव इतः प्राप्तः। येन [illegible] कालियः कुवलयापीडोऽपि वा इतः दूरीकृतः। यद्वा। इतोऽस्मात् कंसाद् द्वेषमेव केवलं न अपितु आगोऽपि अपराधमपि इतः प्राप्तः॥ २॥

यदरिषु सन्नामानस्थितयो यन्नुन्नमुदलसन्नामानः।
यत्र ससन्नामानःस्युर्भवभाजश्च पठितसन्नामानः॥

यदरिषु सन्नाः मानस्थितयः यत् नुन्नं उदलसत् नाम अनः।
यत्र ससन्ना मा न स्युः भवभाजः च पठितसन्नामानः॥ ३॥

यदरीति। यस्यारिषु मानस्थितयोऽभिमानाद्यस्थानमित्यर्थः। यद्वा मानं स्वत्तसमुन्नतिः स्थितिर्मर्यादा मानस्य स्थितयश्चेति द्वंद्वः। सन्ना अव-

सन्ना जाता इत्यर्थः । नाम संभावनायां अनः शकटं येन नुन्नं प्रेरितं सत् उद्लसत् चचालेत्यर्थः। यत्र हरौ ससन्नामाः नमबं नामः संश्रसै नाम-स्येति सन्नामः सन्नामेन सह वर्त्तमानाः ससन्नामाः कृतसम्यङ्नतयः सांसा-रिका न स्युः कीदृशाः ? पठितसन्नामानः। संति च तानि नामानि च पठितानि ... गृहीतानि सन्नामानि गोविंदादीनि यैस्ते पठित-सन्नामानः । यत्र । यस्मिन् मा लक्ष्मीः ससन्ना सनिकटा । समीपे निकटास-न्नसंनिकृष्टसनीडवदित्यमरः। तेनादूरदेशान्तरवर्त्तित्वविशिष्टा समीपस्थि-तेति यावत्। आसन्न इति । आङ् उपसर्गसहितः अयं निरुपसर्गःच पुनः पठितसन्नामानो भवभाजो न स्युः॥ ३॥

समनिन्दानवनाशञ्जनतालिकुलंयथैवदानवनाशम्।
द्विरदाद्दानवनाशंजगच्चलभतेयतःसदानवनाशम्॥

समनिन्दानवना शं जनता अलिकुलं यथा एव दानवनाशं ।
द्विरदात् दानवनाशं जगत् च लभते यतः सदा अनवनाशं॥ ४॥

समेति। जनता जनसमूहः यतो राज्ञः शं कल्याणं लभते प्राप्नोति च पुनः जगत् दानवानां दैत्यानां नाशं मृत्युं यतो लभते। कीदृशी जनता ? समनिन्दानवना। णुस्तुतौ धातोर्ल्युटि नवनं स्तुतिः। निन्दा च नवनं च निन्दानवने समे निन्दानवने यस्याः सा? जगत् कीदृशं? सदा अनवनाशं अवनं रक्षणं तस्य आशा अवनाशा न विद्यते अवनाशा यस्य तत्

अनवनाशं यथा अलिकुलं कर्त्तृ हस्तिसकाशाद् दानवनाशं प्राप्नोति दानवनं दानजलं तस्य आशनं आशस्तं प्रातराशं सोऽयमाशश्च तद्वत् ॥ ४ ॥ कुलकं ।

अस्ति सराजानीते रामाख्यो यो गतीःपराजानीते ।
यस्य रराजानीते रत्नानि जनः कुले धराजानीते ॥

अस्ति सः राजा नीतेः रामाख्यः यः गतीः पराः जानीते ।
यस्य रराज अनीतेः रत्नानि जनः कुले धराजानि इते ॥ ५ ॥

अस्तीति । स रामाख्यो राजास्तीत्यन्वयः । रामोभिरामः सुन्दर इति यावत् आख्या नाम यस्य सः । यः नीते नयस्य परा उत्कृष्टा गतीः जानीते [illegible] । अनीतेः ईतिरहिततया हेतौ पंचमी । यस्य कुले संति राज्यं कुर्वति सतीति शेषः । जनः रराज सुखीबभूव । यद्वा । कीदृशस्य यस्य? अनीतेः ईतिरहितस्य । ईतयोतिवृष्ट्यादयः । कीदृशे कुले? धराजानि भूम्युत्पन्नानि रत्नानि इते प्राप्ते ॥ ५ ॥

यः सेनानावारिप्रकरनदीः शरमयं धुनानावारि ।
अतरन्नानावारि व्यसनै र्यद्भुवि वनञ्च नानावारि ॥

यः सेनानावा अरिप्रकरनदीः शरमयं धुनानाः वारि ।
अतरत् ना न अवारि व्यसनैः यद्भुवि वनं च नानावारि ॥ ६ ॥

य इति । यः सेनानावा सैन्यनौकया अरिप्रकरनदीः शत्रुसमूहनदीः

अतरत् तीर्णवान्। कीदृशी र्नदी: ? शरमयं वाणमयं वारि धुनाना: कम्पयमाना: । यद्भुवि ना पुरुष: व्यर्थं न अवारि इतिकाकु:। अपितु वारित एव च पुन र्यस्य वनं नानावारि नानागजवन्धनयुक्तम्। वारीतु गजवन्धनीत्यमर: ॥ ६ ॥

अपि यो दायादाय क्षयप्रदोंहसि सतां यदायादाय: ।
करमादायादाय श्रियोब्धिरधिराजमसिगदायादाय: ॥

अपि य: दायादाय क्षयप्रद: अंहसि सतां यदाया: दाय: ।
करं आदायोद्दाय श्रिय: अब्धि: अधिराजं असिगदायादा: य: ॥ ७ ॥

अपीति। य: अंहसि पापे जाते दायादाय पुत्रायापि क्षयप्रद: नाशकर्त्ता यदाया: यस्य आयाधनागमनानि सतां दाय: न्यायप्राप्तो भाग:। पुनश्च य: अधिराजं राजानमधिकृत्य करं आदाय आदाय श्रिय: अब्धि: कीदृश: ? असिगदायादा: असिश्च खड्ग: गदा च असिगदे यादांसि जलजन्तवो यत्र स तथा ॥ ७ ॥

अविदूराजादित्या कृताल्पभेदैवभू: सराजादित्या ।
येन संराजादित्या त्रिदिवात्संयुक्तशत्रुराजादित्या ॥

अविदूराजा अदित्या कृताल्पभेदा एव भू: सराजादित्या ।
येन सराजादित्यात् त्रिदिवात् संयुक्तशत्रुराजा दित्या ॥ ८ ॥

अवीति । येन भूस्त्रिदिवात् स्वर्गादल्पभेदैव कृता । कीदृशी ...

अविदूराजा अविदूरे निकटे अजौ विष्णुहरौ यस्याः सा तया। कीदृशात् त्रिदिवात्? अदित्या देवमात्रा विशिष्टानि विशेषणे तृतीया। पुनर्भूः कीदृशी? सराजादित्या दितायच्छेदाय स्थिताः दित्याः न दित्याः अदित्याः साधव इति यावत्। राजसु क्षत्रियेषु अदित्याः राजादित्याः तेन सह वर्त्तमाना सा तथा स क्षत्रियश्रेष्ठेत्यर्थः। अथवा राजादित्यनामा नलभ्राता तेन सह वर्त्तमाना। यद्वा। राज्ञां मध्ये आदित्यो राजादित्यस्तेन युक्तेत्यर्थः। पुनः कीदृशात् त्रिदिवात्? सराजदित्यात्। राजा चन्द्रः राजा च आदित्यश्च राजादित्यौ ताभ्यां सह वर्त्तमानात्। येन कीदृशेनादित्या संयुक्तशत्रुराजादिति दानमवखण्डनमिति यावत्। दो अवखण्डने। तया सयुक्तः शत्रुराट् यस्य स तथा तेन। सखण्डनशत्रुणेत्यर्थः॥ ८॥

खलसेनानावेद्यः स्वांहोब्धौ भुविच यस्य नानावेद्यः।
स्निग्धजनानावेद्य प्रयतेस्य सुकाव्यविरचनानावेद्य॥

खलसेनाः न अवेत् यः स्वांहोब्धौ भुवि च यस्य नानावेद्यः।
स्निग्धजनान् आवेद्य प्रयते अस्य सुकाव्यविरचनानावे अद्य॥ ९॥

खलेति। स्निग्धजनान् आवेद्य निवेद्य स्वांहोब्धौ स्वकीयं यदंहः पापं तदेव अब्धिस्तत्र सुष्ठु यत् काव्यं तस्य रचना सैव नौ नौका तस्यै यस्य रामाख्यस्य अद्य इदानीं प्रयते यत्नं कुर्वे। यस्य कस्य यः खलसेनां दुष्टसैन्यं न अवेत् न रक्षेत्। पुन र्यस्य भुवि संसारे नानावेद्यः नानाप्रकारिका यज्ञभूमि मण्डपप्रदेशाः सन्तिः॥ ९॥

अथ निजराज्यन्तेन प्राशासि नलेन शत्रुराज्यन्तेन।
येनाराज्यन्तेन श्रियादिशो यस्य विहतिराज्यन्तेन॥

अथ निजराज्यं तेन प्राशासि नलेन शत्रुराज्यन्ते न।
येन अराज्यन्त इनश्रिया दिशः यस्य विहतिः आज्यन्ते न॥ १०॥

अथेति। तेन नलेन निजराज्यं प्राशासि शासितम्। कीदृशेन? शत्रुराज्यन्तेन शत्रूणां राज्याः शत्रुश्रेण्या अन्तेन मृत्युना। येन दिशः अराज्यन्त अशोभन्त। कीदृशेन इनश्रिया इनवत् सूर्यवत् श्रीः शोभा यस्य स तथा तेन। यस्य च आज्यन्ते आजि युद्धं तस्य अंते मध्ये विहति र्न सर्वत्र जय एवेत्यर्थः॥ १०॥

मूर्त्तिं मारसमानां योदधदायुः सहस्रमारसमानाम्।
रुद्रकुमारसमानामजयद्द्विषतांपंक्तिमारसमानाम्॥

मूर्त्तिं मारसमानाम् यः अदधत् आयुः सहस्रं आर समानाम्।
रुद्रकुमारसमानाम् अजयत् द्विषतां पंक्तिं आरसमानाम्॥ ११॥

मूर्त्तिमिति। यः समानां वर्षाणां सहस्रमायुः आर प्राप। ऋप्रापणे धातोः परोक्षायां आर। किं कुर्वन्? मारसमानां कामतुल्यां मूर्त्तिमाकारं दधत् धारयन्। यश्च द्विषतां शत्रूणां पक्तिं श्रेणीमजयत् जितवान्। कीदृशीं? रुद्रकुमारसमानां रुद्रकुमारः कार्त्तिकेयः तद्वत् समानां मानेन सह वर्त्तमानां पुनः कीदृशीं? आरसमानां शब्दायमानां॥ ११॥

साश्वनियामानयतः श्रेष्ठाविद्यास्तदाश्रयामानयतः।
अधिकायामानयतः शत्रावपियस्यधीर्दयामानयतः॥

साश्वनियामाः न यतः श्रेष्ठाः विद्याः तदाश्रयाः मानयतः।
अधिकाया मा नयतः शत्रौ अपि यस्य धीः दयां आनयतः॥ १२॥

साश्वेति। तदाश्रयास्तस्य नलस्याश्रया ऋतुपर्णप्रभृतयः यतो नलात् श्रेष्ठा न भवन्तीत्यध्याहार्य्यम्। कीदृशात्? नियमन्नियामः अश्वनियामेन सह वर्त्तमानाः विद्याः मानयतः जानतः। नियामो नियमो यामद्रत्यमरः। यस्य मा लक्ष्मीः नयतः नीतितः अधिकाय अधिक आयो यस्याः सा कीदृशस्य? शत्रावपि दयां आनयतः कुर्वतो धीः जिघांसारहितेति शेषः॥१२॥

अहितानामायस्य त्राता यःशरणगामिनामायस्य।
गतनानामायस्य श्रुतः पिता वीरसेननामायस्य॥

अहितानां आयस्य त्राता यः शरणगामिनां आयस्य।
गतनानामायस्य श्रुतः पिता वीरसेननामा यस्य॥ १३॥

अहितेति। यो नलः शरणगामिनां शरणागतानां आयस्योद्यमं कृत्वा त्राता रक्षिता। पुनः आयस्य धनागमस्य। यस्य च वीरसेननाम्ना पिता श्रुतो विख्यातः। कीदृशस्य? गता नानामायाः यस्मात्तस्य। आयस्येति यसुप्रयत्ने धातोः क्त्वायां ल्यपि॥ १३॥

भुव्यतनोदन्तेन द्विषतां सयशांसि शोभनोदन्तेन।
नीतानोदन्तेन क्षितिमभजन्नहितदन्तिनोदन्तेन ॥

भुवि अतनोत् अन्तेन द्विषतां सः यशांसि शोभनोदन्तेन।
नीताः नोदं तेन क्षितिं अभजन् अहितदन्तिनः दन्तेन ॥ १४ ॥

भुवीति। स नलः भुवि पृथिव्यां द्विषतां शत्रूणामन्तेन नाशेन यशांसि अतनोत् विस्तारयामास। पुनः नोदनं नोदः प्रेरणमिति यावत्। येन नोदं नीता अहितदन्तिनः शत्रुहस्तिनो दन्तेन क्षितिमभजन् मृता इत्यर्थः। कीदृशेन? शोभनोदन्तेन शोभन उदंतो वार्त्ता यस्यासौ स तेन। वार्त्ता प्रवृत्ति र्वृत्तान्तउदन्तः स्यादित्यमरः। नुद प्रेरण इति धातोर्नोदः॥१४॥

सचिवगिरागोपायन्नलःसपृथिवीं निरस्तरागोपायम्।
शत्रोरागोपायं नीत्वा नेमु र्महत्तरागोपायम् ॥

सचिवगिरा अगोपायत् नलः सः पृथिवीं निरस्तरागोपायं।
शत्रोः आगोपायं नीत्वा नेमुः महत्तराः गोपाः यं ॥ १५ ॥

सचिवेति। स नलः निरस्तरागोपायं यथा स्यात् तथा सचिवगिरा मंत्रिवाक्येन पृथिवीमगोपायत् अरक्षत्। रागस्योपायो रागोपायः व्यसनमिति यावत् निरस्तो रागोपायो यस्यां क्रियायां तत् तादृशं। महत्तरा गोपा आगोपायं नीत्वा यं नेमु र्नमस्चक्रुरित्यर्थः। गां पृथ्वीं पान्ति ते गोपाः

राजानः। आगोपायं आगसोऽपराधस्यापायो नाशस्तं। गोपाः कीदृशाः? अचो मेध्ये महत्तराः श्रेष्ठाः। अगोपायदिति गुपूरक्षणे धातोः। आगोपराधोमन्तुस्त्वेत्यमरः। दिङ्नेत्रघृणिभूजलइत्याद्यमरः। नेमुरिति णमुप्रणतौ धातोर्लिटि बहुवचनम् ॥ १५ ॥

योऽदम्भीमान्यायादधिकोथ रिपुर्यमेत्य भीमान्यायात्।
वैदर्भीमान्यायास्त्रिजगति कन्या बभूव भीमान्यायात् ॥

यः अदम्भी मानी आयात् अधिकः अथ रिपुः यं एत्य भीमान् यायात्।
वैदर्भी मान्या या त्रिजगति कन्या बभूव भीमान्यायात् ॥ १६ ॥

योऽदम्भीति। भीमान्यायात् भीमभूपालाद् वैदर्भी कन्या बभूव जाता। अननं आनः आनोस्यास्तीत्यानी आनी जीवितवान् आयो यस्य निरन्तरं धनागमवानित्यर्थः। राजेति यावत्। भीमश्चासावान्यायश्चेति भीमान्यायस्तस्मात्। वैदर्भी कीदृशी ? या त्रिजगति मान्या पूज्या। सको भीमः। योऽदम्भी दम्भरहितः। पुनः कीदृशः? आयात् धनवृद्धे हेतो मानी अभिमानी। अथ अधिको रिपुः शत्रु यमेत्य यन्निकटे आगत्य भीमान् भीतः सन् यायात् प्रपलाय्य गच्छेत्। भीति भीः साध्वसम्भयमित्यमरः। भीमान्मतुप्। यायादिति या प्रापणे धातोः। यत्तु भीमान् न्यायादित्यत्र भीमादिति पञ्चमीं कल्पयित्वा न्यायात्। न्यायेन कन्या बभूवेति व्याचक्षते तत्र तस्मै सति नकारद्वित्वं तेन यमकलक्षानिरिति तच्चिन्त्यम् ॥ १६ ॥

मह्तितमारम्भाभि र्दमयन्ती सदृगुमारमारम्भाभिः।
दधती मारम्भाभि र्ववृधे सोरुद्वये समारम्भाभिः॥

मह्तितमारम्भाभिः दमयन्ती सदृक् उमारमारम्भाभिः।
दधती मारं भाभिः ववृधे सा उरुद्वये समा रम्भाभिः॥ १७॥

मह्तितेति। दमयन्ती ववृधे वृद्धिं प्राप्ता युवति र्बभूवेत्यर्थः। कीदृशी? उमारमारम्भाभिः सदृक् सदृशी। उमा पार्वती रमा लक्ष्मीः रम्भा ऽप्सरोभेदस्ताभि रुमारमारम्भाभिः। कीदृशीभिः? मह्तितमारम्भाभिः। प्रकृष्टोमह्तितो मह्तिततमः पूजिततम इति यावत्। मह्तितम आरम्भो यासां तास्तादृश्यस्ताभिः। पुनः कीदृशी? भाभिः कान्तिभि र्मारं कन्दर्पं दधती धारयन्ती। पुनः कीदृशी? उरुद्वये रम्भाभिः कदलीभिः समा॥ १७॥

सारत्नंनारीणां नलःश्रियामजनि निलयनंनारीणाम्।
यस्यानन्नारीणां मरुभुवमापद्घटावनंनारीणाम्॥

सा रत्नं नारीणां नलः श्रियां अजनि निलयनं नारीणां।
यस्य अनन्ना अरीणां मरुभुवं आपत् घटा अवनं न आरीणां॥ १८॥

सेति। सा दमयन्ती नारीणां मध्ये रत्नं श्रेष्ठमजनि जाता। नलश्च नारीणां मनुष्यसम्बन्धिनीनां श्रियां कान्तीनां निलयनं गृहमजनि। नरस्येयं नारी। यस्य चारीणां घटा मरुभुवमापत् प्राप अवनं नापदिति पूर्वेणैवान्वयः। मरुभुवं कथम्भूतां आरीणां शून्यां धिक्कृतां वा। अरीणां

घटा कीदृशी ? अनन्ता न विद्यते अन्तं यस्याः सा अनन्ता अवरीणो धिक्कृतस्त्येमरः ॥ १८ ॥

चकमे साराजन्यश्रेष्ठन्तन्तां स तेजसाराजन्यः।
आत्तविसाराजन्यश्रियोऽधितययाजिताःससाराजन्यः॥

चकमे सा राजन्यश्रेष्ठं तं तां सः तेजसा राजन् यः ।
आत्तविसाराः जन्यश्रियः अधित यया जिताः ससाराः जन्यः ॥१९॥

चकमे इति । सा दमयन्ती तं राजन्यश्रेष्ठं क्षत्रियोत्तमं चकमे कामितवती । सच नलस्तां चकमे इति पूर्वेणैवान्वयः। तेजसा राजन् दीप्तिं कुर्वन्। येन जन्यश्रियो युद्धलक्ष्म्यः अधित प्राप्ताः। कीदृशी ? आत्तविसाराः विसरणं विसारः विस्तार इति यावत् आत्तो गृहीतो विस्तारो याभिस्ताः। यया दमयन्त्या जन्या वध्वो जिताः । कीदृश्यः ? ससाराः सौन्दर्यसहिताः सारः स्थिरांशे सौन्दर्ये इति धरणिः । युद्धमायोधनं जन्यम्। समाः स्नुषाजनीवध्व इति चामरः ॥ १९ ॥

नार्त्ति नौद्यानेन प्रभाविहीनेन शोभनोद्यानेन।
स्मरजा नोद्यानेन स्फुटमितिगतिमिहनलोतनोद्यानेन॥

न आर्त्तिः नोद्या न इनप्रभाविहीनेन शोभनोद्यानेन ।
स्मरजा नः अद्य अनेन स्फुटं इति गतिं इह नलः अतनोत् यानेन॥२०॥

नार्त्तीति। नलः इति हेतोरिह वने स्फुटं यथा स्यादेवं यानेनाश्वेन

गति गमनं अतनोदकरोत्। इति किं ? अनेन शोभनोद्यानने सुन्दरक्रीडावनेनाद्य इदानीं नोऽस्माकं स्मरजा कामोत्पन्ना आर्त्तिः पीडा ननोद्येति न अपि तु नोद्यैव नाशनीयेत्यर्थः। कीदृशेन ? इनप्रभाविहीनेन इनः सूर्यस्तस्य या प्रभा किरणस्तेन विहीनेन रहितेन ॥ २० ॥

सोऽहितहन्तापततः कांश्चिदपश्यद्धिताय हन्तापततः।
सस्नेहन्तापततस्तान्यदमी तोषमावहन्तापततः॥

सः अहितहन्ता पततः कांश्चित् अपश्यत् हिताय हन्त आपततः।
सस्नेहं तापततः तान् यत् अमी तोषं आवहन्त आप ततः॥ २१ ॥

सोऽहितेति। अहितानां शत्रूणां हन्ता नाशकः स नलः हन्त हर्षे कांश्चित् पततः पक्षिणोऽपश्यत् अद्राक्षीत्। कीदृशान् पततः ? हिताय सुखदानाय आपततः आगच्छतः। कीदृशः सः ? तापततः तापेन ततो व्याप्तः कामज्वरपीडित इत्यर्थः। यद् यस्माद्धेतोरमी पतत्रिणो हंसास्तोषं सन्तोषमावहन्त अकुर्वत ततोहेतोः। सस्नेहं स्नेहपूर्वकं यथा स्यात् तथा सोऽयं नलस्तान् हंसानाप प्राप जग्राहेति यावत् ॥ २१ ॥

तन्तरसारसमानः सविहंगगणोऽब्रवीत्ससारसमानः।
गतहिंसारसमानस्तुद लभ्योनिष्क्रयः स्वसारसमानः॥

तं तरसा रसमानः सः विहंगगणः अब्रवीत् ससारसमानः।
गतहिंसारस मा नः तुद लभ्यः निष्क्रयः स्वसारसमानः॥ २२ ॥

तन्तरसेति। रसमानः शब्दायमानः। ससारसमानः सारसैः पक्षि-

विशेषैः कृतो यो मानोऽभिमानस्तेन सहितः सविहंगगणो हंससमूह स्तरसा वेगेन तं नलमब्रवीदवदत्। तदेवाह हे गर्तहिंसारस गतः हिंसाया रसः प्रीति र्यस्य सः तत्संबुद्धिः। नोस्मान् मा तुद मा पीडय। त्वया स्वस्य सारः सामर्थ्यादीरूपादि र्वा तत्तुल्यः निष्क्रयो लभ्यः प्राप्यः अस्मत्त इति शेषः॥ २२॥

त्वंझषकेत्वङ्गत्वादधिको भैम्यास्तुमोन्तिकेत्वङ्गत्वा।
सातेङ्केत्वङ्गत्वासक्ता लल तत्सकाशकेत्वङ्गत्वा॥

त्वं झषकेत्वङ्गत्वात् अधिकः भैम्याः स्तुमः अन्तिके तु अङ्ग त्वा।
सा ते अङ्के तु अङ्गतु आसक्ता लल तत्सकाशके त्वं गत्वा॥ २३॥

त्वमिति। हे अंग नल तु पुनस्त्वं झषकेत्वंगत्वात् झषकेतोः कामस्यांगं तस्य भावस्तस्मादधिको नलः कामशरीरतोप्यधिकः सुन्दर इति यावत्। इति भैम्या अन्तिके निकटे। त्वा त्वां स्तुमः स्तोष्यामः। सा भैमी तेऽङ्के क्रोडे तु पुनः अंगतु राजतु अगिगत्यर्थः। कथंभूता ? आसक्ता तत् सकाशके दमयन्तीनिकटे। स्वार्थे कः। गत्वा लल क्रीडां कुरु॥ २३॥

इतिहंसारामाया निकटंयामयकृतेव सारामाया।
जग्मुःसारामाया जगदुस्त्वालीभिरभिससारामाया॥

इति हंसा रामायाः निकटं यामयकृता इव सारामाया।
जग्मुः सारामायाः जगदुः च आलीभिः अभिससार अमा या॥२४॥

इतीति। हंसाः सारामाया आरामेन सह वर्त्तमाना सारामा तस्याः

मारामायाः रमाया भैम्या निकटं समीपं जग्मु र्ययुः । पुनः इति वक्ष्यमाणमूचुः । यामयेन दैत्यशिल्पिना कृता मारा उतकृष्टा मायेव। या आलीभिः सखीभिः अमा सह अभिससार गतिमकरोत्। अमा सह समीपे चेत्यमरः ॥ २४ ॥

श्रीसंकाशास्यस्य त्वम्भैमिनलस्य शशिनिकाशास्यस्य ।
अरिलोकाशास्यस्य यदि भार्यास्याःकुमारिकाशास्यस्य ॥

श्रीसंकाशा असि अस्य त्वं भैमि नलस्य शशिनिकाशास्यस्य ।
अरिलोकाशास्यस्य यदि भार्य्या स्याः कुमारिकाशास्यस्य ॥ २५ ॥

श्रीति । हे भैमि त्वं यद्यस्य नलस्य भार्या स्याः भवेस्तर्हि श्रीसंकाशासि लक्ष्मीतुल्यासि श्रीवत्संकाशते शोभत इति सा। कीदृशस्य नलस्य? शशिना निकाशं तुल्यमास्यं वदनं यस्यासौ तस्य। एवमरिलोकानां या आशा वांछा तामस्यति नाशयतीति सः तस्य एवं कुमारिकाशास्यस्य कुमारिकाभिरपरिणीताभिः स्त्रीभिराशास्यस्य वांछितस्य ॥ २५ ॥

इतिहांसेनोदितया गणेन भैम्या मुदारसेनोदितया ।
नबभासेनोदितया स्मरेण सपुनर्नलौकसेनोदितया ॥

इति हांसेन उदितया गणेन भैम्या मुदारसे नोदितया ।
न बभासे न उदितया स्मरेण सः पुनः नलौकसे अनोदि तया ॥२६ ॥

इतीति । इत्युक्तक्रमेण हांसेन गणेन हंससार्थेन उदितयोक्तया मुदा

आनन्देन हेतुना रसे शृङ्गारे नोदितया प्रेरितया स्मरेण कामेन उदितया उदयम् प्राप्तया युवत्येति यावत्। एतादृश्या भैम्या न बभासे इति न अपि तु बभासे पुनस्तया भैम्या सहंसगणो नलौकसे नलगृहाय अनोदि प्रेषितः ॥ २६ ॥

ताबहुधावायस्य श्रेण्यःपुनरस्य सन्निधावायस्य ।
ताञ्चनिधावायस्य व्यनुवंस्तुलनाय न विबुधावायस्य॥

ताः बहुधा वायस्य श्रेण्यः पुनः अस्य सन्निधौ आयस्य ।
तां च निधौ आयस्य व्यनुवन् तुलनाय न विबुधा वा यस्य ॥ २७ ॥

ता इति । पुनस्ता वायस्यः हंसश्रेण्यः वयसाम्पक्षिणामिमाः वायस्यो हंसपंक्तयो ऽस्य नलस्य संनिधौ समीपे आयस्यागत्य तां भैमीं बहुधा नानाप्रकारेण व्यनुवन् अस्तुवन् तुष्टुवुरिति यावत्। किम्भूते? संनिधौ आयस्य धनागमस्य निधौ आकरे आश्रये वा। अस्य कस्य? यस्य तुलनाय विबुधा अपि देवा अपि न भवन्ति वा शब्दो ऽप्यर्थकः ॥ २७ ॥

इति सविनामानितया जज्ञेभैम्यानलोपि नामानितया।
स्वास्थ्यंनामानितयाशिश्येचविचिन्त्यतस्यनामानितया॥

इति सः विना मानितया जज्ञे भैम्या नलः अपि नाम अनितया।
स्वास्थ्यं नामानि तया शिश्ये च विचिन्त्य तस्य न अमानितया॥ २८॥

इतीति। इत्यनेन प्रकारेण विना हंसेन मानितया पूजितया कृतः

स्तुत्येति यावत्। नाम सम्भावनायां। स्वास्थ्यं सुखमनितया ऽप्राप्तया तया भैम्या। धीरोपि नलः जह्रे हृतः वशीकृत इति यावत्। पुनस्तस्य नलस्य नामानि विचिन्त्य नलनैषधेत्यादि चिन्तयित्वा शिश्ये सुप्तं। कीदृक् नलः ? अमानितया न उपलक्षितः मानिनो भावो मानिता तस्या अभावो ऽमानिता तया न उपलक्षितः अभिमानयुक्त इति भावः ॥ २८ ॥

अथ ससमुद्रागस्य क्ष्मान्तस्यालंकृतेः समुद्रागस्य।
यौवनमुद्रागस्य स्वसुतारत्नस्य सादमुद्रागस्य॥

अथ ससमुद्रागस्य क्षान्तस्य अलंकृतेः समुद्रागस्य।
यौवनमुद्रागस्य स्वसुतारत्नस्य सादं उद्रागस्य ॥ २९ ॥

अथेति। अथानन्तरं समुद्रस्य अगस्य समुद्रागौ ताभ्यां सहितस्य। क्ष्मांतस्य पृथ्वीपर्यन्तस्यालंकृतेरलंकारभूतस्य। समुद्रागस्य मुदमानन्दं राति ददातीति मुद्रः मुद्रश्चासावगश्च सः तेन सह वर्त्तते इति तादृशस्य। यद्वा राजा कीदृशः ? समुत् सहर्षं द्राक् झटिति अस्य सुतारत्नस्येत्यर्थः। यद्वा मुच्चासौ रागोऽनुरागः सच मुद्रागो। ताभ्यां सहितस्य। एवं यौवनमुद्रा स्तनोद्रेकादिचिह्नं तद्गस्य प्राप्तस्य। एवं उद्रागस्य उत् उद्गतो रागो ऽनंगरागः पीडा वा यस्य तस्य। रागोऽस्त्रियां[illegible]दिषु। क्लेशादावनुरागे च गान्धारादाविति मेदिनी। स्वसुतारत्नस्य सादं अवसादं कामजदुःखं ॥ २९ ॥

आनन्देन हेतुना रसे शृङ्गारे नोदितया प्रेरितया स्मरेण कामेन उदितया उदयम् प्राप्तया युवत्येति यावत्। एतादृश्या भैम्या न बभासे इति न अपि तु बभासे पुनस्तया भैम्या सहंसगणो नलौकसे नलगृहाय अनोदि प्रेषितः ॥ २६ ॥

तावङ्गधावायस्य श्रेण्यःपुनरस्य सन्निधावायस्य ।
ताञ्चनिधावायस्य व्यनुवंस्तुलनाय न विबुधावायस्य ॥

ताः बङ्गधा वायस्य श्रेण्यः पुनः अस्य सन्निधौ आयस्य ।
तां च निधौ आयस्य व्यनुवन् तुलनाय न विबुधा वा यस्य ॥ २७ ॥

ता इति । पुनस्ता वायस्यः हंसश्रेण्यः वयमाम्पक्षिणामिमाः वायस्यो हंसपंक्तयो ऽस्य नलस्य संनिधौ समीपे आयस्यागत्य तां भैमीं बङ्गधा नानाप्रकारेण व्यनुवन् अस्तुवन् तुष्टुवुरिति यावत्। किम्भूते? संनिधौ आयस्य धनागमस्य निधौ आकरे आश्रये वा। अस्य कस्य? यस्य तुलनाय विबुधा अपि देवा अपि न भवन्ति वा शब्दो ऽप्यर्थकः ॥ २७ ॥

इति सविनामानितया जह्रेभैम्यानलोपि नामानितया।
स्वास्थ्यंनामानितयाशिश्येचविचिन्त्यतस्यनामानितया॥

इति सः विना मानितया जह्रे भैम्या नलः अपि नाम अनितया।
स्वास्थ्यं नामानि तया शिश्ये च विचिन्त्य तस्य न अमानितया॥ २८॥

इतीति। इत्यनेन प्रकारेण विना हंसेन मानितया पूजितया हृतः

स्तुत्येति यावत्। नाम सम्भावनायां। स्वास्थ्यं सुखमनितया ऽप्राप्तया तया भैम्या। धीरोऽपि नलः जह्रे हृतः वशीकृत इति यावत्। पुनस्तस्य नलस्य नामानि विचिन्त्य नलनैषधेत्यादि चिन्तयित्वा शिश्ये सुप्तं। कीदृक् नलः? अमानितया न उपलक्षितः मानिनो भावो मानिता तस्या अभावो ऽमानिता तया न उपलक्षितः अभिमानयुक्त इति भावः ॥ २८ ॥

अथ ससमुद्रागस्य क्ष्मान्तस्यालंकृतेः समुद्रागस्य।
यौवनमुद्रागस्य स्वसुतारत्नस्य सादमुद्रागस्य॥

अथ ससमुद्रागस्य क्षान्तस्य अलंकृतेः समुद्रागस्य।
यौवनमुद्रागस्य स्वसुतारत्नस्य सादं उद्रागस्य ॥ २९ ॥

अथेति। अथानन्तरं समुद्रस्य अगस्य समुद्रागौ ताभ्यां सहितस्य। क्ष्मांतस्य पृथ्वीपर्यन्तस्यालंकृतेरलंकारभूतस्य। समुद्रागस्य मुदमानन्दं राति ददातीति मुद्रः मुद्रश्चासावगश्च सः तेन सह वर्त्तते इति तादृशस्य। यद्वा राजा कीदृशः? समुत् सहर्षः द्राक् झटिति अस्य सुतारत्नस्येत्यर्थः। यद्वा मुच्चासौ रागोऽनुरागः सच मुद्रागौ ताभ्यां सहितस्य। एवं यौवनमुद्रा स्तनोद्भेकादिचिह्नं तद्गस्य प्राप्तस्य। एवं उद्रागस्य उत् उद्गतो रागो ऽङ्गरागः पीडा वा यस्य तस्य। रागोऽमत्सरे लोहितादिषु। क्लेशादावनुरागे च गान्धारादाविति मेदिनी। स्वसुतारत्नस्य सादं अवसादं कामजदुःखं ॥ २९ ॥

दृष्ट्वा राजातनुत स्वयंवरं विधिवदिन्दिराजातनुतः।
यस्यजराजातनुतःपृथगव्यथासौजनाद्रराजातनुतः॥

दृष्ट्वा राजा आतनुत स्वयंवरं विधिवत् इन्दिराजातनुतः।
यस्य जराजा तनुतः पृथक् व्यथा असौ जनात् रराज अतनुतः॥ २०॥

दृष्ट्वेति द्वितीयेनान्वयः। असौ राजा भीमः स्वयंवरं विधिवत् आतनुताकरोत्। यो राजा अतनुतः महत्तो जनात् मनुष्यात् रराज शुशुभे। यस्य तनुतो देहात् जराजा जरोत्पन्ना व्यथा पृथक् भिन्ना। बहुमध्ये सुन्दरो युवा चेति भावः। कीदृशो राजा ? इन्दिराजातनुतः इन्दिरा लक्ष्मी स्तस्याः सकाशाज्जातो यः काम स्तेन नुतः स्तुतः कामाधिकसुन्दर इति यावत्॥ २०॥

तं हासेनापालिः स्वयंवरं क्षितिभुजां ससेनापालिः।
न बभासेनापालिः स्रगेषु यैः शिरसि या रसेनापालि॥

तं हासेन आप आलिः स्वयंवरं क्षितिभुजां ससेनापालिः।
न बभासे नापालिः स्रक् एषु यैः शिरसि या रसेन अपालि॥ २१॥

तमिति। क्षितिभुजां राज्ञामालिः पंक्ति हासेन हर्षादिना तं दमयन्त्याः स्वयंवरमाप प्राप। यद्वा कीदृशी आलिः ? हासेन उपलक्षितेत्युपलक्षणे तृतीया। कीदृशी आलिः ? ससेनापालिः सेनापालयः सेनान्य स्तद्युक्ता। सा स्रक् माला एषु राजसु न बभासे इति काकुः अपि तु शुशुभे इत्यर्थः।

सा का ? या स्रक् माला तैः राजभिः शिरसि रसेन स्नेहेन अपालि अरचि धृतेत्यर्थः । किम्भूता ? स्रक् नापालिः अपगता अलयो यस्याः सा अपालिः न अपालिः सभ्रमरेत्यर्थः तेषां शिरःसु इन्द्रनीलादिमणिमत्तया भृङ्गाभावेपि भृङ्गवत्तया माला शोभते स्मेति ध्वनिः ॥ ३१ ॥

तां गां सेनाराजिः स्वर्गसदां यैः सदारसेनाराजि ।
आयासेनाराजिक्षयितरिपौ चलति विबुधसेनाराजि ॥

तां गां सेनाराजिः स्वर्गसदां यैः सदा रसेन अराजि ।
आयासेन आर आजिक्षयितरिपौ चलति विबुधसेनाराजि ॥ ३२ ॥

तामिति । आजिक्षयितरिपौ आजौ संग्रामे क्षयिता नाशिता रिपवः शत्रवो येन सः । तस्मिन् विबुधसेनाराजि विबुधा देवा स्तेषां या सेना तस्या राट् सः । तस्मिन् इन्द्रे चलति सति स्वर्गसदां देवानां सेनाराजिः सेनापंक्तिरायासेन श्रमेण तां गां विदर्भदेशोपलक्षितां भुवं आर प्राप । यैः स्वर्गसद्भिः सदा सर्वदा रागेण भैम्यनुरागेण अराजि शोभितम् ॥ ३२ ॥

सोथ परमहस्तेन प्रापि नलेनोत्सवः परमहस्तेनः ।
स्फुरितपरमहस्तेनप्रबभौरविणेवतत्पुरंपरमहस्तेन ॥

सः अथ परमहस्तेन प्रापि नलेन उत्सवः परमहस्तेनः ।
स्फुरितपरमहस्तेन प्रबभौ रविणा इव तत्पुरं परं अहः तेन ॥ ३३ ॥

सोयेति। अथानन्तरं परमहस्तेन परम उत्कृष्टो हस्तः करो यस्य सः तेन आजानुलम्बितभुजेनेत्यर्थः। स स्वयंवरः प्रापि प्राप्तः। कथम्भूतः स्वयंवरः ? परमहस्तेनः परेषां महाः परमहा स्तेषां स्तेनस्तस्करः। महउत्सवः। परमुत्कृष्टं तत्पुरं भीमनगरं तेन नलेन प्रबभौ शुशुभे। केन किमिव। स्फुरितपरमहस्तेन। स्फुरिता परमा उत्कृष्टा हस्ताः किरणाः यस्य तेन रविणा अहः दिनमिव ॥ २३ ॥

क्षिप्तलसन्नालीकानहितेषु मुखेन्दुतुलितसन्नालीकान्।
राज्ञःसन्नालीकान्कान्तिर्विबुधांश्च नाहसन्नालीकान्॥

क्षिप्तलसन्नालीकान् अहितेषु मुखेन्दुतुलितसन्नालीकान्।
राज्ञः सन्नालीकान् कान्तिः विबुधान् च न अहसत् नाली कान्॥ २४ ॥

क्षिप्तेति। नाली नलस्येयं नाली कान्तिः कान् राज्ञो नृपान् च पुनः कान् विबुधान्नाहसदपितु सर्वानेव। कीदृशान् ? अहितेषु शत्रुषु क्षिप्तलसन्नालीकान् क्षिप्ताः प्रेरिताः लसन्तो दीप्यमाना नालीका बाणविशेषा ये स्तान्। एवं मुखेन्दुतुलितसन्नालीकान् मुखेन्दुभिस्तुलितानि सन्ति समीचीनानि नालीकानि पद्मानि ये स्तान्। एवं सन्नालीकान् सन्नमपगतमलीकं कपटादि येषां ते तान्। षन् ष्टविसरणगत्योः क्तः ॥ २४ ॥

अजनिकलापास्यन्तंस्वयशोऽनिजकंमहःकलापास्यन्तं।
शत्रुकलापास्यन्तम्प्रेच्य नलंसुरततिःकलापास्यन्तम्॥

अजनि कला पास्यन्तं स्वयश: अनिजकं महः कला अपास्यन्तं।
शत्रुकलापास्यन्तं प्रेच्य नलं सुरततिः कलापास्यं तं॥ ३५॥

अजनीति। सुरतति र्देवपंक्ति स्तं नलं प्रेच्य दृष्ट्वा कला जडा किं कर्त्तव्यता मूढा जातेत्यर्थः। कीदृशं नलम्। स्वीयं यशः पास्यन्तं रचन्तम्। अनिजकमस्वकीयं महस्तेजः प्रभुत्वमपास्यन्तमरचन्तम्। यद्वा निजकं स्वकीयं महस्तेजः आपास्यन्तं दूरतः प्रसारयन्तमित्यर्थः। एवं शत्रुकलापास्यन्तं शत्रूणां कलापाः समूहा स्तानस्यति चिपतीति सः तम्। अथवा अस्यन्तः असिना अन्तो यस्य एतादृशः शत्रुकलापो यस्य। एवं कलापास्यं कलां पातीति कलापश्चन्द्रस्तत्सदृशमुखम्। कलापो भूषणे वर्हे तूणीरे संहतेपि चेत्यमरः॥ ३५॥

स्वर्निलयानामनलंकृतमपिजेतुन्ततिःश्रियानामनलं।
यमजेयानामनलम्प्रोचेशक्रस्तमरिचयानामनलम्॥

स्वर्निलयानां अनलंकृतं अपि जेतुं ततिः श्रिया नाम नलं।
यं अजेयानां अनलम् प्रोचे शक्रः तं अरिचयानां अनलं॥ ३६॥

स्वरिति। शक्र इन्द्रस्तं नलं प्रोचे उवाच। नाम सम्भावनायां। तं कं? यमनलंकृतमप्यलंकाररहितमपि नलं। स्वर्निलयानां देवानां ततिः

श्रेणिः श्रिया शोभया जेतुं तिरस्कर्तुमनलं न अलं समर्था । किम्भूतं नलं ? अजेयानामन्यै र्जेतुमशक्यानामरिचयानां शत्रुयूथानामनलमग्निं दाहकत्वात् ॥ २६ ॥

वद कामायासन्नस्त्वम्भैम्यै यद्गुणाः श्रमायासन्नः ।
श्रेष्ठतमायासन्नस्त्वाद्रष्टा नतु जनः स्वमायासन्नः ॥

वद कामायासं नः त्वं भैम्यै यद्गुणाः श्रमाय आसन् नः ।
श्रेष्ठतमा या आसन्नः त्वां द्रष्टा न तु जनः स्वमायासन्नः ॥ २७ ॥

वदेति । हे नल त्वं तस्यै भैम्यै नोऽस्माकं कामायासं कामेन कृतो य आयासस्तं वद त्वत्कृते देवान् कामः पीडयतीति भावः । तस्यै कस्यै ? यद्गुणाः यस्याः गुणा नोऽस्माकं श्रमाय खेदाय आसन् अभूवन् शमायेति पाठे शान्त्यै इत्यर्थः । अथ च या श्रेष्ठतमा अत्यन्तमुत्कृष्टा । पुनस्तत्रेत्यर्थात् आसन्नो जनो द्वारपालकादिस्त्वां न द्रष्टा न द्रक्ष्यति कीदृशस्त्वम् ? स्वमायासन्नः स्वस्य तव मत्प्रसादजन्या या माया कपटः तयासन्न आच्छन्नः ॥ २७ ॥

इति सरवेकेहास्तन्यस्य समुकुलं सुरप्रवेकेहास्त ।
तामविवेकेहास्तः अयति स्त्रीतत्र पार्थिवेकेहास्त ॥

इति सरवे के हास्तं न्यस्य सः मुकुलं सुरप्रवेके अहास्त ।
तां अविवेकेहास्तः अयति स्त्री तत्र पार्थिवे का इह आस्त ॥ २८ ॥

इतीति । सुरप्रवेके सुरश्रेष्ठे इन्द्रे इति उक्तप्रकारेण सरवे सशब्दे सति इन्द्रे एवमुक्तवति सतीत्यर्थः । के मस्तके हास्तं हस्तसम्बन्धिमुकुलं न्यस्य मस्तके अञ्जलिं कृत्वा स नलः तां दमयन्तीं अहास्त जगाम । कीदृशः सः ? अविवेकेहास्तः अविवेकस्याज्ञानविशेषस्य या ईहा चेष्टा तया अस्तः रहितः । यदा नलं दृष्टवती दमयन्ती नान्यं वरिष्यतीति । इन्द्रस्य योऽविवेकस्तज्जनितया चेष्टया अस्तः प्रेषित इत्यर्थः । पार्थिवे नले अयति गतवति सति का स्त्री इह स्थले आस्त अतिष्ठत् न कापीत्यर्थः ॥ २८ ॥

हरिपवमानयमानान्दूतोऽस्मिनलोमहारमानयमानान्
भवतींमानयमानान्भैमिसुरान्विद्धिमहमिमानयमानान्

हरिपवमानयमानां दूतः अस्मि नलः महारमानयमानान् ।
भवतीं मानयमानान् भैमि सुरान् विद्धि महं इमान् अयमानान् ॥ २९

हरीति । हरिरिन्द्रो ऽग्निश्च पवमानो वरुणो वायुश्च यमः कृतान्तस्तेषां दूतो नलनामाहमस्मि । इमानिन्द्रादीन् सुरान् महत्तव स्वयंवरमयमानान् प्राप्तान् विद्धि जानीहि । कीदृशान् ? महारमानयमानान् रमा लक्ष्मीः नयो नीतिः मानश्चित्तसमुन्नतिः महान्तो रमानयमाना येषां ते तान् । एवं भवतीं त्वां मानयमानान् स्वीकुर्वतः ॥ २९ ॥

तुल्येऽप्सरसा देहिप्रभवो मग्नाः स्मर प्रसरसादे हि।
तानभिसर सा देहि स्रजञ्च नाकात्सुखञ्च सरसादेहि ॥

तुल्ये अप्सरसा देहिप्रभवः मग्नाः स्मरप्रसरसादे हि।
तान् अभिसर मा देहि स्रजं च नाकात् सुखं च सरसात् एहि ॥ ४० ॥

तुल्यइति। हे अप्सरसा तुल्ये रम्भादिसदृशे। देहिप्रभवो मनुष्यादीनामीश्वरा देवाः स्मरप्रसरसादे स्मरस्य यः प्रसरः प्रसारस्तज्जन्ये सादे दुःखे मग्नाः। हि यतः। अतः सा त्वं तान् देवानभिसर स्वीकुरु। पुनः स्रजं मालां देहि। सरसादमृतादियुक्तान्नाकात् स्वर्गात् सुखमेहि प्राप्नुहि ॥ ४० ॥

इति कृतसामारवतः सुरलोकात्तन्मुखेन सामारवतः।
न रिरंसामारवत स्थलादिव नलोत्कमानसा मारवतः ॥

इति कृतसामारवतः सुरलोकात् तन्मुखेन सा मारवतः।
न रिरंसां आर वत स्थलात् इव नलोत्कमानसा मारवतः ॥ ४१ ॥

इतीति। सा भैमी सुरलोकादिन्द्रादिदेवगणात् रिरंसां रन्तुमिच्छां क्रीडां न आर न प्राप। किम्भूतात् तन्मुखेन नलमुखेन इति पूर्वोक्त न्यायेन कृतसामारवतः कृतः सामस्य सान्त्वनायाः आरवः शब्दो येन

ततः। एवं मारवतः मारो मदनस्तद्वतः । वत खेदे। कीदृशी सा ? नलोत्कमानसा नले उत्कमुत्कण्ठितं मानसं चेतो यस्याः सा। कस्मादिव ? मारवतः स्थलादिव मरोरिदं मारवं तादृशात् स्थलादिव मरुसम्बन्धिदेशादिव। यथा हंसः नलोत्कमानसः नले जलोत्पन्नपदार्थे विसे उत्कण्ठितचित्तो मरुसंभूतवस्तुतो रिरंसां नाप्नोति। यद्वा क्षतसामेति दमयन्त्या विशेषणं क्षतं साम सान्त्वनं यया सा । आरवतः शब्दं कुर्वत इति सुरलोकविशेषणम्॥ ४१ ॥

साविरराजायतया वीक्ष्य दृशा तं स्मरातुराजायतया।
स्थितिरत्राजायतयाद्युसदाञ्चाभाषिनिषधराजायतया

सा विरराज आयतया वीक्ष्य दृशा तं स्मरातुरा अजायत या।
स्थितिः अत्र अजायतयाद्युसदां च अभाषि निषधराजाय तया ॥ ४२

सेति। सा भैमी विरराज विशेषेण शुशुभे । सा का ? या आयतया विशालया दृशा दृष्ट्या। अत्र भवने। तं नलं वीक्ष्य दृष्ट्वा स्मरातुरा कामव्याप्ता अजायत अभूत्। अपरं तया भैम्या निषधराजाय नलाय द्युसदां दिवि सीदन्तीति द्युसदो देवास्तेषां स्थितिः स्थानं अजायतया जायायाः भावो जायता न जायता अजायता तया अभाषि अत्रादि। स्त्रीलेन देवान् न वृतवतीति भावः ॥ ४२ ॥

तस्या देवाद्यस्य प्रणम्य च नलेन धीः पदेवाद्यस्य।
सति निनदेवाद्यस्य स्वयं प्रियायाः पदं मुदेवाद्यस्य॥

तस्याः देवाद्यस्य प्रणम्य च नलेन धीः पदे अवादि अस्य।
सति निनदे वाद्यस्य स्वयं प्रियायाः पदं मुदे अवात् यस्य॥४३॥

तस्यादिति। नलेनास्य देवाद्यस्य सुरमुख्यस्येन्द्रस्य पदे चरणे प्रणम्य अभिवाद्य तस्याः भैम्याः धी र्बुद्धिरवादि उक्ता। कस्मिन् सति? वाद्यस्य तूर्य्यादे र्निनदे शब्दे सति। यस्य नलस्य मुदे आनन्दाय प्रियायाः पदं वाक्यं अवात् प्राप। यद्वा अस्य कस्य? यस्येन्द्रस्य मुदे हर्षाय प्रियायाः पदं स्थानमव्रत् जगाम नल इति शेषः। भैमी त्वां न वृणुत इत्युक्तवानिति भावः॥४३॥

अथ तरसारंगेयन्नृपतिगणोऽस्थित पदेषु सारङ्गेयं।
चञ्चलसारङ्गेयन्दमयन्ती चाचितुलितसारङ्गेयं॥

अथ तरसा रंगे अयं नृपतिगणः अस्थित पदेषु सारं गेयं।
चञ्चलसारङ्गे अयन् दमयन्ती च अचितुलितसारङ्गा इयं॥४४॥

अथेति। अथानन्तरमयं नृपतिगणो राजलोको रंगे स्वयंवरसभायां तरसा वेगेन पदेषु भीमकल्पितमञ्चस्थानेषु अस्थित आसीत्। नृपति-

गणः पदान्यकृत इति पाठे पदानि चरणविन्यासान् अकृत अकरोदित्यर्थः। किं कुर्वन् ? सारम् उत्कृष्टं गेयं अयन् गीतं शृण्वन्निति भावः गत्यर्था ज्ञानार्थः। कीदृशे रंगे ? चञ्चलसारंगे सौरभ्याधिक्येन चञ्चलाः सारङ्गा भ्रमरा यत्र तादृशे। यद्वा चञ्चलसारङ्गे खेलत्पक्षिविशेषे इत्यर्थः। यद्वा चञ्चला गमनागमनशीलाः सारङ्गा गजा यस्मिन् तस्मिन्नित्यर्थः। पुनरियं दमयन्ती खेचितपदेषु अस्थित इति पूर्वेणान्वयः। कीदृशीयं ? अक्षितुलितसारंगा अक्षिभ्यां तुलितः सारंगो मृगो यया सा। सारङ्गश्चातके भृङ्गे कुरंगे च मतंगजे इत्यमरः॥ ४४ ॥

व्यधुरवनामान्येषु प्रजा नृपेष्वथ निवेद्य नामान्येषु।
सूतैर्नामान्येषु प्रकीर्त्त्यमानेषु शोभनामान्येषु ॥

व्यधुः अवनामान् येषु प्रजाः नृपेषु अथ निवेद्य नामानि एषु।
सूतैः नाम अन्येषु प्रकीर्त्त्यमानेषु शोभना मान्येषु ॥ ४५ ॥

व्यधुरिति। अथ एषु नृपेषु राजसु नामानि निवेद्य उक्त्वा सूतै मागधैः प्रकीर्त्त्यमानेषु स्तूयमानेषु वन्दिभिः कृतपरिचयेषु सत्सु। तथा नाम सम्भावनायां। अन्येषु मान्येषु देवेषु प्रकीर्त्त्यमानेषु सत्सु एषु केषु ? येषु नृपेषु प्रजास्तत्रत्या जना अवनामान् नमस्कारान् व्यधुस्तक्रुः॥ ४५ ॥

सांगेननलसमानाननलसमानानमुत्रकतिचित्पुरुषान्
प्रैक्षत ननलसमानाननलसमानानभून्न तेषाम्भेदः ॥

साङ्गेन नलसमानान् अनलसमानान् अमुत्र कतिचित्पुरुषान्।
प्रैक्षत न न लसमानान् अनलसमानान् अभूत् न तेषां भेदः ॥ ४६ ॥

साङ्गइति। सा शोभना भव्या भैमी अमुत्र स्वयंवरे कतिचित्पुरुषान् न प्रैक्षत इति न किन्तु ददर्श। कीदृशान्? अनलसमानान् अग्नितुल्यान्। एवं लसमानान् देदीप्यमानान्। एवं अनलसमानान् न अलसमाना अनलसमानास्तान्। अंगेन शरीरेण नलसमानान् नलेन सदृशान् यतस्तेषां नलसमानानां पुरुषाणामिन्द्रादीनां भेदो विविच्य ज्ञानं नाभून्न जातम्॥ ४६॥

रुचिक्षतनासत्यागाःस्फुरतुनलोयदिचवच्मिनासत्यागाः
अपि दीनासत्यागान्न्याययुतेनैव वर्त्मनासत्यागा ॥

रुचिक्षतनासत्यागाः स्फुरतु नलः यदि च वच्मि न असत्याः गाः।
अपि दीना सती अगां न्याययुतेन एव वर्त्मना सत्यागा ॥ ४७ ॥

रुचीति। परं यद्यहं सती साध्वी यद्यहं असत्याः गाः वाणीः न वच्मि न वदामि। तथा दीनापि यदि न्याययुतेनैव वर्त्मना धर्ममार्गेणैव अगां गच्छामि। यद्यहं सत्यागा त्यागेन दानेन सह वर्त्तमाना तदा नलः स्फुरतु

इंद्रादिभिन्नत्वेन ज्ञानविषयो भवतु। कीदृशो नलः ? रुचिकृतनासत्या-गाः रुच्या कान्त्या कृतः नासत्ययो र्दस्रयोः आगो ऽपराधो येन दस्राधिकसुन्दर इति यावत्॥ ४७ ॥

यदि वाभावन्न्यस्य स्थितास्मि नलएव नरविभावन्यस्य।
देवसभावन्यस्य द्विपस्य वपुषो भवेद्विभावन्यस्य ॥

यदि वा भावं न्यस्य स्थिता अस्मि नले एव नरविभौ अन्यस्य।
देवसभावन्यस्य द्विपस्य वपुषः भवेत् विभा अवनी अस्य॥ ४८ ॥

यदिवेति। वा समुच्चये यदि चेत् अन्यस्यान्यस्मिन् पुरुषे भावं चित्ताभिप्रायं न्यस्य त्यक्त्वा। निपूर्वस्यासुक्षेपण इत्यस्य न्यस्येति रूपम्। अहं नलएव स्थितास्मि तिष्ठामि वर्त्ते। तर्हि अस्य नलस्य वपुषः शरीरस्य विभा कान्तिः अवनी रक्षिका भवेद् भवतु। कीदृशे नले ? नरविभौ नराणां विभु र्नरविभु स्तस्मिन्। कीदृशस्य वपुषः ? देवसभावन्यस्य द्विपस्य देवानां सभैव वनं तत्रोत्पन्नस्य द्विपस्य हस्तिनः। अन्योपि द्विपो वन्यो भवति॥ ४८

कृतभावासावनितानितिभुवमैक्षत्सुरान्सुवासावनिता
स्वपतिं वासावनिताचिह्नं धार्मिकजने ध्रुवासावनिता ॥

कृतभावा असौ अनितान् इति भुवं ऐक्षत् सुरान् सुवासाः वनिता।
स्वपतिं वा सावनिताचिह्नं धार्म्मिकजने ध्रुवा आस अवनिता॥ ४९ ॥

कृतेति। असौ वनिता भैमी भुवं भूमिमनितान् अप्राप्तान् भूमिस्पर्शरहितान् सुरान् देवान् ऐचत् अपश्यत्। कथं भूता सा ? इत्यनेन प्रकारेण कृतभावा कृतो भावश्चित्ताभिप्रायो यया सा। एवं सुवासाः सुष्ठु शोभनं वासो वस्त्रं यस्याः सा। वा शब्दस्वार्थः च पुनः स्वपतिं नलं ऐचत्। कीदृशं स्वपतिं ? अवन्या सह वर्त्तमानः सावनिः तस्य भावः सावनिता सैव चिह्नं यस्य तं भूमियुक्तपादत्वात् देवभिन्नत्वेन अपश्यदित्यर्थः। देवानान्तु तद्राहित्यं स्वाभाविकं। तं कम् ? यस्य नलस्य अवनिता अवनं रक्षणमस्यास्तीत्यवनी अवनिनो भावो ऽवनिता रक्षणवत्ता धार्म्मिकजने साधुनि जने ध्रुवा निश्चिता आस भवति स्म आसेति बभूवार्थेऽव्ययम्॥ ४९ ॥

स्वरिरंसादेवाल्याकुलया हृष्टार्थितापि सादेवाल्या।
वपुषि ससादेवाल्यादवृत्त नलमुपस्थितं रसादेवाल्या॥

स्वरिरंसादा इव अल्याकुलया दृष्टा अर्थितापि सा देवाल्या।
वपुषि ससादे बाल्यात् अवृत्त नलं उपस्थितं रसात् एव आल्या॥५०॥

स्वेति। सा भैमी आल्या सख्या करणेन रसादेव प्रीतेरेव तं नलमवृत्त अवृणुत। कीदृशं नलं ? उपस्थितं समीपे तिष्ठन्तम्। कस्मिन् सति ? बाल्याद् बाल्यमारभ्य बाला नवयौवना तस्याभावो बाल्यं तस्मात् बाल्याद्धेतो र्वा वपुषि ससादे सति सखेदे सति। कीदृशी सा ? देवाल्या देव-

पंक्त्या अर्थितापि याचितापि। एवं दृश्या दृशा स्वरिरंसादा इव स्वस्य रिरंसा रन्तुमिच्छा तां ददातीति स्वक्रीडाप्रदा इव। कीदृशा दृश्या? अव्याकुलया भ्रमर इव चञ्चलया ॥ ५० ॥

सत्सदसोमाननया रुद्रसमोयः स्वतेजसोमाननया।
प्रवृतः सोमाननया नलोबभौ भुविगुणेन सोमाननया॥

सत्सदसः माननया रुद्रसमः यः स्वतेजसा उमा न न या।
प्रवृतः सोमाननया नलः बभौ भुवि गुणेन सः अमान् अनया ॥ ५१ ॥

सदिति। स नलो बभौ शुशुभे। कीदृशः? अनया सोमाननया चंद्रवदनया भैम्या प्रवृतः पतित्वेन स्वीकृतः। स कः? यः सत्सदसः सतां देवानां साधूनां वा यत्सदः सभा तस्याः या मानना तया। रुद्रसमः शिवसदृशः रुद्रांशत्वात्। अनया कया? स्वतेजसा पातिव्रत्येन उमा नेति न किन्तूमैव एतेन शिवपार्वतीयोगोपि वर्णितः। कीदृशो नलः? गुणेन शौर्यादिना भुवि पृथिव्यां अमान् न माति इति अमान् अधिकगुण इत्यर्थः ॥ ५१ ॥

मददम्भावरमस्यज्ज्ञात्वाथमनोगुरुप्रभावरमस्य।
सुरवृषभावरमस्य प्रदिश्य जग्मुर्गतप्रभावरमस्य॥

मददम्भौ अरं अ त् ज्ञात्वा अथ मनः गुरुप्रभावरमस्य।
सुरवृषभाः वरं अस्य प्रदिश्य जग्मुः गतप्रभावरमस्य ॥ ५२ ॥

मदेति। अथ सुरवृषभा देवश्रेष्ठा इन्द्रादयोऽस्य नलस्य वरं प्रदिश्य दत्वा जग्मु र्ययुः। वरदाने हेतुमाह अस्य नलस्य मनस्विन्तं मददम्भौ मदस्य दम्भस्य तौ अरं झटिति अस्यत् त्यजत् ज्ञात्वा। कीदृशस्यास्य? गुरुप्रभावरमस्य प्रभावस्य रमाच प्रभावरमे गुर्व्यौ प्रभावरमे यस्य तस्य। यद्वा गुर्वी प्रभावेन रमा लक्ष्मी र्यस्य। एवं गतप्रभावरमस्य। गता नष्टः प्रभायाः कान्तेरवरमो ऽशोभनत्वं यस्मात् सः तस्यातिशयितकांतेरित्यर्थः॥ ५२॥

गुरुमहिमापरमायास्तम्भी नलएषवसतिमापरमायाः।
प्रिययामापरमायाः स्वपुरमगुर्यत्र तं चमापरमायाः॥

गुरुमहिमा परमायास्तम्भी नलः एषः वसतिं आप रमायाः।
प्रियया अमा परमायाः स्वपुरं अगुः यत्र तं चमापरं आयाः॥ ५३॥

गुर्विति। एष नलः प्रियया भैम्या अमा सह तत्स्वपुरं स्वनगरमाप प्राप। स्यादमा सन्निधानार्थे सहार्थे इति हेमचन्द्रः। कीदृशः? गुरुमहिमा महतो भावो महिमा गुर्वी महिमा यस्य सः। एवं परमायास्तम्भी परेषां शत्रूणां या माया तस्याः स्तम्भोरिपुकपटनाशक इत्यर्थः। कीदृशं स्वपुरम्। परमाया उत्कृष्टायाः रमायाः लक्ष्म्याः वसतिं स्थानम्। तत्किम्? यत्र पुरे आयाः धनागमनानि चमापरं सहिष्णुताशीलं तं नलमगुः प्रापुः॥ ५३ ॥

शशिना समहासमहा नगरेजनतासमहासमहास्तमुदं
अतिभासुरयासुरयाव्यहरद्यतनोत्सुरयासुरयागमपि

शशिना समहासमहा नगरे जनता समहा समहास्त मुदं।
अतिभासुरया सुरया व्यहरत् व्यतनोत् सुरया सुरयागं अपि॥ ५४ ॥

शशिनेति। जनता जनसमूहः नगरे नलपुरे मुदं हर्षं समहास्त प्राप। श्रोहाङ्गताविल्यस्य धातोः प्रयोगः ये गत्यर्थास्ते प्राप्त्यर्था ज्ञानार्थाश्च। किम्भूता जनता? शशिना चन्द्रेण समहासमहा समं हासस्य महस्तेजो यस्याः सा। महस्तूत्सवतेजसोरित्यमरः। एवं समहामहेन उत्सवेन सह वर्त्तमाना सा। एवं सुरया शोभनो रयः शब्दो यस्याः सा सुरया। पुनः जनतैव सुरया मदिरया व्यहरत् चिक्रीड। सुरयागमपि देवार्चनमपि व्यतनोत् अकरोत्। कीदृशा सुरया? भासुरया स्वच्छया॥ ५४ ॥

इति बोधिनीटीकासहिते श्रीकालिदासकृते नलोदये सत्काव्ये

प्रथमोच्छ्वासः।

॥ नलोदयः ॥

अथ रतिरेकान्तेन प्रापि नलेनात्र मन्दिरेकान्तेन।
तामपुनरेकान्तेन प्राप्तवता रिपुमदातिरेकान्तेन ॥

अथ रतिः एकान्तेन प्रापि नलेन अत्र मन्दिरे कान्ते न।
ताम् पुनः एकां तेन प्राप्तवता रिपुमदातिरेकान्तेन ॥ १ ॥

अथेति। अथानंतरं कान्तेन कमनीयेन। एवं तां भैमीं पुनरेकां महीं च प्राप्तवता। यद्वा। एकां मुख्यां तां भैमीमेव प्राप्तवता। एवं रिपुमदातिरेकान्तेन रिपूणां शत्रूणां मदो गर्वस्तस्यातिरेक आधिक्यं तस्यांतेन नाशकेन। तेन नलेन। एकान्तेनातिशयेनात्र मन्दिरे रतिः क्रीडा प्रापि प्राप्ता। यद्वा। एकान्तेत्र मन्दिरे रतिः न प्राप्नोति न किन्तु प्राप्तैव काक्वर्थे नञ् ॥ १ ॥

बभौ ससारसागरश्चकाससारसार्द्रधीः।
मधुः ससारसारवस्तदा ससारसार्त्तवः ॥

बभौ स सारसागरः चकास सा रसार्द्रधीः।
मधुः ससारसारवः तदा ससार सार्त्तवः ॥ २ ॥

बभाविति। सारस्य बलस्य सागरः समुद्रः स नलो बभौ शुशुभे। सारो बले स्थिरांशे चेत्यमरः। एवं रसार्द्रधीः रसेन प्रेम्णा आर्द्रा रसकोमला धी र्बुद्धि र्यस्याः सा दमयन्ती चकास शुशुभे। तदा तस्मिन्नवसरे मधु र्वसन्तः ससार आजगाम। मधुस्त्रैत्रर्त्तुदैत्येष्विति हेमचन्द्रः। कीदृशो मधुः? ससारसारवः। सारसानामारवः शब्दस्तेन सहितः। पुनः कीदृक्? सार्त्तवः ऋतौ भवमार्त्तवं पुष्पादि तत्सहितः। सृगताविल्यस्य लिटि ससारेति॥ २ ॥

समुदधिताशालीनांकरेणकणिशाग्ररुचिजिताशालीनां
दिनभर्त्ताशालीनामिवनलिनीमथसमुत्थिताशालीनां

समुदधित आशालीनां करेण कणिशाग्ररुचिजिता शालीनां।
दिनभर्त्ता शालीनां इव नलिनीं अथ समुत्थिता आशा आलीनां॥ ३

समुदधीति। दिनभर्त्ता सूर्य्यः करेण किरणेन नलिनीं समुदधित समुत्थापितवान् विकाशयामासेति यावत्। अथानन्तरमलीनां भ्रमराणामाशा इच्छा समुत्थिता उदिता। कीदृशेन करेण? शालीनां धान्यानां कणिशाग्ररुचिजिता कणिशाग्रस्य या रुक् तां जयतीति तत्तेन व्रीहिमञ्जर्य्यग्रकान्तिजिता कणिशं शस्यमञ्जरीत्यमरः। कीदृशीं नलिनीं? आशालीनां चन्द्रकरस्पर्शात् आशासु दिक्षु लीनां अदर्शनगताम्। कामिव? शालीनामिव लज्जितामिव। अन्यापि परपुरुषकराकृष्टा

लज्जिता भवति। परपुरुषभुक्तापि स्वामिना न त्यक्ता करेणोद्धृता तत्र षिङ्गानां आशा भवतीति भावः अलिः षिङ्गेच षट्पदे इति रन्तिः॥ ३

कुरवापचसारसकाकुरवान्कुरवाख्यनगोपितदाकुरवान्
कमलंकृतवद्गतपङ्कमलं कमलंनविलोभयितुङ्कमलम्॥

कुः अवाप च सारसकाकुरवान् कुरवाख्यनगः अपि तदा अङ्कुरवान्।
कं अलंकृतवत् गतपङ्कमलं कं अलं न विलोभयितु कमलं॥ ४ ॥

कुरवापेति। तदा वसन्तकाले कुः पृथिवी सारसकाकुरवान् सारसानां काकवो मनोहरा ये रवाः शब्दा स्तान् अवाप प्राप। कुरवाख्यनगोऽपि कुरवकवृक्षोप्यङ्कुरवान् जात इतिशेषः। कमलं पद्मं कज्जलं अलंकृतवत् शोभयत्। एवं कं पुरुषं विलोभयितुं न अलं अपि तु सर्वानेव रञ्जयितुं समर्थं। कीदृशं कम्? गतपङ्कमलं गतः पङ्करूपो मलो यस्य तत् तं कर्द्दमरहितमित्यर्थः॥ ४ ॥

अगुरतिमहिमानीतस्ततोरविमहांसिगुरुतमहिमानीतः
भवनंमहिमानीतःस्मरेणपरितःशराख्यमहिमानीतः ॥

अगुः अतिमहिमानि इतस्ततः रविमहांसि गुरुतमहिमानीतः।
भवनं महि मानी इतः स्मरेण परितः शराख्यं अहि आनीतः॥ ५ ॥

अगुरतीति। रविमहांसि सूर्य्यतेजांसि गुरुतमहिमानीतः अतिशयेन गुरु गुरुतमा गुरुतमा चासौ हिमानी च सा तथा ततःपञ्चम्यास्तसिः इतस्ततः अगुः प्रासरन्। कीदृशानि रविमहांसि ? अतिमहिमानि अत्यन्तं महिमा येषां तानि महाप्रभावाणि। मानी अभिमानी स नलः महिमह उत्सवस्तद्युक्तं भवनं प्रासादम् इतः प्राप्तः। कीदृशो मानी ? परितः समन्तात् स्मरेण कामेन शराख्यम् अहिं सर्प्पमानीतः प्रापित सर्प्पसदृशस्ववाणगोचरीकृत इत्यर्थः. कामपीडया रविरश्मिप्रतापेन च वहिः स्थातुं अशक्नुवन् गृहं गत इति भावः ॥ ५ ॥

स्मरसूचितयाजगतः च्चितिसूचितयाभवद्धिचम्पकमुकुलं
तदसूचितयाव्यथयानिरसूचितयाययावियुग्दम्पतिकौ

स्मरसूचितया जगतः चितिसूचितया अभवत् हि चम्पकमुकुलं।
तत् असूचि तया व्यथया निरसू चितया यया वियुग्दम्पतिकौ ॥ ६

स्मरेति। हि निश्चये तच्चम्पकमुकुलं चम्पककुड्मलं स्मरसूचितया अनंगसूचे भवत्वेनाभवत् जातम्। तत् किम् ? यन्मुकुलं जगतः चितिसूचितया जगतः संसारस्य चितौ प्रहारे सुतरामुचितया योग्यतया तया तज्जन्यया व्यथया असूचि ज्ञापितम्। तया कया ? यया चितया वृद्धिं प्राप्तया व्यथया वियुक् दम्पतिकौ विरहितस्त्रीपुरुषौ निरसू गतप्राणौ कृतौ। स्वार्थे कः॥ ६ ॥

विरलोच्चपलाशस्य प्रचुरम्पुष्पं बभूव चपलाशस्य।
स्मरनीचपलाशस्यप्राश्याध्वगपिशितचारुचपलाशस्य।

विरलोच्चपलाशस्य प्रचुरं पुष्पं बभूव च पलाशस्य।
स्मरनीचपलाशस्य प्राश्य अधगपिशितचारु चपलाशस्य॥ ७ ॥

विरलइति। पुनः विरलोच्चपलाशस्य विरलानि अप्रचुराणि उच्चानि पलाशानि पत्राणि यस्य पत्रम्पलाशञ्छदनन्दलम्पर्णञ्छदः पुमानित्यमरः। तस्य पलाशस्य ब्रह्मवृत्तस्य प्रचुरं पुष्पं बभूव जातम्। कीदृशं पुष्पम्? चपलाशस्य चपला आशा तृष्णा यस्य तस्य स्मरनीचपलाशस्य स्मर एव नीचस्तुच्छः पलाशो मांसाशी राक्षसस्तस्य प्राश्याध्वगपिशितचारु प्राश्यं भक्षणयोग्यं यत् अध्वगस्य पथिकस्य पिशितं मांसं तद्वचारु मनोहरम्। पथिकप्राणहारकत्वेन स्मरस्य राक्षसतुल्यत्वम् ॥ ७ ॥

ऋतौ बभुर्निशाङ्कया विभा विभा विभा विभाः।
कलाश्च तेषु सत्पतेरदा रदा रदा रदाः॥

ऋतौ बभुः निशाङ्कयाः विभाविभाविभौ इभाः।
कलाः च तेषु सत्पतेः अदारदारदाः रदाः॥ ८॥

ऋताविति। विभाविभाविभौ विभावो रत्यादिकारणं विद्यते यस्याः सा विभाविनी भा कान्तिस्तया विभौ व्यापके ऋतौ वसन्ते निशा-

ङ्क्या इभाः निशैवाङ्का नाम येषां ते इभा हस्तिनः मदजनकत्वात् रात्रि-रूपा हस्तिन इति रूपकम्। बभुः शुभ्रुभिरे च पुनस्तेषु रात्रिलक्षण-गजेषु सत्पतेश्चन्द्रस्य कलाः रदा दन्ताः बभुः। कीदृशाः रदाः? अदाररदा-रदाः। अदाराः जायारहिता स्तेषां दारदाः दारं हृदयविदारणं दद-तीति ते। यद्वा। किम्भूते च्युतौ? विभौ विशेषेण शोभमाने। किम्भूता इभाः? विभाः विशेषेण शोभमानाः। किम्भूता रदाः? विभाः विशेषेण शोभमानाः ॥ ८ ॥

इहललनाशोकालिप्रदेन येनात्ममदविनाशोकालि।
कामनाशोकालिस्वनहुंकृतिभिःसदिक्षनाशोकालि॥

इहललनाशोकालिप्रदेन येन आत्ममदविनाशः अकालि।
कामेन अशोकालिस्वनहुंकृतिभिः सः दिक्षु अनाशः अकालि॥ ९ ॥

इहेति। इह वसन्ते। ललनाशोकालिप्रदेन येन ललना स्त्री तस्याः शोकस्यालयः पंक्तयस्ताः प्रददाति कामिनीविरहं विस्तारयता येन पुरुषेणात्ममदविनाशः आत्मनो यो मदः कामोत्सवस्तस्य विनाशः अकालि अकारि। स पुरुषः दिक्षु दिशासु अशोकालिस्वनहुंकृतिभि-रशोकवृक्षसम्बन्धिनो ये अलयो भ्रमरास्तेषां स्वनाः शब्दास्तएव हुंकृतय-स्तर्जनावाचस्ताभिः करणेन कामेन अनाशः आशा वाञ्छा तया रहि-तोपि अकालि अबन्धि। जितेन्द्रियोपि वसन्ते भ्रमरशब्दादिना बद्धो

भवतीति भावः। अथ वा न विद्यते नाशो यस्य स मृत्युञ्जयतुल्योऽपि कामेन अवन्धि इत्यर्थः ॥ ९ ॥

स्मरस्य युद्धरंगतां रसा रसा रसा रसा।
जिता वियोगिनः समुन्नते नते नते नते॥

स्मरस्य युद्धरङ्गतां रसा आर सारसारसा।
जिताः वियोगिनः समुन्नतेननतेन तेन ते ॥ १० ॥

स्मरस्येति। सारसारसा साराः श्रेष्ठाः सारसाः पक्षिणो यस्यां सा रसा पृथ्वी स्मरस्य युद्धरङ्गतां समरभूमिभावं आर प्राप। समुन्नतेन तेन सम्यक् प्रकारेणोन्नता उत्कृष्टा इनता प्रभुता यस्य स तेन। तेन कामेन ते पुरुषा जिताः स्ववशीकृताः। ते के? ये वियोगिनः सस्त्रीकाः स्त्रीरहिता वा। स्मरतापपराजिताः सन्तः स्त्रीभिः सहासक्ता बभूवुरिति भावः। यद्वा कीदृशी रसा? सारसारसा आरस्यत इत्यारसः शब्दः सारसानां यः शब्द स्तद्विशिष्टा ॥ १० ॥

नुन्नमनामधुनानाश्रयतिमृतिङ्कोविनाङ्गनामधुनाना
इतिललनामधुनानाविधमधयत्किलतदर्थनामधुनाना

नुन्नमना मधुना न आश्रयति मृतिं कः विना अङ्गनां अधुना ना।
इति ललना मधु नानाविधं अधयत् किल तदर्थनां अधुनाना ॥ ११ ॥

नुन्नेति। अधुना वसन्तसमये। मधुना वसन्तेन नुन्नं प्रेरितं मनश्चित्तं यस्य स कः ? ना पुरुषो योऽङ्गनां रमणीं विना मृतिं मृत्युं न आश्रयति न प्राप्नोति। अपि तु सर्वोऽपि मृतिं आश्रयत्येव। किल सत्ये इति हेतो र्ललना स्त्री नानाविधं नानाप्रकारं मधु मद्यं अधयत् अपिवत्। कीदृशी ललना ? तदर्थनां तस्य नायकस्यार्थना याच्ञा तां अधुनाना अनिराकुर्वाणा अंगीकुर्वाणेत्यर्थः। रतिसमये पुरुषः अस्माकं वशतामेष्यतीत्यानन्देन मधु अपायदिति भावः। यद्वा तन्मरणशङ्कया मधु अधरामृतं अपायदिति भावः॥ ११॥

पिको पिको पिको पिको वियोगिनीरभर्त्सयत्।
वचांसि भङ्गमालपन्निता निता निता निताः॥

पिकः अपि कोपि कोपिकः वियोगिनीः अभर्त्सयत्।
वचांसि भङ्गं आलपन् इतानि तानितानि ताः॥ १२ ॥

पिकेति। कोपिकः कोपो ऽस्यास्तीति कोपी कोप्येव कोपिकः सकोप इत्यर्थः। यद्वा कोपयतीति कोपिकस्तासामेव कोपकर्त्तेति यावत्। अपि सम्भावनायां एतादृशः कोपि पिकः कोकिलस्ता वियोगिनीरभर्त्सयत् भर्त्सितवान्। भर्त्सनं तपकारगीरित्यमरः। किं कुर्वन् ? भङ्गं रचनाविशेषं। इतानि प्राप्तानि तानि तानि वचांसि वसन्तकालीनानि आलपन् कुर्वन्॥ १२॥

श्रीरापिकलापेन प्रवृद्धमाम्रावलिषु पिकलापेन।
न कलापिकलापेन प्रणर्त्तनमकारि वागपिकलापेन॥

श्रीः अपि कलापेन प्रवृद्धं आम्रावलिषु पिकलापेन।
न कलापिकलापेन प्रणर्त्तनं अकारि वाग् अपि कला आपे न॥ १३॥

श्रीरापीति। कलापेन कलाः पातीति कलापश्चन्द्रस्तेन श्रीः शोभा अपि प्राप्ता। पिकलापेन पिकानां लापः संलापस्तेन आम्रावलिषु आम्रवृक्षपंक्तिषु प्रवृद्धं अतिवृद्धिं प्राप्तम्। कलापिकलापेन कलापा बर्हा एषां सन्तीति कलापिनो मयूरास्तेषां कलापेन यूथेन प्रणर्त्तनं प्रकृष्टं नृत्यं नाकारीति न किन्तु कृतमेवेत्यर्थः। पुनः कला परिस्फुटा वागप्याप प्राप्ता॥ १३॥

सहकारवृते समये सहकारहणस्य के न सस्मार पदम्
सहकारमुपरिकान्तैः सहकारमणी पुरः सकलवर्णमपि

सहकारवृते समये सहकाः रहणस्य के न सस्मार पदम्।
सहकारम् उपरि कान्तैः सह का रमणी पुरः सकलवर्णम् अपि १४

सहकारेति। सहकारवृते सहकार आम्रवृक्षस्तत् पुष्पमपि सहकारं तेन वृते समये वसन्ते के पुरुषाः रहणस्य स्त्रीविरहजन्मदुःखस्य सहकाः सहनक्षमाः न केपीत्यर्थः। का रमणी स्त्री कान्तैः सह भर्त्तृभिः सह

उपरि अन्ते सहकारं हकारवर्णसहितं पुर आदौ सकलवर्णमपि कस्य लस्य कलौ वर्णौ ताभ्यां सहितं पदं वाक्यं कलहमिति यावत्। न सस्मार न स्मृतवती तथा च सैव कलहं विस्मृत्य कान्तसङ्गमं चकारेति भावः ॥ १४ ॥

अधिगतकामधुरागादगमेत्यभ्रमरपटलिकामधुरागात्
पीत्वोत्कामधुरागाद्रुतमकृततनःश्रियोधिकामधुरागात्

अधिगतकामधुरा अगात् अगं एत्य भ्रमरपटलिका मधुरागात्।
पीत्वा उत्का मधुरागात् द्रुतं अकृत ततः श्रियः अधिकाः मधुः आगात् १५

अधीति। रागात् प्रीतेः मधु पुष्परसं पीत्वा द्रुतं शीघ्रं उत्का उत्कण्ठिता सती अधिगतकामधुरा अधिगता प्राप्ता कामस्य धू र्भारो यया सा त्वयै-तत् कर्त्तव्यमिति स्वीकृतमन्मथाज्ञा समुदायेति यावत्। एवम्भूता भ्रमरपटलिका मधुपश्रेणिरागात् वृक्षात् अगं वृक्षमेत्य प्राप्य मधुराः गाः वाणीरकृत अकरोत्। ततः भ्रमरमधुरगुञ्जितात् मधु र्वसन्तोऽधिकाः श्रियः शोभा आगात् प्राप ॥ १५ ॥

नसमानसमानसमानसमागममापसमीक्ष्यवसन्तनभः
भ्रमदभ्रमदभ्रमदभ्रमदभ्रमरच्छलतःखलुकामिजनः॥

न सः मानसमानसमानसमागमम् आप समीक्ष्य वसन्तनभः।
भ्रमदभ्रम् अदभ्रमदभ्रमदभ्रमरच्छलतः खलु कामिजनः॥ १६ ॥

नसमानेति। खलु निश्चये कामिजनः कामुकसमूहः समानसमान-समानसमागमं न आप। मानसे मनो मानसमान स्तेन सह वर्त्तमानः समानसमानः समानसमानश्चासौ समानः बन्धुश्च मनोवर्त्तिमानसहितबन्धुरिति यावत्। तस्य समागमं न प्रापेति काकुः प्रापैवेत्यर्थः। यद्वा स कामिजनः मानसे चित्ते यो मानः तेन समानस्तुल्यो यः समागमः तं खलु निश्चितं न प्राप किन्तु वसन्तोद्दीपितः सन् अकालसमागमं प्रापेत्यर्थः। किं कृत्वा? वसन्तनभः वसन्तसम्बन्धिनभ आकाशं समीक्ष्य दृष्ट्वा। कीदृशं नभः? अदभ्रमदभ्रमदभ्रमरच्छलतः भ्रमदभ्रम्। अदभ्रं बहुलं मदो येषां ते अदभ्रमदाः। मेघमालाभ्रमेण खस्मिन् भ्रमं ददतीति भ्रमदाः। अदभ्रमदाश्च ते भ्रमदाश्च ते भ्रमराश्च तेषां छलतो व्याजात्। भ्रमन्त्यभ्राणि मेघा यत्र तत्। अभ्रम्मेघोवारिवाहः। अदभ्रम्बहुलम्बहु इत्यमरः॥ १६ ॥

गतमत्रचयेनगृहादसमुत्तरतान्तरतान्तरतान्तरतां।
परएवविकारइयायवृहत्तमसन्तमसन्तमसन्तमसन्॥

गतम् अत्र च येन गृहात् असमुत्तरता अन्तरतान्तरतान्तरतां।
पर एव विकारः इयाय वृहत्तमसन्तमसं तं असन्तं असन्॥ १७ ॥

गतमिति। अत्र वसन्तसमये च पुनर्येन पुरुषेण गृहाद्गतं निर्गतं परः शत्रुः विकारो धातुविकार एव तं इयाय प्राप। कीदृशेन? अन्तः अतान्तर-

तान्तरतां असमत्तरता अन्तः हृदि अतान्तं अविस्तीर्णं यद्रतान्तरं सुरतान्तरं तस्य भावस्तत्ता तां असमुत्तरता अप्राप्तवता। यद्वा अन्तः हृदि अतान्तं असमाप्तं रतं यस्याः सा अतान्तरता अन्त र्मनसा अतति स्वामिनं गच्छति सततं ध्यायतीति यावत् सा अन्तरता। अतान्तरता चासौ अन्तरता चेति सा तां असमुत्तरता उल्लंघयता त्यक्तवता त्वस्रवन तरणयोरिति। किम्भूतं पुरुषम्? वृहत्तमसन्तमसं वृहत्तमं अधिकं सन्तमसं अज्ञानं यस्य तम्। एवं असन्तमविवेकिनं। कीदृशः विकारः? असन् अपरिहार्यो ऽसाधु र्वा ॥ १७ ॥

क्रुधिकान्तवशन्नवदामसमापनयापनयापनयापनया।
तमृतेऽनुशयेनचतामशनैरवता रवता रवता रवता॥

क्रुधि कान्तवशं नवदामसमापनयापनया आप न या अपनया।
तं ऋते अनुशयेन च ताम् अशनैः अवतारवता आर वत अरवता॥ १८ ॥

क्रुधीति। या स्त्री क्रुधि क्रोधे सति नवदामसमापनयापनया। नवञ्च तद्दाम च नवदाम नवीना माला तस्याः समापनं समाप्तिस्तया या यापना कालातिक्रमस्तेन करणेन कान्तवशं नायकसमीपं न आप न प्राप। यापनं कालविक्षेपे इति हेमः। कीदृशी या? अपनया अपगतो नयो नीति र्यस्याः सा। अरवता मूकत्वं अनुशयेन पश्चात्तापेन सह अशनैः शीघ्रं तत्कान्तं ऋते विना तां नायिकां आर प्राप। कीदृशे-

नानुशयेन ? आसमन्तात् अवतारवता अवतारोऽस्यास्तीत्यवतारवान् तेन तदानीमुत्पन्नेन। बत खेदे ॥ १८ ॥

नभसोविवरंकुसुमेक्षणभागतरो गतरो गतरो गतरो।
वदकान्तमवेक्ष्ययथाद्यमधावरमे वरमे वरमे वरमे॥

नभसः विवरं कुसुमेक्षणभाग् अतरः गतरोगतरः अगतरो।
वद कान्तम् अवेक्ष्य यथा अद्य मधौ अरं एव रमा-एव रमे वर मे १९

नभसइति। हे वर श्रेष्ठ अगतरो हे पर्वतसम्बन्धिवृक्ष त्वं नभस आकाशस्य विवरमन्तरं अतरः तीर्णवानसि अत्युच्चोसीत्यर्थः। कीदृशस्त्वम् ? कुसुमेक्षणभाक् कुसुमान्येवेक्षणानि नेत्राणि तद्भाक् तद्युक्तः। एवं गतरोगतरः अतिशयितो रोगो रोगतरः गतो रोगतरो यस्य यस्माद्वा स दुःसहरोगरहित इत्यर्थः। अतो मे कान्तमवेक्ष्य दृष्ट्वा तथा वद कथय यथा अद्य मधौ वसन्ते अरमेव शीघ्रमेव रमेव लक्ष्मीरिवारमे क्रीडां करोमि। लघुक्षिप्रमरंद्रुतम्। क्षीराब्धितनयारमेत्यमरः॥ १९ ॥

श्रितेतिगामनागतस्वबन्धुकामनागतः।
परापनामनागतस्ततामकामनागतः॥

श्रिता इति गाम् अनागतस्वबन्धुका मनाक् अतः।
परा आप नाम न अगतः तताम कामनागतः॥ २० ॥

श्रितेति। परा उत्कृष्टा नायिका इत्येनेन प्रकारेण श्रिता आश्रितार्थात् वृत्तमेव। अतः अगत एतस्मात् वृत्तात् मनाक् ईषदपि गां प्रत्युत्तरवचनं न आप न प्राप। कीदृशी ? अनागतस्वबन्धुका न आगतः स्वकीयो बन्धु र्भर्त्ता यस्याः सा। नाम निश्चये कामनागतः काम एव नागः कृष्णसर्प्पस्तस्मात् तताम ताम्यतिस्म। अनेन प्रलापोन्मादव्याधय इति तिस्रो दशाः सूचिताः॥ २०॥

कालललनादिवसन्तंकुसुमशरमसोढहृद्यनादिवसन्तम्।
अलिभिरनादिवसन्तंदृष्ट्वायत्रात्मनोऽर्थनादिवसन्तम्

का ललना दिवसं तं कुसुमशरं असोढ हृदि अनादि वसन्तं।
अलिभिः अनादि वसन्तं दृष्ट्वा यत्र आत्मनः अर्थनात् इव सन्तं॥ २१

केति। का ललना कामिनी तं दिवसं तस्मिन् दिवसे वसन्तऋतौ कुसुमशरमसोढ सहितवती न कापीत्यर्थः। दिवसमिति कालाध्वनो रत्यन्तसंयोगेति द्वितीया। किम्भूतं कुसुमशरं ? हृदि मानसे अनादि सर्वदा वसन्तं स्थितिमन्तम्। यत्र दिवसे सन्तं वर्त्तमानं वसन्तं ऋतुं दृष्ट्वा अलिभि र्भ्रमरै रनादि नादो ऽकारीत्यर्थः। उत्प्रेक्षते आत्मनो ऽर्थनादिव आत्मीयसुरतप्रार्थनादिव। तथा च कीटा अपि सुरते प्रार्थयन्ति किमुत मानुषीति भावः॥ २१॥

स्वयमथ मन्दारितया युक्तोयुक्तन्नलः स मन्दारितया।
आरामन्दारितया मदनेन धियापदुत्तमंदारितया॥

स्वयं अथ मन्दारितया युक्तः युक्तं नलः सः मन्दारितया।
आरामं दारितया मदनेन धिया आपत् उत्तमं दारितया॥२२॥

स्वयमिति। अथानन्तरं स नलः स्वयं मन्दारितया युक्तं मन्दारा अस्य सन्तीति मन्दारी मन्दारिणो भावो मन्दारिता तया युक्तं सहितं मन्दारवृक्षसमूहसहितम्। उत्तमं श्रेष्ठमाराममुपवनमापत् प्राप। कीदृशो नलः? मन्दारितया युक्तः। मन्दा अरयो ऽस्य सन्त्यसौ मन्दारी तस्य भावस्तत्ता तया सहितः कर्त्तव्यविचारानभिज्ञशत्रुलसहितः। यद्वा मन्दस्त्वासौ अरिश्चेति मन्दारिः तस्य भावः मन्दारिता तया हेतौ तृतीया शत्रुभावेन कामेन खण्डितधिया युक्त इत्यर्थः। एवं मदनेन स्मरेण दारितया खण्डितया बुद्ध्या युक्तः। एवं दारितया युक्तः दाराः अस्य सन्तीति दारी दारिणो भावो दारिता तया सहितः स्त्रीमत्तया संयुक्तः।२२॥

अनुव्रता समाननं समाननन्द भीमजा।
तमिन्दुना समाननं समाननन्दने वने॥

अनुव्रता समाननं समा ननन्द भीमजा।
तं इन्दुना समाननं समाननन्दने वने॥२३॥

अनुव्रतेति। समाननं मानना पूजा तया सहितं पूज्यमित्यर्थः। इन्दुना समाननं चन्द्रसदृशमुखं तं नलं अनुव्रता अनुगता अनुबद्धा वा। समासलक्ष्मी का? भीमजा दमयन्ती। समानानन्दने समानं सदृशं नन्दनं इन्द्रवनं यस्य तस्मिन् वने ननन्द आनंदं प्राप्तवती। समाननन्देति वा क्रियापदम् ॥ २३ ॥

इहरुचिरामावलयस्वदृशमितिपृथक्प्रियस्यरामावलयः ।
प्राप्तारामावलयस्फुरो गिरा यदुदरेभिरामावलयः ॥

इह रुचिरां आवलयस्व दृशं इति पृथक् प्रियस्य रामावलयः ।
प्राप्तारामा वलयस्फुरः गिरा यदुदरे अभिरामाः वलयः ॥ २४ ॥

इहेति। हे सुंदरि इह वने रुचिरां मनोज्ञां दृशं चक्षुरावलयस्व आवर्त्तय इत्यनेन प्रकारेण प्रियस्य भर्त्तु र्गिरा वचनेन ताः रामावलयः स्त्रीश्रेणयः। पृथक् एकैकशः प्राप्तारामा आरामगता अभूवन् अरण्यं जग्मुरित्यर्थः। कीदृश्यः? वलयैः कटकैः स्फुरन्तीति क्विप् वलयस्फुरः। कटकं वलयोऽस्त्रियामित्यमरः। अथ वा प्रियस्य वचनेन स्फुरस्तुष्टा बंभूवुः कथम्भूताः? प्राप्तारामावलयः प्राप्ता आरामाणां आवलयो याभिस्ता इत्यर्थः। ताः काः? यदुदरे यासामुदरेऽभिरामाः सुन्दरा वलयस्त्रिवलीभङ्गा इत्यर्थः। करोपहारयोः पुंसि वलिः प्राण्यङ्गजे स्त्रियामित्यमरः॥ २४ ॥

नवकुसुमानमनागा गन्तुं नैच्छत्परा समानमनागाः।
अजनिपुमानमनागाश्रित्यससत्कुसुमदानमानमनागाः।

नवकुसुमानमनागाः गन्तुं नैच्छत् परा समानमना गाः।
अजनि पुमान् अमनाक् आश्रित्य सः सत्कुसुमदानमानं अनागाः॥२५

नवेति। नवकुसुमानमनागाः नवैः कुसुमैरानमन्तीति नवकुसुमानमनास्तादृशा अगा वृक्षा यासु ता गाः वनभुवः गन्तुं यातुं पराऽन्या स्त्री नैच्छन्नायासीदिति। कीदृशी ? समानमनाः समानं मानसहितं मनो यस्याः सा कृतमानेत्यर्थः। स पुमान् सापराधः पुरुषः। अमनाक् अनल्पं। सत्कुसुमदानमानं सुकुसुमानां दानमेव मानः सम्माननम् तामाश्रित्य अनागा निरपराधो ऽजनि जातः। स पुष्पवनं गन्तुमनिच्छन्त्या मानिन्याः स्वावचितसत्पुष्पदानेन मानमपाचकार सत्कुसुमदामदानमिति पाठे पुष्पमालादानमाश्रित्येत्यर्थः॥२५॥

रुषितंसखिसादममुष्यलसत्तनुतेतनुतेतनुतेतनुते।
ननवाननवाननवाननवागिहतेचरणेम्रतिमेष्यतिसः॥

रुषितं सखि सादं अमुष्य लसत्तनुतेतनुते तनु ते तनुते।
न न वाननवाननवान् अनवाक् इह ते चरणे म्रतिम् एष्यति सः॥२६

रुषितमिति। नायकप्रेरितदूतीवाक्यं। हे सखि लसत्तनुतेतनुते

लसन्ती तनु र्यस्या असौ लसत्तनुस्तद्भावस्तत्ता तया इता प्राप्ता नुति-स्तुति र्यया सा तत्संबुद्धिः कमनीयशरीरतालब्धस्तुते । ते तव तनु स्वल्पमपि रुषितं रोषो ऽमुष्य तव प्रियस्य सादमवसन्नतां तनुते विस्तारयति । त्वयि रुष्टायाम् अस्य बहुदुःखं जायत इति भावः। स तव कान्तः इहास्मिन् वसन्ते ते चरणे त्वत्पदे ऽनवाक् अवाक् अधोमुखः न अवाक् अनवाक् अभिमुखः अथ वा अवाक् मूकः अनवाक् स्तुतिवाक्यसहितः सन्नित्यर्थः । कथम्भूतः ? वाननवाननवान् वानं शुष्कं नवं यौवनोदय-सुन्दरमाननं मुखं यस्य स तादृशः। स प्रियः मृतिं न एष्यति इति नापि तु मरिष्यत्येव। त्वच्चरणपतितस्यास्य प्राणास्तिष्ठन्ति नोचेत् मद नव्यथया शुष्कमुखस्य मरणमेवेति भावः। मृतिमित्यत्र नतिमिति पाठे नतिं प्रणामं एष्यतीत्यर्थः । स्तवः स्तोत्रं नुतिस्तुतिरित्यमरः। वान शुष्के गतौ गन्ध इति वैजयन्ती । पराङ्मुखः पराचीनः स्यादवाङ्प्यधो मुख इत्यमरः । इणगतावित्यस्य लृटि एष्यतीति ॥ २६ ॥

अपिचैत्यनगानवतानवतानवतानवतास्ततरामधुना
इहसौख्यमगोचरमाचरमाचरमाचरमास्यनरम्यतरा

अपि च एत्य नगान् अवतानवता नवता न वत अस्ततरा मधुना ।
इह सौख्यं अगोचरं आचर मा च रमा चरमा अस्य न रम्यतरा ॥२७

अपीति । पुनस्तामेवाह । हे सखि अवतानवता अवतानो विस्तारो ऽस्यास्तीत्यवतानवान् तेन मधुना वसन्तेन नवता नवीनता न अस्ततरा

ऽतिशयेन त्यज्या । वतास्वर्ये किन्तु वसन्तो नूतनतां त्यजिष्यत्येवेति भावः। किं कृत्वा ? नगान् वृक्षानेत्य प्राप्य। इह प्रौढवसंते ऽगोचरं वक्तुमशक्यं सौख्यं आचर लभस्व अस्य वसन्तस्य चरमा पश्चिमा रमा लक्ष्मीश्च पुनः मा शोभा रम्यतरा सुन्दरी न भवति । वसन्तमध्ये भर्त्रा सह रत्यादिकं सुखमनुभूयतां पश्चात्तनी शोभा तु न भव्येति भावः। नुन्ननुत्तास्तनिष्ठ्यूता विद्धक्षिप्तेरिताः समाः। नवीनो नूतनो नवः। आचरेति चरगतिभक्षणयोरित्यस्य लोटि ॥ २७ ॥

इतिलालिकयालिकयातकचैरतिकयालिकयालिकयाकथिता।
दयितंसमयासमयादपराव्यहरत्समयासमयाचतया ॥

इति लालिकया अलिकयातकचैः अतिकालिकया आलिकया कथिता।
दयितं समया समयात् अपरा व्यहरत् सः मया समया च तया॥ २८ ॥

इतीति । इत्यनेन प्रकारेण लालिकया लालयन्त्या आलिकया सख्या कथिता उक्ता अपरा स्त्री दयितं समया भर्त्तुः समीपं समयात् अगात्। दयितमिति समयायोगे समया अभित इत्यादिना द्वितीया। समयान्तिकमध्ययोरित्यव्ययवर्गे मेदिनी। समयादिति यातेर्लङि। च पुनः स कामुकः मया लक्ष्म्या समया तुल्यया तया स्त्रिया सह व्यहरत विचिक्रीड। कीदृश्या ? अलिकयातकचैरलिके याता प्राप्ता

ये कचास्तूर्णकुन्तला स्तैरतिकालिकया श्यामलया सख्या वा विशेषणम्। ललाटमलिकं गोधिः। कचः केशः शिरोरुह इत्यमरः॥ २८ ॥

अतिरुचिमानस्तवकःसरस्तटोयंविचीयमानस्तवकः।
इहखलुमानस्तवकःप्रियामितिपरोनयत्समानस्तवकः॥

अतिरुचिमान् अस्तवकः सरस्तटः अयं विचीयमानस्तवकः।
इह खलु मानः तव कः प्रियां इति परः अनयत् समानस्तवकः॥ २९

अतीति। कश्चिन्मानवतीं मानयन्नाह हे सुन्दरि अयं विचीयमानस्तवको विभिः पक्षिभि र्भ्रमरप्रभृतिभिश्चीयमाना मकरन्दपानायान्विष्यमाणाः स्तवकाः पुष्पगुच्छा यस्मिन् तादृक्। अथवा विचीयमाना अवचीयमानाः समृद्धाः स्तवका यस्मिन् तादृक्। अस्तवकः अस्ता गता वका यस्मात् तादृक् सरस्तटः तडागतीरं। अतिरुचिमान् अतिसुन्दरः। इहास्मिंस्थले तव कः मानः? खलु निश्चितं। कः प्रस्तावः इति क्रमेण समानस्तवकः समानः मानसहितः सादर इति यावत् स्तवकः स्तुति र्यस्य स तादृक्कामुकः प्रियं स्त्रियं अनयत् अनैषीद्रत्यै इति यावत्। पुष्पवासलोभभ्रमद्भ्रमरे वकादिराहित्येन निर्जने मानो ऽनुचित इत्येतादृशान्यस्थलाभावादिह सम्भोगो भवत्विति हस्ते गृहीत्वा कुञ्जं अविशदिति भावः। अनयदिति नियोलङि॥ २९ ॥

अरुणतरपरागस्य प्रसवम्प्रैचिष्ट न पुनरपरागस्य।
हसितैरपरागस्य स्वैस्तिष्ठन्त्यपि लवेप्सुरपरागस्य॥

अरुणतरपरागस्य प्रसवं प्रैचिष्ट न पुनः अपरा अगस्य।
हसितैः अपरागस्य स्वैः तिष्ठन्ती अपि लवेप्सुः अपराक् अस्य ॥३०

अरुणेति। अपरान्याङ्गनाऽरुणतरपरागस्य अरुणतराः अतिशयेनारुणाः परागाः कुसुमरजांसि यस्य तादृशस्यास्य अगस्य वृक्षस्य स्वैः स्वकीयै हसितै र्हासै रपरागस्य अपगतलोहित्यस्य अपराक् संमुखं लवेप्सुः पुष्पमवचिकीर्षुस्तिष्ठन्त्यपि विद्यमानापि प्रसवं पुष्पं न पुनः प्रैचिष्ट नापश्यत् लोहितकुसुमस्य स्वहासेन शुक्लीभूतत्वाद् विस्मयो जात इति भावः। लवोऽभिलावो लवने स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने। शैलवृक्षौ नगावगौ इत्यमरः। ईक्षदर्शनांकनयोरित्यस्मात् प्रपूर्वात्लुङ्याटिसिचीटिरूपम्॥ ३०॥

अवेच्य पल्लवालयानगान् श्रितालवालया।
लतातयेवबालयाबभे ऽन्यया ववालया॥

अवेच्य पल्लवालयान् अगान् श्रितालवालया।
लतातया एव बालया बभे अन्यया ववाल या॥ ३१॥

अवेच्येति। अन्यया बालया षोडशवार्षिक्या लततया इव लतात्वेन रूपेणैव बभे शुशुभे अन्या का? या पल्लवालयान् नवपत्रयुक्तान् अगान्

वृक्षान् अवेक्ष्य दृष्ट्वा ववाल उल्ललास अन्यापि लताश्रितालवाला आश्रयभूतान् वृक्षान् दृष्ट्वा उल्लसत्येवेति भावः । यद्वा ववाल चचालेत्यर्थः यथा लतावृक्षानधिरोहितुं चलति तथेति भावः बलप्राणने स्खलने वा धातोः रूपं कथम्भूतया श्रितालवालया ? पल्लवानयनार्थं श्रितं आश्रितं आलवालं यया तयेत्यर्थः ॥ २१ ॥

व्रततीनामालीनांमध्येन्योव्यचिनुताङ्गनामालीनाम्।
अप्येनामालीनांस्मिताच्चजानन्मदाच्चनामालीनाम्॥

व्रततीनाम् आलीनां मध्ये अन्यः व्यचिनुत अङ्गनां आलीनां।
अपि एनाम् आलीनां स्मितात् च जानन् मदात् च नाम आलीनां ॥२२

व्रततीति । अन्यः कामी आलीनां सखीनां स्मितात् हासात् । पुनरलीनां भ्रमराणां मदाज् जानन्नपि कलयन्नपि अङ्गनां स्त्रियं व्यचिनुत विलोकयामास । किम्भूतां ? व्रततीनां लतानां मध्ये आलीनां सखीनाञ्च मध्ये आलीनां गुप्तानामसम्भावनायाम् । आदौ सर्वा एव लता इति ज्ञानमासीत् इदानीं काचित् हसति कुत्रचित् भ्रमराः स्वनन्ति इति ज्ञात्वा तत्राङ्गनाम् अन्वेष्टुं गतवतीत्यर्थः ॥ २२ ॥

कमितुः कलुषाच्चिसुखार्थनभागपरागपरागपरागपरा
स्थितिमापतथैवहृतः सपुमाननयाननयाननयाननया

कमितुः कलुषाच्चिसुखार्थनभाग् अपराग् अपरा अगपरागपरा ।
स्थितिम् आप तथा एव हृतः स पुमान् अनया आननयाननया न नया २२

कमितुरिति । अगपरागपरा वृत्तमकरन्ददर्शनोन्मुखी अतएव कलुषाक्षिसुखार्थनभाक् कलुषं परागेण यदक्षि तस्य यत् सुखं परागनिष्काशनात् तस्य या ऽर्थना याञ्चा तां भजतीति तद्भाक् । अपराङ्गना कमितुः कमयतीति कमिता भर्त्ता तस्यापराक् संमुखं स्थितिं स्थानमाप प्राप । अनया अङ्गनया स पुमान् पतिस्तथैव तेन प्रकारेण भर्त्तुरभिमुखस्थितित्वेन न हृत इति न किन्तु वशीकृतः । अनया कया ? आननयाननया आननं मुखं तस्य यानं भर्त्तृमुखसमीपप्रापणं तत्र नयो वैदग्ध्यं यस्याः सा । नयनपतितमकरन्दं दूरीकुर्विति नायकाभिमुखं मुखं प्रसारयन्ती तं जहारेति भावः ॥ २३ ॥

स्वमनेनसमायतयाव्यधितागःस्वेवकश्चनसमायतया ।
ऋजुमानसमायतयातस्मैनाक्रोधिजीवनसमायतया ॥

स्वं अनेनसं आयतया व्यधित आगःसु एव कश्चन समायतया ।
ऋजुमानसं आयतया तस्मै न अक्रोधि जीवनसमाय तया ॥ २४ ॥

स्वमिति । कश्चन कामी तस्याः स्वभार्य्याया अग्रे आयतया अतिदीर्घया समायतया मायया कपटेन सह वर्त्तमानः समायस्तस्य भावः । समायता तया सकपटत्वेन आगःसु एव अपराधेषु सत्स्वपि स्वमात्मानम् अनेनसं अपराधरहितं व्यधित चक्रे । ऋजुमानसं कोमलचित्तं आयतया प्राप्ततया अर्थात् कामिन्या जीवनसमाय प्राणतुल्याय । तस्मै भर्त्रे नाक्रोधि न कुपितम् ॥ २४ ॥

अभवदनेनानाविस्मयदोन्योमानिनीजनेनानावि ।
अतिसुजनेनानाविस्खलनंयदुपवनमनेनानावि ॥

अभवत् अनेनाः ना विस्मयदः अन्यः मानिनीजने नानावि ।
अतिसुजनेन अनाविस्खलनं यद् उपवनं अनेन अनावि ॥ २५ ॥

अभवदिति । मानिनीजने विस्मयदो ऽद्भुतदो ऽन्यो ऽपरो ना पुरुषः ततः तस्माद्धेतोरनेना अनपराधो ऽभवत् अभूत् । यद्यस्मादनेनातिसुजनेनापि सुहृज्जनेन पुंसा नानावि नानाविधा वयः पक्षिणो यस्मिंस्तादृशम् उपवनमारामो ऽनाविस्खलनं वर्णनावैपरीत्यमपशब्दादि वा तद्रहितं यथा स्यात् तथा ऽनावि स्तुतम्। कृतापराधः कश्चित् पुमान् उद्यानवर्णनयैव तां प्रासीदयदिति भावः । अनावीति णुस्तुतावित्यस्य चिणि लुङिरूपम् ॥ २५ ॥

जनादसोःसमानतःपदाहतिंसमानतः ।
परोदधौसमानतः स्वमूर्ध्निभासमानतः ॥

जनात् असोः समानतः पदाहतिं समानतः ।
परः दधौ समानतः स्वमूर्ध्नि भासमानतः ॥ २६ ॥

जनादिति । परोऽन्यः कामुकः असोः समानतः असुः प्राणः तस्य

समानतः सदृशात् प्राणतुल्यात् समानतः साहङ्कारात् । भासमानतः शोभमानात् जनात् कान्ताजनात् पदाहतिं चरणेन आहतिं आघातं समानतो ऽतिनम्रः सन् स्वमूर्द्ध्नि दधौ स्वशिरसि प्रसादमिव दधारेत्यर्थः ॥ २६ ॥

तनुच्छटोत्तमालया तया भुवोत्तमालया।
अहारि शीतमालयानिलावधूतमालया॥

तनुच्छटा उत्तमालया तया भुवा उत्तमालया।
अहारि शीतमालयानिलावधूतमालया ॥ २७ ॥

तनुच्छटेति । तया उद्यानभुवा उत्तमालया उद्गता उच्छ्रिताः तमालवृक्षा यस्यां सा तादृश्या। पुनः शीतमालयानिलावधूतमालया शीतो यो मालयो ऽनिलो मलयगिरिसम्भवो वायुः तेनावधूता कम्पिता माला वृक्षश्रेणी यस्यां तादृश्या भुवा उत्तमालया उत्तम आलयो गृहं यस्याः सा तादृशी। तनुच्छटा स्त्रीसमूहो ऽहारि हृता तथा च मन्दसुगन्धिशीतलवायुसम्बन्धेन मनोहरे उद्याने कान्तसहिता सर्व्वाविलासिन्य उत्तमगृहं त्यक्त्वा रमणार्थं ययुरिति भावः। वेल्लितप्रेंखिताधूतचलिताकम्पिताधुते इत्यमर । छटाकान्तौ संहतौ चेति धरणिरिति भरतः ॥ २७ ॥

श्रितलसदारामाभिःप्राप्येतिजनोविहृतिमुदारामाभिः ।
आरादारामाभस्फुरितसरोजं सरस्तदारामाभिः ॥

श्रितलसदारामाभिः प्राप्य इति जनः विहृतिं उदाराम् आभिः ।
आरात् आर अमा अभिस्फुरितसरोजं सरः तदा रामाभिः ॥ ३८ ॥

श्रितेति । जनः कामुकः श्रितलसदारामाभिः श्रित आश्रितो लसन् देदीप्यमान आरामो याभिस्तादृशीभिः आभिरमूभी रामाभिः स्त्रीभिः अमा सह उदारां श्रेष्ठां विहृतिं विहारं इत्यनेन प्रकारेण प्राप्य तदा तदानीं आरात् समीपे ऽभिस्फुरितसरोजं अभि सर्वतः स्फुरितानि फुल्लानि सरोजानि पद्मानि यस्मिन् तादृशं सरस्तडागं आर प्राप्तवान् । अमा सह समीपे च । कासारः सरसीसर इत्यमरः ॥ ३८ ॥

किमपः सरसीमाया धाम गुणामृतप्रसरसीमायाः ।
द्रुतमिति सरसीमायात्यक्तो भैम्या नलस्सरसीमायात् ।

किं अपः सरसि इमाः या धाम गुणामृतप्रसरसीमायाः ।
द्रुतं इति सः रसी मायात्यक्तः भैम्या नलः च सरसीं आयात् ॥ ३९ ॥

किमपइति । हे दमयन्ति त्वमिमा अपः जलानि किं गच्छसि ? विहर्तुमिति शेषः । या त्वं गुणामृतप्रसरसीमायाधामगुणा एवामृतं तस्य

प्रसरो विसर्पणं प्रवाह आधिक्यं वा तस्य या सीमा मर्यादा तस्या धाम गृहम्। अत्र अमृतशब्देन सुधाजलं चाभिधीयते गुणामृतप्रवाहः त्वय्येव स्थित इति भावः। इत्येवमुक्त्वा स नलो रसी रसिकः मायात्यक्तो व्याजहीनो ऽदम्भी भैम्या सह द्रुतं शीघ्रं सरसीं सरो ऽगात् अगमत् विहर्तुमिति शेषः। आपः स्त्रीभूम्नि वार्वारि। त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टमित्यमरः। आगादिति यातेर्लुङि॥ ३९॥

गतपङ्काःसारस्यश्रियोऽस्यजहुर्मनोऽधिकाःसारस्यः।
अपिकोकाःसारस्यस्थिताःकुरर्य्यश्चहंसिकाःसारस्यः॥

गतपङ्काः सारस्य श्रियः अस्य जहुः मनः अधिकाः सारस्यः।
अपि कोकाः सारस्य स्थिताः कुरर्य्यः च हंसिकाः सारस्यः॥ ४०॥

गतेति। सारस्यः सरस इमाः सारस्यः सरः सम्बन्धिन्यः श्रियः शोभाः कथम्भूताः? गतः च्युतः पङ्को याभ्यस्तादृश्यः निर्मलाः अधिकाः श्रेष्ठाः यद्वा कानि जलानि अधिकृत्य वर्त्तन्ते ताः सारस्य स्सरभूतस्य श्रेष्ठस्यास्य नलस्य मनो हृदयं जहुः हृतवत्यः। सारस्यस्थिताः आरस्यत इत्यारसः शब्दस्तस्य भाव आरस्यं आरस्येन सहितं सारस्यं तत्र स्थिताः कृतमधुरध्वनयः। अथ वा सरसस्य भावः सारस्यं तत्र स्थिता विख्याताः। सारस्याज्जलसाहित्यात् वा स्थिताः। कोकाश्चक्रवाकाः कुरर्य्यः

कुररपक्षिस्त्रियः। हंसिका हंसस्त्रियः सारस्यः सारसानां स्त्रियोऽपि मनो जह्रुः। सरःसम्बन्धिशोभादर्शनेन कोकादिदर्शनेन च मुमुद इति तात्पर्य्यं। पङ्कोऽस्त्री शादकर्द्दमौ। सारो बले स्थिरांशेच। कोकश्चक्रश्चक्रवाक इत्यमरः। जह्रुरिति हृञोलिटि॥ ४०॥

काक्षतिरस्तिमिताभिः स्फुटमद्भि र्विहृतिरस्तिमिताभिः
अनतितरस्तिमिताभिःकमेत्ययदशङ्कि धृतिभिरस्तिमिताभिः

का क्षतिः अस्ति मिताभिः स्फुटं अद्भिः विहृतिः अस्तिमिताभिः।
अनतितरस्तिमि ताभिः कं एत्य यत् अशङ्कि धृतिभिः अस्तिमिताभिः ४१

काक्षतीति। अनतितरस्तिमि अत्यन्तं तरो बलं रंहो वा येषां ते ऽतितरसो न विद्यन्ते अतितरसस्तिमयो मत्स्यविशेषा यस्मिन् तादृशं तिमिनक्रादिरहितं कञ्जलमेत्य प्राप्य धृतिभि र्धैर्यैरस्तिं त्यागमिताभि स्त्यक्तधैर्य्याभिः। यद्वा धैर्य्ये अस्तिमिताभिः अस्थगिताभिः चञ्चलाभिरित्यर्थः ताभिः स्त्रीभिः अशङ्कि शङ्कितं अतर्कीति पाठे विचारितं किमतर्कि तदाह यत् यस्मात्। अस्तिं क्षेपणं इताभिः प्राप्ताभिः तरङ्गक्षिप्ताभिरित्यर्थः मिताभि र्लघुपरिमाणाभिरद्भिः स्फुटं प्रत्यक्षमियं विहृतिः क्रीडा अतः काक्षतिरस्ति न कापीत्यर्थः। तिमिनक्रादिरहिते सरसि तासां भयकारणं स्वभावभीरुत्वमेव। राजीवः शकुलस्तिमिः।

तरसो बलरंहसो । कं शिरोंबुनोरित्यमरः । शङ्किभये इत्यस्य चिणि लुङि ॥ ४१ ॥

अलिर्मिलत्परागतःसरोरुहात्परागतः ।
मुखंमुदापरागतस्तदीयमापरागतः ॥

अलिः मिलत्परागतः सरोरुहात् परागतः ।
मुखं मुदा अपराग् अतः तदीयं आप रागतः ॥ ४२ ॥

अलोति । अलि र्भ्रमरो मिलत्परागतो मिलन् उल्लसन् परागः कुसुमरेणु र्यस्मिन् तादृशादतः अस्मात् सरोरुहात् कमलात् परागतः परावृत्तः अपराक् संमुखं तदीयं स्त्रीगणसम्बन्धिमुखं मुदा हर्षेण रागतो ऽनुरागात् आप प्राप्तवान् । सौरभाधिक्येन कमलं विहाय तन्मुखम् अश्रिश्रियदिति भावः ॥ ४२ ॥

अथकामानलिनीनांस्त्रीणां संघैर्मनोरमानलिनीनां ।
विधुरतमानलिनीनाम्पंक्तिर्विततानसंभ्रमानलिनीनां ।

अथ कामानलिनीनां स्त्रीणां संघैः मनोरमा नलिनीनां ।
विधुरतमा नलिनीनां पंक्तिः विततान संभ्रमान् अलिनीनां ॥ ४३

अथेति । अथानन्तरं कामानलिनीनां कन्दर्पानलयुक्तानां कामुकीनां नलिनीनां नलयुक्तानां नलः पतित्वेन अस्या अस्तीति नलशब्दा-

दिनि प्रत्ययः ततोङीप्। स्त्रीणां संघैः समूहैः नलिनीनां कमलिनीनां पंक्तिः विधुततमा ऽत्यन्तं कम्पिता स्नानवशात् पद्मावचयाद् वा मनोज्ञा सुन्दरी अलिनीनां भ्रमरीणां संभ्रमान्भयध्वनीन् ततान नलमहिताराना दोलिता कमलिनी भृङ्गी झङ्कारान् अतनोदिति भावः॥ ४२ ॥

सरःश्रियोन्तरङ्गतःसरोजनृत्तरङ्गतः।
भयंमहत्तरङ्गतस्तनूजनस्तरङ्गतः॥

सरः श्रियः अन्तरं गतः सरोजनृत्तरङ्गतः।
भयं महत्तरं गतः तनूजनः तरङ्गतः॥ ४४ ॥

सरइति। सरः श्रियः सरो लक्ष्म्या अन्तरं मध्यं स्वरूपत्वं वा गतः प्राप्तः। तनूजनः स्त्रीसमूहः सरोजनृत्तरंगतः सरोजानां कमलानां नृत्तं नर्त्तनं तस्य रङ्गतो रङ्गभूमेः। तरङ्गतः ऊर्म्मिर्महत्तरं अतिशयेन महद्भयं साध्वसं गतो गतवान्। कमलनर्त्तनहेतुतरंङ्गात् नक्रहतिकम्पशङ्कया स्त्रीजनो भीतो बभूवेति भावः। अन्तरम् अवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये। छिद्रात्मीयविनावहिरवसरमध्येन्तरात्मनि चेति। लास्यं नृत्तं च नर्त्तने इत्यमरः॥ ४४ ॥

अथ नीरात्सारसतः फेनपरीताद्यथाम्बरात्सारसतः।
अतिमुखरात्सारसतस्तीरमितास्त्रीततिश्चिरात्सारसतः॥

अथ नीरात् सारसतः फेनपरीतात् यथा अम्बरात् सारसतः।
अतिमुखरात् सारसतः तीरं इताः स्त्रीततिः चिरात् सारसतः॥ ४५

अथेति । अथ जलविहारानन्तरं सा स्त्रीततिः स्त्रीसमूह स्थिराद् बकुत्वणात् सारसतः सरसः इदं सारसं तादृशात् नीरात् जलात् तडागजलात् सारसतः सरसः इदं सारसं क्रीडनं ततस्तद्विहाय ल्यब्लोपे पञ्चमी नीरात् कथम्भूतात् ? रसतः सारतः अतिमुखरात् रसतः शब्दायमानात् सारसतः सारसपक्षिविशेषात् हेतोः अतिमुखरात् अतिवाचालात्। फेनपरीतात् फेनव्याप्तात् तीरं तटं इता प्राप्ता । उत्प्रेक्षेत अम्बरात् आकाशात् यथा अम्बरादिवेत्यर्थः । इवार्थे यथा । आकाशपक्षे सारसतः साराणि श्रेष्ठानि संति नक्षत्राणि यस्मिन् तादृशात् । फेनपरीतं जलं नक्षत्रवदाकाशप्रायं यथा गगणतलादप्सरसोऽवतरन्ति एवं जलात् स्त्रियोऽवतेरुरिति भावः । सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हितेपि सत्। व्योमपुष्करमम्बरम् । सारो बले स्थिरांशे च इत्यमरः । रसत इति रसशब्दे इत्यस्मात् शत्रंतः॥ ४५ ॥

सचोदयावलीनतः समुत्प्रभावलीनतः ।
नयन्ययावलीनतः पदंजनोवलीनतः॥

स च उदयावलीनतः समुत्प्रभावलीनतः।
नयन् ययौ अलीन् अतः पदं जनः वलीनतः॥ ४६ ॥

सचोदयेति । स च जनः स्त्रीसमूहः वलीनतस्त्रिवलीभिरानतः नम्रः अलीन् भ्रमरान् नयन् गात्रादिसौगंध्येनाकर्षयन अतः सरस्तीरात्

पदं स्वस्थानं ययौ। कथम्भूतं पदं ? उदयावलीनतः उदयाचलप्राप्तात्। यद्वा उदयं प्राप्य अवलीनात् निमग्नात् इनतः सूर्यात् समुत्प्रभावलिः सम्यगुद्गताः प्रभावलयः प्रभाश्रेणयो यस्मिन् तादृशं। सूर्ये ऽस्तमुपयाति स्त्रीजनो गृहं गतवानित्यर्थः। पदं व्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः॥ ४६ ॥

दिश कामानंगेहंमन्यो मदनेषुविकृतिमानंगेहं।
इति परमानंगेहं नलः प्रियामनयदतिविमानंगेहं॥

दिश कामान् अङ्ग इहंमन्यः मदनेषुविकृतिमान् अङ्गे अहं।
इति परमानङ्गेहं नलः प्रियां अनयत् अतिविमानं गेहं॥ ४७ ॥

दिशेति। हे अङ्ग प्रिये दमयन्ति अहं अङ्गे शरीरे मदनेषुविकृतिमान् कामशरविकारवानस्मि। कथम्भूतः ? इहंमन्यः इं कामं हन्तीति इहः इहं कामहन्तारं आत्मानं मन्यते इहंमन्यः अतः कामानभिलाषान् दिश देहि रत्यभिलाषं पूरय। इत्यनेन प्रकारेण नलः प्रियं गेहं गृहं अनयत् अनैषीत्। कथम्भूतं गेहं ? परमानङ्गेहं परमा उत्कृष्टा ऽनङ्गस्य कन्दर्पस्य ईहा चेष्टा वाञ्छा वा यस्मिन् भित्तिलिखितनानाकामचेष्टं कामोद्दीपनं वा। अतिविमानं अतिक्रान्तं विमानं पुष्पकादि येन तत् तिरस्कृतं देवयानमित्यर्थः। अनयदिति णीञ्प्रापणे लङि॥ ४७ ॥

अरुणमहस्तेनेन प्रापि च सोऽब्जैर्गुणग्रहस्तेनेन।
भाव्यमिहस्तेनेन स्फुटमस्य हि तद्गतेंऽशुहस्तेनेन॥

अरुणमहस्तेनेन प्रापि च सः अब्जैः गुणग्रहः तेने न।
भाव्यं इह स्तेनेन स्फुटम् अस्य हि तद्गते अंशुहस्ते अनेन॥ ४८॥

अरुणेति। इनेन रविणा अरुणमहस्ता अरुणतेजस्त्वं प्रापि प्राप्ता संध्यारागारुणो रविरभूत्। स च गुणग्रहो गुणग्रहणं अब्जैः कमलैः न तेने न विस्तारितः। इह संध्यासमये अस्य हि सूर्य्यस्य तद्गते कमलगते अंशुहस्ते किरणहस्ते सति अनेन रविणा स्तेनेन चौरेण स्फुटं व्यक्तं भाव्यम्। संध्यारागारुणे सूर्य्ये कमलानाम् आरुण्यं न अभूत्। यतः कमलगते रविकरे सति सायंकाले स्वकरद्वारा तद्रक्ततां रविरपहरिष्यतीति भावः। महस्तोद्भवतेजसोरिति। तेने तनोतेर्लिटि॥ ४८॥

यतो यतो यतो यतो रवेर्मरीचिसञ्चयः।
महान्धकारसञ्चयस्तत स्तत स्तत स्ततः॥

यतः यतोयतो यतो रवेः मरीचिसञ्चयः।
महान्धकारसञ्चयः ततस् ततस्ततस् ततस्॥ ४९॥

यतइति। यतो यस्माद्धेतो रवे र्मरीचिसञ्चयो रविकिरणसमूहः। यतो यतो यस्माद् यस्मात् स्थानात्। यत उपरतः। यमु उपरमे धातोः

रूपम्। ततस्तस्माद्धेतोः ततस्ततः तत्र तत्र महान्धकारभञ्चयो महान्धकारसमूहः ततः व्याप्तः। यतोयतो देशाद् रविकिरणा निवृत्ताः तत्र तत्र महान्धकारो व्यापदिति भावः ॥ ४९ ॥

छादितरविता नेन प्रापि च कालेन सस्वरविता नेन।
जितरुधिरविता नेनव्योम्ना च स्फुरितमुडुभिरविता नेन।

छादितरविता अनेन प्रापि च कालेन सस्वरवितानेन।
जितरुधिरवितानेन व्योम्ना च स्फुरितं उडुभिः अवितानेन ॥ ५० ॥

छादितेति । अनेन कालेन सायंकालेन छादितरविता आच्छादितः पिहितो रवि र्यस्मिन् सः तस्य भावस्तत्ता सा प्रापि प्राप्ता। कथम्भूतेन ? सस्वरवितानेन सस्वराः सशब्दाः वीनां पक्षिणां ताना विस्तारा यस्मिन् तादृशेन सशब्दपक्षिसमूहविशिष्टेनेत्यर्थः। एवं जितरुधिरवितानेन जितरुधिरसमूहेन अत्यन्तमारक्तेनेत्यर्थः। एवं अवितानेन अवीनां मेषाणां वितानो विस्तारो यस्मिन् तेन । यद्वा न विद्यते वितानो यज्ञो यस्मिन् तेन। सन्ध्यायां सम्नवर्जयेदिति स्मृतेः। पुन र्व्योम्ना आकाशेन उडुभिः करणेन स्फुरितं शोभितम् । यद्वा जितरुचिरवितानेनेति पाठे व्योम्ना इत्यस्य विशेषणं जितः अतिरुचिरो वितान उल्लोचो येन इत्यर्थः। क्रतुविस्तारयोरस्त्री वितानन्त्रिषुतुच्छके। तारकाप्युडुवास्त्रियामित्यमरः ॥ ५० ॥

अथोद्यतोम्बुराजतः श्रियं खमाप राजतः।
यथा घटो व्यराजत स्मराग्रगः सराजतः॥

अथ उद्यतः अम्बुराजतः श्रियं खं आप राजतः।
यथा घटः व्यराजत स्मराग्रगः सराजतः॥ ५१॥

अथेति। अथानन्तरं अम्बुराजत उदधेः सकाशात् उद्यतः उद्गतः स चन्द्रो व्यराजत शुशुभे खं आकाशं राजतः चन्द्रात् श्रियमाप प्राप। यथा स्मराग्रगः कामपुरोवर्त्ती राजतो रूप्यमयो घटः शोभते। यथा शब्दइवार्थे। उदधेरुत्थितश्चन्द्रो मदनभूपप्रस्थानाभिषेकरूप्यकलश इव रराजेति तात्पर्य्यम्। श्वेतरूप्येपि रजतं हेम्नि रूप्ये सिते त्रिषु। व्यराजतेति राजतेर्लङि॥ ५१॥

दधतं कालंकालंकालंकालंवियोगिनी शशिनन्तं।
अध्वगकालंकालंकालंकालं प्रसमीक्षितुम्प्रोद्यन्तं॥

दधतं कालं कालंकालंकालं वियोगिनी शशिनं तं।
अध्वगकालं कालंकालं का अलं प्रसमीक्षितुं प्रोद्यन्तं॥ ५२॥

दधतमिति। का वियोगिनी विरहिणी तं शशिनं प्रसमीक्षितुं द्रष्टुमलं समर्था न कापीत्यर्थः। कथम्भूतं? कालं कृष्णवर्णं यत् कालंकालंकालं कलङ्क एव कालङ्कः स चासौ अलङ्कालो ऽलङ्कारो रलयोरैक्याद् यमके न दोषः। तं दधतं धारयन्तम्। अध्वगकालं

अध्वगानां पथिकानां कालं नाशकम् । एवं कालंकालं काले काले रात्रौ रात्रौ प्रोद्यन्तं प्रकर्षेणोद्यन्तं । कृष्णे नीलासितश्यामकालश्यामल-मेचकाः । कालकालमतिनित्यवीप्सयोरिति द्विर्वचनम् । कालाध्वनो रत्यन्तसंयोगे इति द्वितीया ॥ ५२ ॥

क्षरन्तुषारशीकराः प्रबुद्धकैरवाकराः ।
ततोजजृम्भिरे करा जगत्सु शार्वरीकराः ॥

क्षरन्तुषारशीकराः प्रबुद्धकैरवाकराः ।
ततः जजृम्भिरे कराः जगत्सु शार्वरीकराः ॥ ५३ ॥

क्षरदिति । ततोनन्तरं क्षरत्तुषारशीकराः क्षरन्तः स्रवन्तः तुषारशीकराः तुहिनजलकणा येभ्यस्तादृशाः । एवं प्रबुद्ध उत्फुल्लः कैरवाकरः कुमुदसमूहो येभ्यस्तादृशाः शार्वरीकराः चन्द्रसम्बन्धिनः शर्वरीकरश्चन्द्रः तस्येदमित्यण् । कराः किरणा जगत्सु लोकेषु जजृम्भिरे विजृम्भिताः । बलिभागांशवः कराः । जजृम्भिरे इति जृभिविनामे विकाशे चेत्यस्माल्लिटि ॥ ५३ ॥

बधूस्तदानुनिन्यिरे नये नये नये नये ।
वशं नरोनयन्समुन्नते नते नते नते ॥

बधूः तदा अनुनिन्यिरे नयेन येनयेन ये ।
वशं नरः अनयम् समुन्नतेन तेनतेन ते ॥ ५४ ॥

बध्विति । तदा चन्द्ररश्मिपातानन्तरं ये नरा ये पुरुषाः येन येन नयेन यया यया नीत्या उपायेन वधूः कामिनीरनुनिन्यिरे ऽनुनीतवन्तः। ते पुरुषाः समुन्नतेन समृद्धेन तेन तेनोपायेन वश्यं स्वाधीनतां अनयन् अनैषुः । येन येनोपायेन पादा नत्या स्त्रियोऽवशा वशमागताः तेनैव वश्यं चक्रुरिति भावः ॥ ५४ ॥

सहा सहावमादरैः सहा सहाः स्मरस्य ते।
सुरा सुरा यथामृते सुरा सुरागमादधुः ॥

सहासहावं आदरैः सह असहाः स्मरस्य ते ।
सुरासुराः यथा अमृते सुरासु रागं आदधुः ॥ ५५ ॥

सहेति । स्मरस्य कामस्य असहा असहिष्णव स्ते कामुकजनाः सहासहावं हासहावादिभावसहितं यथा स्यादेवं आदरैः सह सादरं सुरासु मधुषु रागं पानानुरागमादधु र्दधिरे। अनन्तरं कामुकजनाः हावादिसहितं सुरां पपुरिति भावः । यथा सुरासुरा देवासुरा अमृते रागं कुर्वन्ति । सुराहलिप्रियाहालापरिस्रुद्वरुणात्मजाः। आदधुरिति दधतेर्लिटि । यथोक्तं भरतेन । अलंकारस्वभावश्च ज्ञेया भावारसाश्रयाः । यौवनेऽभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः। देहात्मकं भवेत् सत्वं सत्वाद्भावः समुत्थितः । भावात् समुत्थिता हावो

हावाद्धेला समुत्थिता । लीला विलासो विच्छित्ति र्विभ्रमः किल-किञ्चितम् । मोट्टायितं कुट्टमितं विव्वोको ललितं तथा । विकृतञ्चेति विज्ञेया दश स्त्रीणां स्वभावजाः । प्रियस्यानुकृति र्लीला श्लिष्टा वाग्वेषचेष्टितैः । विलासोतिविशेषोस्ति प्रियाया वासनादिषु । मण्डना-च्छादनन्यासो विच्छित्तीरूपदर्शतः । चित्तवृत्त्यनवस्थानं शृङ्गाराद् विभ्रमो मतः । हर्षाद्धासितगीतादिव्यामिश्रं किलकिञ्चितम् । मोट्टायितं प्रियं स्मृत्वा सांगभङ्गादिजृम्भणम् । दुःखोपचारः सौख्येपि हर्षात् कुट्ट-मितं मतं । विव्वोकोभिमतप्राप्तावपि गर्वादनादरः । अनाचार्योपदिष्टं स्यात् ललितं रतिचेष्टितम् । वक्तव्यभाषणं व्याजात् विकृतं दर्शितेंगितम् ॥ ५५ ॥

मधु प्रपीय चाभवन्नता नता नता नताः ।
रमा रमा रमा रमाकुले जनेत्र हालया ॥

मधु प्रपीय च अभवन् नतानताः न ताः न ताः ।
रमा अरं आर मारमाकुले जने अत्र हालया ॥ ५६ ॥

मध्विति । मधु प्रपीय मधु मद्यं प्रपीय पीत्वा तास्ताः स्त्रियः नता नम्रा अनता अनम्राश्च नाभवन् अपितु अभवन् । या याः पूर्वं नम्राः तास्ता मधुपाने कृते ऽनम्रा अभवन् । या या अनम्रास्तास्ता मधुपाने कृते नम्रा अभवन् । मारमाकुले मारः कन्दर्पस्तस्य मा लक्ष्मीः

बध्निति । तदा चन्द्ररश्मिपातानन्तरं ये नरो ये पुरुषाः येन येन नयेन यया यया नीत्या उपायेन वधूः कामिनीरनुनिन्यिरे ऽनुनीतवन्तः। ते पुरुषाः समुन्नतेन समृद्धेन तेन तेनोपायेन वशं स्वाधीनतां अनयन् अनैषुः। येन येनोपायेन पादा नत्या स्त्रियोऽवशा वशमागताः तेनैव वशं चक्रुरिति भावः ॥ ५४ ॥

सहा सहावमादरैः सहा सहाः स्मरस्य ते।
सुरा सुरा यथामृते सुरा सुरागमादधुः ॥

सहासहावं आदरैः सह असहाः स्मरस्य ते।
सुरासुराः यथा अमृते सुरासु रागं आदधुः ॥ ५५ ॥

सहेति । स्मरस्य कामस्य असहा असहिष्णव स्ते कामुकजनाः सहासहावं हासहावादिभावसहितं यथा स्यादेवं आदरैः सह सादरं सुरासु मधुषु रागं पानानुरागमादधु र्दधिरे। अनन्तरं कामुकजनाः हावादिसहितं सुरां पपुरिति भावः । यथा सुरासुरा देवासुरा अमृते रागं कुर्वन्ति । सुराहलिप्रियाहालापरिस्रुद्वरुणात्मजाः। आदधुरिति दधतेर्लिटि । यथोक्तं भरतेन । अलंकारस्वभावज्ञै र्ज्ञेया भावारसाश्रयाः । यौवनेभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः। देहात्मकं भवेत् सत्वं सत्वाद्भावः समुत्थितः । भावात् समुत्थिता हावो

हावाद्धेला समुत्थिता । लीला विलासो विच्छित्ति र्विभ्रमः किल-किञ्चितम् । मोट्टायितं कुट्टमितं विव्वोको ललितं तथा । विकृतञ्चेति विज्ञेया दश स्त्रीणां स्वभावजाः । प्रियस्यानुकृति र्लीला श्लिष्टा वागवेषचेष्टितैः । विलासोतिविशेषोस्ति प्रियाया वासनादिषु । मण्डनाच्छादनन्यासो विच्छित्तीरूपदर्शतः । चित्तवृत्त्यनवस्थानं शृङ्गाराद् विभ्रमो मतः । हर्षाह्लादितगीतादिव्यामिश्रं किलकिञ्चितम् । मोट्टायितं प्रियं स्मृत्वा सांगभङ्गादिजृम्भणम् । दुःखोपचारः सौख्येपि हर्षात् कुट्टमितं मतं । विव्वोकोभिमतप्राप्तावपि गर्वादनादरः । अनाचार्योपदिष्टं स्यात् ललितं रतिचेष्टितम् । वक्तव्यभाषणं व्याजात् विकृतं दर्शितेंगितम् ॥ ५५ ॥

मधु प्रपीय चाभवन्नता नता नता नताः ।
रमा रमा रमा रमाकुले जनेत्र हालया ॥

मधु प्रपीय च अभवन् नतानताः न ताः न ताः ।
रमा अरं आर मारमाकुले जने अत्र हालया ॥ ५६ ॥

मध्विति । मधु प्रपीय मधु मद्यं प्रपीय पीत्वा तास्ताः स्त्रियः नता नम्रा अनता अनम्रास्च नाभवन् अपितु अभवन् । या याः पूर्वं नम्राः तास्ता मधुपाने कृते ऽनम्रा अभवन् । या या अनम्रास्तास्ता मधुपाने कृते नम्रा अभवन् । मारमाकुले मारः कन्दर्पस्तस्य मा लक्ष्मीः

कन्दर्पशोभा तया आकुलेऽत्र जने हालया सुरया करणेन रमा श्रीः अरं शीघ्रमेव आर प्राप्तवती। सुरापानात् स्त्रीजने ऽन्यैव काचन शोभा अभूदिति तात्पर्य्यम्। प्रपीयेति। पीङ्पानेस्य रूपं पिवतेस्तु प्रपायेति भवितव्यम्। अभवन्निति भवते र्लङि आरेति अर्त्ते र्लिटि। मधु मद्ये मधु चौद्रे मधु पुष्परसे विदुः। यद्वा। पूर्वश्लोकोक्तास्ते कामिजनाः च पुनः मधु आसवं प्रपीय पीत्वा अतानतानतानताः अभवन् अतानं अक्षरशून्यं यत्तानं गानमूर्च्छनाविशेषः तस्य भावस्तत्ता तस्यां अनताः परायणाः सुरां पीत्वा गानोत्सुका अभवन्नित्यर्थः। अत्र वसन्ते। जने कामिजने अथवा अत्र जने अस्मिन् कामिजने हालया मदिरया आकुले मत्ते सति रमा शोभा मारं कामं अरं अत्यर्थं आर प्राप मदिरापानेन कामो विजृम्भित इत्यर्थः॥ ५६॥

भ्रमरै र्द्रागस्तानि प्रपीय च मधूनि सानुरागस्तानि।
दत्तनिरागस्तानि प्रापच्छयनञ्जनस्त्वरागस्तानि॥

भ्रमरैः द्राग् अस्तानि प्रपीय च मधूनि सानुरागः तानि।
दत्तनिरागस्तानि प्रापत् शयनं जनः त्वरागः तानि॥ ५७॥

भ्रमरैरिति। सानुरागः सस्नेहः। एवं त्वरागः त्वरया वेगेन गच्छतीति त्वरागः जनः कामुकलोको दत्तनिरागस्ता निरपराधता

यै स्तादृशानि विस्मारितापराधानि । भ्रमरैर्भृङ्गैश्चषकोपरिस्थितै र्द्राक् झटिति अस्तानि त्यक्तानि मधूनि मद्यानि प्रपीय पीत्वा शयनं पर्यङ्कश्च प्रापत् अशिश्रियन् । कीदृशं शयनम् ? तानि तानो विस्तारो वितानो वा अस्यास्तीति तानि ॥ ५७ ॥

ससमुद्रमहेलाभिस्फुरितगुणाभिस्ततः स्मरमहेलाभि।
श्रीः प्रवरमहेलाभिस्तथैव युवपंक्तिभिः परमहेलाभिः ॥

ससमुद्रमहेलाभिस्फुरितगुणाभिः ततः स्मरमहे अलाभि।
श्रीः प्रवरमहेलाभिः तथा एव युवपंक्तिभिः परमहेलाभिः ॥ ५८ ॥

ससेति । ततोानन्तरं ससमुद्रमहेलाभिस्फुरितगुणाभिः । ससमुद्रा ससागरा महती दीर्घा या इलाभूमिस्तस्यां अभिस्फुरिताः श्रुता गुणा यासां ताभिः। परमहेलाभिः परमा उत्कृष्टा हेला लीला यासां ताभिः प्रवर-महेलाभिः प्रचुरस्त्रीभिः स्मरमहे कन्दर्पोत्सवे श्रीः शोभा सुखं वा अला-भि प्राप्ता। तथैव तेन प्रकारेण युवपंक्तिभिः तरुणश्रेणिभिः श्रीः प्राप्ता । यद्वा । ताभिः करणेन सह वा युवपंक्तिभिः शोभा प्राप्ता । उभयत्रापि विशेषणम्। अलाभीति। डुलभष् प्राप्तावित्यस्य लुङि चिण् भावकर्मणो-रिति च्लेश्चिणिकृते लभेश्चेति नित्यं नुमिप्रसक्ते विभाषाचिण्णमुलोरिति नुमागमाभावे वृद्धौ रूपम्। महती इला महेला गोभूवाचस्त्विडा इलाः। महेला महिलापिचेति द्विरूपकोषः॥ ५८ ॥

तया र्द्रधीरमायया मुदामनारमायया।
नलो विहारमाययावधःकृता रमायया॥

तया आर्द्रधीः अमायया मुदां अनारमायया।
नलः विहारम् आययौ अधःकृता रमा यया॥ ५९ ॥

तयेति। आर्द्रधीः शृङ्गारस्निग्धबुद्धि र्नलो मुदां हर्षाणां अनारमायया आरमो विरतिस्तद्रहितः अनारमः अयः शुभावहोविधि र्यस्यास्तादृश्या हर्षाविरतभाग्ययेत्यर्थः। अमायया मायारहितया तया दमयन्त्या सहितो नलो विहारं क्रीडां आययौ आगमत्। यद्वा या दमयन्तीं मुदां हर्षाणां अनारमाय अविश्रामाय भवति। तया सह नलो विहारं आययौ। यया रमा लक्ष्मीरधःकृता रूपेण सौभाग्येन वा लक्ष्मीतोप्यधिका तादृश्या दमयन्त्या नलो विजहारेति भावः। आययाविति यातेर्लिटि॥ ५९ ॥

साशंकामायासीत्कृतिनी भैमी नलस्य कामायासीत्।
कामनिकामायासीद्युतिन्तदिष्टांस चाधिकामायासीत्॥

सा अशंका अमाया आसीत् कृतिनी भैमी नलस्य कामाय आसीत्।
कामनिकामायासी द्युतिं तदिष्टां सः च अधिकां आयासीत्॥ ६०

साशंकेति। सा भैमी अशंका शंकारहिता कृतिनी निपुणा पुण्यवती वा अमाया निर्व्याजा आसीत् अभूदित्यमनेन प्रकारेण नलस्य कामाय

अभिलाषाय आसीत् उज्जगाम। नलकामम् अपुपूरदित्यर्थः। कामनिकामायासी कामेन मन्मथेन निकामं अत्यर्थं आयासी आयासः परिश्रमो यस्य तादृक् स च नलस्य तदिष्टां दमयन्तीप्सितां अधिकां द्युतिं क्रीडां आयासीत् आगतः। दमयन्ती रतावसरे निर्व्याजाशंका नलस्याभिलाषाय बभूव नलस्य दमयन्तीमनोऽभिलषितं समपूरयदिति परस्पररसोत्कर्षो ऽभूदिति भावः। आसीदित्यस्तेरेकं लङि। अपरमपि असगताविव्यस्य लुङि। आयासीदिति यातेर्लुङि। यद्वा। भैमी कथम्भूता? साशङ्का सभया प्रौढराचित्वात् स्त्रीस्वभावत्वाच्च पुनः अमाया निःकपटा पुनः सीत्कृतिनी सीत्कारवती। यद्वा साशङ्का मायासीत्कृतिनीत्येकं विशेषणं आशंकासहिता या माया कापट्यं तया सीत्कृतिनी भयच्छलेन सीत्कारवती। यद्वा मायया छलेन सीत्कृतिनी नलस्य कामाय मनोरथसिद्धौ आसीत् बभूवेत्यर्थः॥ ६०॥

इतिनानामायानांनलःकलिभुवांबलेननानामायानां।
व्यसनानामायानान्निधिररमद्राज्यजन्मनामायानां॥

इति नानामायानां नलः कलिभुवां बलेन नानामायानां।
व्यसनानां आयानात् निधिः अरमत् राज्यजन्मनां आयानां॥ ६१॥

इतीति। इत्यनेन प्रकारेण नलो नैषधः नानामायानां नानाविधा मायाव्याजानि येषु तादृशानां कलिभुवां कलेः भवन्तीति कलिभुवः कलिजनितास्तेषां व्यसनानां विपदां आयानात् आगमनपर्यन्तं आगम-

नावधेः अरमत् अक्रीडत् कथम्भूतः ? बलेन करणेन राज्यजन्मनां राज्ये जनपदे जन्म येषां तादृशानां आयानां धनागमनानां निधि निधानमाधार इति यावत् अभवदिति पाठे। नानादम्भकलिजनितापत्त्यागमनावधि नलो राज्यश्रीभाजनम् अभूदिति भावः। अयः शुभावहो विधिः। अभवदिति भवतेर्लङि॥ ६१ ॥

स्वयंवरादनन्तरं मही मही महीनधीः।
ररक्षनैषधस्तदारराजरा जरा जराः ॥

स्वयंवरादनन्तरं मही महीं अहीनधीः।
ररक्ष नैषधः तदा रराज राजराजराः ॥ ६२ ॥

स्वयमिति। तदा तस्मिन् काले नैषधो नलः स्वयंवरात् अनन्तरं स्वयंवरात् परतः महीम्भुवं ररक्ष अपालयत्। कीदृशः ? मही सोत्सवः पुनः-अहीनधीः विशालबुद्धिः। राजराजराः। राजराजः कुवेरस्तस्येव राः धनं यस्य तादृशः सन् रराज शुशुभे। स्वयंवरोत्तरं भुवमरक्षत् नलः कुवेरप्रायसम्पच्चासीदिति भावः। राजराजो धनाधिपः। अर्थरैविभवा अपीत्यमरः। रराजेति राजतेर्लिटि॥ ६२ ॥

इति बोधिनीटीकासहिते श्रीकालिदासकृते नलोदये सत्काव्ये द्वितीयोच्छ्वासः।

॥ नलोदयः ॥

अथसुरवृषभाःस्वरतःप्रेक्ष्यकलिंप्रस्थितामहाद्भास्वरतः।
यःकृतिषुशुभास्वरतःपप्रच्छुस्तद्गतिङ्घननिभाःस्वरतः॥

अथ सुरवृषभाः स्वर् अतः प्रेक्ष्य कलिं प्रस्थिताः महात् भास्वरतः।
यः कृतिषु शुभासु अरतः पप्रच्छुः तद्गतिं घननिभाः स्वरतः ॥ १॥

अथेति। अथ स्वयंवरादनन्तरं अतोऽस्माद् भास्वरतो देदीप्यमानात् महात्स्वयंवरोत्सवात् स्वः स्वर्गं प्रस्थिताः प्रचलिताः सुरवृषभाः सुरोत्तमा इन्द्राद्याः कलिं प्रेक्ष्य तद्गतिं तस्य कलेः गतिं गमनं पप्रच्छुः। यः कलिः शुभासु कृतिषु कार्य्येषु अरतः न रतः विरक्त इति यावत्। कीदृशाः सुरोत्तमाः ? स्वरतः कण्ठध्वनेः घननिभा घनो मेघस्तत् सन्निभाः। कलिविशेषणं वा। दमयन्तीस्वयंवरात् स्वर्गं गच्छन्तो देवा पथिमध्ये कलिं दृष्ट्वा कुत्र गच्छसीति तद्गमनं पृष्टवन्त इति भावः। स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः। मह उद्धव उत्सव इत्यमरः। पप्रच्छुरिति प्रच्छधातोर्लिटि॥ १॥

यशसामायामितयाहृतःश्रियाभीमदुहितृमायामितया।
तदधिगमायामितयास्पृहयाद्यमनुष्यमायामितया ॥

यशसां आयामितया हृतः श्रिया भीमदुहितृमायां इतया।
तदधिगमाय अमितया स्पृहया अद्य मनुष्यं आयामि तया ॥ २ ॥

यशसामिति। देवै र्गमनं पृष्टः कलिराह। यशसां आयामितया कीर्त्तीनां दैर्घ्यवत्तया अतियशस्विन्या। इनन्तात् तल्। भीमदुहितृमायां भीमस्य राज्ञो दुहिता पुत्री दमयन्ती तन्मायां तद्व्याजं इतया तया श्रिया लक्ष्म्या हृतः गतया आहृतचित्तः तदधिगमाय दमयन्तीरूपलक्ष्मीलब्धेय ऽमितया ऽसंख्यया बहुतरया स्पृहया इच्छया अद्य अस्मिन् वर्त्तमानदिने मनुष्यलोकमायामि गच्छामि। आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियान्त्वमी। आहुर्दुहितरं सर्व्वे इत्यमरः। आयामीति यातेर्लटि ॥ २ ॥

इतिविकलोमायायास्तदुक्तऊचजनोऽमलोमायायाः।
शुभशीलोमायायाःस्थितोनलोऽस्यावरोऽनुलोमायायाः॥

इति विकलः मायायाः तदुक्तः ऊचे जनः अमलः मा यायाः।
शुभशीलः अमायायाः स्थितः नलः अस्याः वरः अनुलोमायायाः॥ ३ ॥

इतीति। इत्यनेन प्रकारेण तदुक्तस्तेन कलिनोक्तो भाषितः अमलो

निर्मलः भ्रमरो वा रलयोरैक्यात् जनो देवलोक ऊचे ऽकथयत् किं अकथयत्? इत्याह अमायाय निर्व्याजाया: अस्याः दमयन्त्याः शुभशील: उत्तमस्वभावो नलः वरः स्थितः वरः प्रसिद्धः। कीदृश्याः? विकलो-मायायाः विकलो दीनः उमायाः पार्वत्या अयः शुभावहो विधि र्यया तादृश्याः पार्व्वत्युत्तमभाग्यायाः। कीदृश्याः? अनुलोमायायाः अनुलोमः अनुकूल अयः शुभादृष्टं यस्याः तस्याः। मा यायाः मा गच्छ। दमयन्त्या नलो वृतस्त्वं मागच्छेति भावः। यद्वा मायाया दम्भतः बुद्धितो वा विकलः सन् त्वं मागच्छेत्यर्थः। यद्वा देवलोकविशेषणम्। मायाशाम्बरीकृपा दम्भो बुद्धिश्चेति हेमः॥ ३ ॥

वचइतिवस्वादिभ्यःश्रुत्वाकलिरुत्सवासवस्वादिभ्यः।
मखसर्व्वस्वादिभ्यस्चुकोपदोषात्समदभुवःस्वादिभ्यः॥॰

वचः इति वस्वादिभ्यः श्रुत्वा कलिः उत्सवासवस्वादिभ्यः।
मखसर्व्वस्वादिभ्यः चुकोप दोषात् सः मदभुवः स्वात् इभ्यः॥ ४ ॥

वचइति। स कलिरुत्सवासवस्वादिभ्यः उत्सवलक्षणो य आसवो मधु तत्स्वादिभ्यः पीतवद्भ्यः। मखसर्व्वस्वादिभ्यः। मखस्य यज्ञस्य सर्व्वस्वं यज्ञधनं सोममत्तुं शीलं येषां ते तादृगभ्यो वस्वादिभ्य इन्द्रादिदेवेभ्यः इत्युक्तप्रकारं वचः वचनं श्रुत्वा मदभुवः मदात् दर्पात् भवतीति मदभूः तस्मादिति दोषविशेषणं स्वात् स्वकीयाद् दोषाद् दूषणाच् चुकोप

कुद्धो ऽभूत् कलिः कथम्भूतः ? इभ्यः आढ्यः। मध्वासवो माधवकः। सप्ततन्तुर्मखः क्रतुः। कुप कोपे अस्मात्लिटि। स्वं ज्ञातावात्मनि स्वन्त्रिष्वात्मीये स्वोस्त्रीयां धने। इभ्य आढ्यो धनी स्वामीत्यमरः ॥ ४ ॥

प्रबलतमानबलतयासंयोज्यनलेसुरोत्तमानवलतया।
तेनामानवलतयातरुणेवतयास्यतांनमानवलतया ॥

प्रबलतमान् अबलतया संयोज्य नले सुरोत्तमान् अवलत या।
तेन अमा नवलतया तरुणा इव तया आस्यतां न मानवलतया ॥ ५ ॥

प्रबलेति। या दमयन्ती सुरोत्तमान् देवश्रेष्ठान् प्रबलतमान् उत्कृष्टबलान् अबलतया अबलत्वेन संयोज्य विगणय्य मानवलतया अहंकारसामर्थ्येन नलेऽवलत नले ऽन्वरज्यत। यद्वा तया किम्भूतया ? मानवलतया मनुष्यरतया रलयोरैक्यात् तया दमयन्त्या तेन नलेन अमा सह न आस्यतां न स्थीयताम्। कया केनेव ? नवलतया नवीनव्रतत्या तरुणेव वृक्षेणेव। या दमयन्ती देवान् असमर्थान् ज्ञात्वा नलं अवरिष्ट सा नलेन सह वियुज्यतामिति शशापेति भावः। यद्वा प्रबलतमान् देवान् संयोज्य स्वयंवरमानाय्याबलतया स्त्रीत्वेन नले या अनुरक्तेत्यर्थः। अबलाया भावो ऽबलता। त्वतलोर्गुणवचनस्येति पुंवद्भावः। यथा लता सुरवृक्षान् अबलतया असारत्वेन संयोज्य नले तुच्छतृणे वल्यते पश्चात्तेन सह तया

क्षणमपि न स्थीयते तथेत्यर्थः। लतया कथम्भूतया ? मानबलतया माने विस्तारे बलता अतिशयो यस्यास्तयेतिभावः। अमा सह समीपे च। आस्यतामित्यास उपवेशन इत्यस्य भावे लोटि॥ ५॥

इति बलवानन्तरतः कलिः किलैतज्जगादवानन्तरतः
अवहितवानन्तरतःसमृद्धिषु नलस्यविविशिवानन्तरतः

इति बलवान् अन्तरतः कलिः किल एतत् जगाद वानं तरतः।
अवहितवान् अन्तर् अतः समृद्धिषु नलस्य विविशिवान् अन्तरतः॥ ६

इतीति। इत्यनेन प्रकारेण बलवान् कलिरेतत् पूर्वोक्तं शापवचनं जगाद। किल निश्चये। अतः अनन्तरं अन्तरतः छिद्रतः छिद्रं अवकाशं वा प्राप्य ल्यब्लोपे पञ्चमी। यद्वा अन्तरतः अन्तर्द्धानात् समृद्धिषु सम्पत्सु सत्सु। तद्वृद्धिष्विति पाठे पूर्वोक्तशापवचनवृद्धिषु इत्यर्थः। अवहितवान् सावधानः। वानं वनसमूहं तरतो गच्छतो नलस्यान्तः हृदयं विविशिवान् प्रविवेश। यद्वा अन्तरतद्वृद्धिषु इति पाठे अवकाशशापदुःखबाञ्छेषु अवहितवान् सावधानः। यद्वान्तरं विनाशं तनोतीति अन्तरतत् तादृशा वृद्धयः नलस्य ऋद्धयो धनागमास्तेषु। यद्वा अन्तरतद्वृद्धिषु अन्तरच्छिद्रे तद्वृद्धिषु छिद्रबाञ्छेषु सावधानः। अथवान्तरतद्वृद्धिषु अन्तरे मध्ये तद्वृद्धिषु तस्य नलस्य वृद्धिषु धनागमेषु अव-

हितवान् यथा वृद्धि र्न भवतीति । पुनरन्नरतः नाशरतः । एवं पूर्वोक्तं शापवचनं कलिरुक्तवान् । प्रवेशच्छिद्रान्वेषणसावधानस्य मृगयां गतस्य नलस्य हृदयमध्यास्तेति भावः । अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्येषु । छिद्रात्मीयविनावहिरवसरमध्येन्तरात्मनि च । अंतो ऽध्यवसितौ मृत्यौ स्वरूपे निश्चयेंतिके । वानमिति तस्य समूह इत्यण् । विशप्रवेशन इत्यस्माल्लिटि क्वसौ कृते विभाषागमहनविदविशामिति वसोरिड्विकल्पः ॥ ६ ॥

सोऽथ सदारोदरतः पुष्करविजितोनलः सदारोदरतः ।
व्याजाद्दारोदरतः स्वपुरान्नियातवानुदारोदरतः ॥

सः अथ सदा रोदरतः पुष्करविजितः नलः सदारः दरतः ।
व्याजात् दारोदरतः स्वपुरात् निर्यातवान् उदारोदरतः ॥ ७ ॥

सोऽथेति । अथ कलिप्रवेशानन्तरं दारोदरतः द्यूतसम्बन्धिनो व्याजात् कपटात् पुष्करेण भ्रात्रा विजितः पराजितः स नलः दरतः भयात् पीडया वा उदारोदरतः उदारं विशालम् उदरं मध्यं यस्य तादृशात् स्वरात् स्वगृहात् नगराद्वा सदारः दारा दमयन्ती तया सहितो निर्यातवान् निरगमत् । यद्वा राज्यभ्रंसानन्तरं कलिसंक्रमणात् नलस्य जलोदरं जातमिति पुराणवार्त्ता वृहदुदरहेतोरित्यर्थः । कीदृशः ? सदा सर्वदा रोदे अश्रुचरणे रतोऽनुरक्तः रुदन्निति यावत् । दरोदरदुरोदरे

इति वैजयन्ती । तस्येदमित्यण् पञ्चम्यास्तसिल् । अगारे नगरे पुरः । दरोस्त्रियाभयेश्वभ्रे । उदारो दातृमहतोरित्यमरः ॥ ७ ॥

असमानानाहारिःस्मैनं शब्दांश्च किममुनानाहारि ।
अपितेनानाहारि भ्रान्तम्भूषणमपास्य नानाहारि ॥

असमानान् आह अरिः स्म एनं शब्दान् च किं अमुना न अहारि ।
अपि तेन अनाहारि भ्रान्तं भूषणं अपास्य नानाहारि ॥ ८ ॥

असेति । अरिः शत्रुः पुष्करो रिपुरेव वा एनं नलं असमानान् अनुचितांश्च शब्दान् वाणीराह स्म भर्त्सनवचनानि अश्रुश्रुवदित्यर्थः । अमुना नलेन किं वस्तु नाहारि न हारितम् । यद्वा अमुना पुष्करेण अस्य नलस्य सम्बन्धि किं वस्तु न अहारि अपि तु सर्वमेव हृतमित्यर्थः । तेन नलेन हारि मनोज्ञं नाना बहुविधं भूषणं अलङ्कारं हारकुण्डलकेयूरादिकं अपास्य त्यक्त्वा अनाहारि आहारस्याभावो ऽनाहारः सोस्यास्तीत्यस्मिन्निति तादृशमाहाररहितं यथा स्यादेवं भ्रान्तं वनेषु भ्रमितं । द्यूते पुष्करविजितो नलो भूषणं अपास्य वने बभ्रामेति भावः । अहारीति हृञोलुङि चिणि ॥ ८ ॥

शुचमकरोदन्यस्य भ्रमन्नलः पथिपदं सरोदन्यस्य ।
नच पुनरोदन्यस्यं त्राणायाभूत परम्परोदन्यस्य ॥

शुचम् अकरोत् अन्यस्य भ्रमन् नलः पथि पदं सरोदं न्यस्य ।
न च पुनः औदन्यस्य त्राणाय अभूत् परं परोदन्यस्य ॥ ९ ॥

शुचमिति। पथि मार्गे सरोदं रोदनं रोदस्तेन सहितं साश्रुः यद्वा स नलः रुदन् रोदनं कुर्वन् पदं चरणं विन्यस्य क्षिप्त्वा भ्रमन् अटन् अन्यस्य प्रेक्षकस्य पुष्करस्य वा शुचं शोकमकरोत् अकार्षीत्। पुनः अस्य नलस्य परोदन्यस्य परा उदन्या पिपासा यस्य तादृशस्य ओदन्यस्य ओदनार्हस्य परमन्यदन्नजलादिना त्राणाय रक्षणाय नाभूत् नाभवत्। नलः कण्टकवति मार्गे कोमलचरणतया रुदन् परिभ्रमन् सर्वेषां शोकं अकरोत्। क्षुत्तृषितस्यास्य रक्षणाय कोपि नाभूत् निराहार एवासीदित्यर्थः। मन्युशोकौ तु शुक् स्त्रियां। पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु। उदन्येति तदर्हतीति यः। अशनाया बुभुक्षा क्षुद्ग्रासस्तु कवलार्थकः। उदन्या तु पिपासा तृट् इत्यमरः। अभूदिति भुवोलुङि ॥ ९ ॥

नास्य रमानावासस्तच्च खगाजह्रुरर्थ्यमानावासः।
अपिमदमानावासस्वरोषजलधिन्तरन्क्षमानावासः॥

न अस्य रमा न आवासः तत् च खगाः जह्रुः अर्थ्यमानाः वासः।
अपि मदमानौ आस स्वरोषजलधिं तरन् क्षमानावा सः॥ १०॥

नास्येति। अस्य नलस्य न रमा लक्ष्मी नं आवासो गृहं आच्छादनं वा आसीदित्यध्याहारः। तच्चावासः तस्य वस्त्रं अर्थ्यमाना क्रीडार्थं आहरेति दमयन्त्या याच्यमानाः खगाः कलिमायाविर्भूता हंसा जह्रुः दमयन्ती परिहितवस्त्रैकदेशं परिधाय हंसजिघृक्षया स्ववस्त्रं तदुपरि क्षिप्तं

तद्वस्त्रं गृहीत्वा हंसा ययुः इति पुराणवार्त्ता । स नलः क्षमानावा शान्तिनौकया स्वरोषजलधिं स्वक्रोधसमुद्रं तरन् उल्लंघयन् मदं गर्वं मानमभिमानं च आस चिक्षेप । लक्ष्मीः स्थलं वास्य नासीत् कुत्रापि न स्थितवानित्यर्थः । पथि च तद्वासो गृहीत्वा पक्षिणो गताः असौ च गर्वाभिमानावत्याक्षीत् । आसेत्यसुक्षेपण इत्यस्य लिटि ॥ १० ॥

तापशतेनवसानौद्रवेदितीमौनगावृतेनवसानौ ।
चेलान्तेनवसानौ चेरतुरेकेन पर्वतेनवसानौ ॥

तापशतेन वसा नौ द्रवेत् इति इमौ नगावृते अनवसानौ ।
चेलान्तेन वसानौ चेरतुः एकेन पर्वते नवसानौ ॥ ११ ॥

तापेति । इमौ दमयन्तीनलौ तापशतेन तापाधिक्येन नौ आवयो र्वसामेदो द्रवेत् शोष्यतीति हेतोरेकेन चेलान्तेन वसनखण्डेन वसानौ छादयन्तौ अनवसानौ न अवसानं मृत्युं ययोस्तादृशौ नवसानौ नवं नूतनं सानु शृङ्गं यस्य तादृशे पर्वते नगै र्वृक्षैरावृते युते चेरतुः चलितवन्तौ । अतिघर्म्मे एकेन पटांतेनाच्छादयन्तौ इमौ मरणरहितौ पर्वते चलिताविति भावः । नगावृते इत्यत्र सुखादृते इति पाठे सुखं विनापि अविनाशिनौ इत्यर्थः । इन्मेदस्तु वपा वसा । युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वानावातिनौ इत्यादेशः । द्रवेदिति द्रुगतावित्यस्य लिङि । शैलवृक्षौ नगावगौ । स्नुः प्रस्थः सानुरस्त्रियामित्यमरः । चेरतुरिति चरतेर्लिटि ॥ १० ॥

तद्वासःस्वापायान्नीतिरियंचेति विपदिसस्वापायां ।
निजवासःस्वापायान्निकृत्यताममुञ्चदिहसस्वापायां॥

तद्वास: स्वापायां नीति: इयं च इति विपदि सस्वापायां ।
निजवास: स्वापायात् निकृत्य तां अमुञ्चत् इह स: स्वापायां ॥ १२ ॥

तद्वासइति । स नल: कलिच्छन्नबुद्धित्वात् विपदि विपत्तौ इयमेव नीति: इति मत्वा तां दमयन्तीम् स्वापायां स्वापं आयातीति स्वापाया तादृशीं सुप्तां । सस्वापायां स्वस्यापायो विश्लेष: तत्सहितां पुन: स्वापायां स्वस्मात् अपगत: शुभावहोविधि र्यस्या: तां दूरदृष्टामित्यर्थ: । तां दमयन्तीमिह वने निजवासस्वापायात् निजं स्वकीयं यद्वास: स्वञ्च धनं तदपायात् तदपगमात् तद्वास: तस्या दमयन्त्या वासो वस्त्रं निकृत्य अच्छिद्य अमुञ्चत् अत्याक्षीत् । यद्वा विपदि किम्भूतायां ? स्वापायां स्वेन आत्मना आप्यते प्राप्यते स्वापा तस्यां सत्यां सस्वापायां स्वापयुक्तायां दमयन्त्यां सत्यां इत्यर्थ: । नलो वने प्रसुप्तां दमयन्तीं वसनार्द्धं छित्वा ऽमुञ्चदिति भाव: । अमुचदिति पाठे लुङित्त्वादङ् ॥ १२ ॥

बभ्रामानस्तेन श्रमेण कलिना विधूयमानस्तेन ।
सहिरिपुमानस्तेनःस्वभाग्यदोषाःक्वसमहिमानस्तेन॥

बभ्राम अनस्तेन श्रमेण कलिना विधूयमान: ते न ।
स: हि रिपुमानस्तेन: स्वभाग्यदोषा: क्व समहिमान: तेन ॥ १३ ॥

बभ्रामेति। रिपुमानस्तेनः शत्रुगर्वापहारी स नलः श्रमेण प्रयासेनानस्तेन नास्तं गतेन सता अत्यन्तपरिश्रमेण दुःखात् तेन कलिना विधूयमानः कम्पितः सन्। अथवा कलिना अनस्तेनामुक्तेन श्रमेण यस्य श्रमस्य दुःखस्य कलिः प्रयोक्ता तेन परिश्रमेण दह्यमानः सन् बभ्राम पर्यटितवान्। हि यस्मात् कारणात् ते स्वभाग्यदोषाः स्वपूर्वार्जितदुःकृतादिकर्म्मदोषाः क कस्मिन् समहिमानः समहत्वाः न अपि तु सर्वत्रैव पूर्वकर्म्मप्रधानम्। यतोऽयमीदृगवनीशोप्येकाकी गतराज्यभारो वने पर्यभ्रमीत्॥ १३ ॥

मृगकुलमारसदाविश्रममभितापातुरोममारसदाविः।
स्फुरिततमारसदाविस्तृतानगायत्रविपिनमारसदावि॥

मृगकुलं आरसत् आविश्रमं अभितापातुरः ममार सदा विः।
स्फुरिततमा रसदा विस्तृता नगाः यत्र विपिनं आर सदावि॥ १४ ॥

मृगेति। स नलो दाविदावो वनवह्निस्तत् संयुक्तं प्रज्वलद्दावं विपिनं वनमार जगाम। यत्र यस्मिन् विपिने मृगकुलं मृगगणं आविश्रमं आसमन्ततः अविश्रमं विश्रान्तिरहितं आविर्भूतश्रमं वा यथा स्यादेवं आरसत् आर्त्तिशब्दं कुर्वत् जलाभावात् तृषाकुलं ममार। विः पक्षी अभितापातुरो ऽभिसमन्ततो यस्तापः सन्तापः तेन आतुरः क्लान्तः सदा

सर्वदा ममार मृतवान् । सदावीति निर्विसर्गपाठे विपिनं किम्भूतं ? अवि न विद्यन्ते वयः पक्षिणो यत्र तादृशं अभितापातुर इति नल-विशेषणं इत्यर्थः । विस्तृतां विस्तीर्णशाखाः रसदाः रसो भयानकरसः तं ददातीति तादृशाः निर्य्यासदाः वा । स्फुरिततमां प्रकाशिततमा नगा वृक्षाः । स्फुटिततमा इति पाठे विदीर्णाः विस्तृताः भूमौ आस्तीर्णाः रसदाः निर्य्यासदाः दवाग्निना दह्यमानत्वात् सशब्दा वा नलो दवानलाकुलं वनं गतवान् । यत्र भयप्रदविस्तीर्णशाखाः वृक्षाः यस्मिन् अतिगहनतरुदर्श-नेन भयं भवतीति यावत् । यत्र चला अलसा मृगा इतस्ततो धावन्तः कृताक्रन्दाः सन्तो मृताः पक्षिणश्च मृताः । तादृशं विपिनं मरुदेशं गतवानिति भावः ॥ १४ ॥

शोकभरोदस्तेन श्रुतः सच नलाद्रवेतिरोदस्तेन ।
द्रुतिमकरोदस्तेन स्वयमित्यूचे भयं पुरोदस्तेन ॥

शोकभरोदस्तेन श्रुतः सः च नल आद्रव इति रोदः तेन ।
द्रुतिं अकरोत् अस्तेन स्वयं इति ऊचे भयं पुरः अदः ते न ॥ १५ ॥

शोकेति । तेन नलेन शोकभरोदस्तेन शोकातिशयेन उदस्तेन व्याकुलेन उत् ऊर्द्ध्वं अस्तेन क्षिप्तेन शरीरादुद्भ्रान्तजीवेन । हे नल आद्रवागच्छेति रोदः रोदनं श्रुतः आकर्णितः तेन कारणेन स च नलः द्रुतिं वेगं अकरोत् । च पुनः हे अस्तेन अस्तः इनोप्रभु र्यस्य अनाथ

अदः इदं ते तव भयं न इति पुरोऽग्रे स्वयं ऊचे उक्तवान् । स्वकमिति पाठे स्वकं स्वकीयं आत्मसम्बन्धिभयं तव नास्तीत्यर्थः । शोकभरविक्षिप्तचेतसा नलेन नलागच्छेति कर्कोटकनागरोदनं श्रुतं स वेगेन तत्र गत्वा ते इदं भयं न भविष्यतीत्यवोचदिति भावः । अस्तेन इति सविसर्गपाठे अस्तेनः अस्तः कान्त्या तिरस्कृत इनः सूर्यो येनेति नलविशेषणम् । द्रुगताविद्यस्य लोटि मध्यमे । ऊचे ब्रुवोलिटि । स्वात् पुरः पुरतोऽग्रतः । भीतिर्भीः साध्वसं भयमित्यमरः ॥ १५ ॥

क्व भवान् शंसत्वस्यत्वापदमित्याश्रयोनृशंसत्वस्य ।
तन्देशंसत्वस्य प्राप नलः सत्वरोभृशंसत्वस्य ॥

क्व भवान् शंसतु अस्यतु आपदं इति आश्रयः अनृशंसत्वस्य ।
तं देशं सत्वस्य प्राप नलः सत्वरः भृशं सः तु अस्य ॥ १६ ॥

क्वेति । स तु नलो भृशमत्यर्थं सत्वरः त्वरायुक्तः सन् अस्य सत्वस्य प्राणिन स्तं देशं प्राप गतवान् भवान् क्वास्तीति शंसतु आपदम् अस्यतु त्यजतु इति निगद्येति यावत् । कीदृशो नलः ? अनृशंसत्वस्य अक्रौर्यस्य कारुणिकत्वस्याश्रयो निवासः । रोदनश्रवणानन्तरं नलो गत्वा भवान् क्वास्ति कथयतु आपदं विपत्तिं जहातु इति निगद्य दवाग्निं अविशदिति भावः । शंसतु शंसुस्तुताविद्यस्यानेकार्थत्वाद्वदनमात्रार्थः

अस्यिति असु क्षेपणे इत्यस्य लोटि। विपत्त्यां विपदापदौ । नृशंसो घातुकः क्रूरः। प्रापेत्यापेर्लिटि। सत्वमस्त्रीतु-जन्तुषु इत्यमरः ॥ १६ ॥

अथपवनाशमयन्तंक्वापिदवाग्नौददर्शनाशमयन्तं।
स्वबलेनाशमयन्तंरुजमजिघृक्षच्चपुनरनाशमयन्तं॥

अथ पवनाशं अयं तं क्वापि दवाग्नौ ददर्श नाशं अयन्तं।
स्वबलेन अशमयन्तं रुजं अजिघृक्षत् च पुनः अनाशं अयन्तं॥ १७॥

अथेति । अथ समीपगमनानन्तरं अयं नलः तं पवनाशं पवनं वातं अश्नातीति पवनाशः तादृशं तं सर्प्पं कर्कोटकं क्वापि दवाग्नौ कस्मिन्नपि दवदहने अयन्तं गच्छन्तम् इतस्ततः विनाशं मृतिमयन्तं गच्छन्तं निनश्यन्तं ददर्श अद्राक्षीत्। कीदृशं ? स्वबलेन स्वप्रभावेण रुजं पीडां अशमयन्तं अपरिहरन्तम्। पुनः अनाशं आशा जीविताशा तद्रहितम्। अनाशं न मृतं मुमूर्षुं वा। अजिघृक्षच्च पुनः ग्रहीतुमैच्छत्। नलो दवदहनदह्यमानं कर्कोटकं अपश्यद् ग्रहीतुं चैषीत्। जिह्मगः पवनाशनः। ग्रह उपादाने ऽस्य सनिग्रहगुहोश्चेतीट निषेधाद्द्वित्वे कृते लुङि-रूपम्॥ १७ ॥

सचधृतनागस्तेन स्वविषेणविरूपितोमनागस्तेन।
सहितोनागस्तेन प्रोक्तश्चात्मास्तु वेदनागस्तेन॥

सः च धृतनागः तेन स्वविषेण विरूपितः मनाक् अस्तेन।
सहितः अनागस्तेन प्रोक्तः च आत्मा अस्तु वेदनागः ते न॥ १८ ॥

सचेति। स च नलः धृतनागो धृतसर्पः मनागस्तेन मनाक् ईषत् अस्तेन क्षिप्तेन तेन कर्कोटकेन स्वविषेण विरूपितः विरूपो ऽसुन्दरः कुब्जः कृतः अनागस्तेन आगस्तनोतीत्यागस्तो न आगस्तो अनागस्तः तादृशेन निरपराधिना। नलः किम्भूतः ? सहितः हितं प्राणरक्षणलक्षणं तेन सहितः कृतात्मरक्ष उक्तश्च किमित्याह। हे नल ते आत्मा वेदनागः पीडाभाक् न अस्तु न भवतु। तव मत्प्रसादात् विषवेदना माभूत्। यद्वा यतः सनागः हितः तेन हेतुना उक्त इत्यर्थः नलः सर्पमुत्क्षिपन् तेन दष्टो विरूपो ऽभवत्तेनैव च तव विषपीडा न भविष्यतीत्यभिहितश्चेति भावः। अत्र कथोपकथनं भारतेऽनुसन्धेयम्। यथा कर्कोटकनामा नागोऽहं नारदशापाच्चलितुमशक्तः पश्चात् स मुनिरेवमाह यदा नलो राजा त्वामितो नेष्यति तावत् त्वमचलो भूत्वा ऽत्र तिष्ठ। अतस्त्वं मामितो नयस्व अहं तवोपकारोपायमपि उपदेक्ष्यामि इत्युक्त्वा अङ्गुष्ठप्रमाणो ऽभूत्। नलस्तं वनाग्नेरन्यत्र निनाय ततस्त्यक्तुकामं नलं पुनरुवाच पदानि गणयन् गच्छ ततः श्रेयः करिष्यामि। ततो नलेन एकादिक्रमेण गणयित्वा दशेत्युक्ते आज्ञाकुलेन नागस्तम् अदंशयत्। ततो नलो विरूपो बभूव। नागस्त्वाह जनास्त्वां न जानन्त्विति रूपमन्तर्द्धापितं यत्तते त्वं दुःखी जातः स कलि र्मम विषेणान्तर्दग्धस्त्वां त्यक्ष्यति। अयोध्यां गच्छ बाहुकनामा सारथिरहमिति ब्रुवन् ऋतुपर्णनृपसमीपे स्थीयतां। स तेऽक्षविजयविद्यां दत्वा ऽश्वविद्यां नेष्यति ततस्तव कल्याणं भविष्यति। मत्स्मरणार्थं वासोयुगं गृहाण यदा इदं वासः परिधास्यसि तदा

निजरूपं प्राप्स्यसि इत्युक्त्वा नागो गत इति महाभारतवार्त्ता। नुन्ननुत्ता-स्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः। किञ्चिदीषन्मनागल्पे। यातना तीव्रवेदना। पीडा बाधा व्यथा दुःखम्। अनागस्तेनेति तनोतेरन्येभ्योऽपि दृश्यत इति ड प्रत्ययेरूपम्। अस्तु अस्ते लोटि ॥ १८ ॥

स्यात्तरसाकल्यन्ते वपुरमुनात्तेन वाससाकल्यन्ते।
ये यशसाकल्यन्ते गुणोदयैर्दधति भूतिसाकल्यन्ते ॥

स्यात् तरसा कल्यं ते वपुः अमुना आत्तेन वाससा कल्यन्ते।
ये यशसा कल्यन्ते गुणोदयैः दधति भूतिसाकल्यं ते ॥ १९ ॥

स्यादिति। कर्कोटको नलमाह हे नल अमुना आत्तेन गृहीतेन वाससा वस्त्रयुगलेन ते तव वपुः शरीरं कल्यन्ते कलिपीडापगमे तरसा वेगेन कल्यं निरामयं स्याद् भविष्यति। ये जनाः यशसा कीर्त्त्या कल्यन्ते श्रीयन्ते ते गुणोदयैः गुणानामुदयैरधिगमैः भूतिः सम्पत्तिः तत्साकल्यं पूर्णत्वं दधति धारयन्ति। ये यशस्विनस्ते गुणोदयवशात्सल्म्या श्रीयन्त एवेति अतः खेदं माकुर्विति भावः। आत्तेनेत्यत्र अन्तेनेति पाठे अध्यवसितेन ईप्सितेनेति यावत् यशसा इत्यस्य विशेषणं। यद्वा निश्चयेन कल्यं स्यादित्यर्थः। यद्वा हे अन्तेनेति सम्बोधनं अन्ते अन्तकाले इनप्रभो हे इत्यर्थः। वार्त्तो निरामयः कल्यः। अन्तो-

व्यवसिते मृत्यौ स्वरूपे निश्चये ऽन्तिके। कलमदेऽस्यानेकार्थत्वाच्छ्रयण-मर्थः। तस्मात् कर्म्मणि ल्टिरूपम्। समग्रं सकलं पूर्णम्॥ १९॥

अपि च विनामानेन अयणीयः सत्तुपर्णनामानेनः।
स्वांगेनामानेन स्युर्विपदोनहि नृणां क्व नामानेन॥

अपि च विना मानेन अयणीयः सः ऋतुपर्णनामा अनेनः।
स्वांगेन अमा अनेनं स्युः विपदः न हि नृणां क्व नाम अनेन॥ २०॥

अपीति। स एवाह हे अनेनः निष्पापनल हे इनप्रभो मानेनाभि-मानेन विनापि च ऋतुपर्णनामा ऋतुपर्णाख्यो ऽनेन स्वांगेन स्वशरी-रेण अमा सह अयणीयो न अपि तु अयणीय एव। तत्र मानं न कार्य्यमिति भावः। यद्वा ऋतुपर्णनामा इनः प्रभुः न अयणीय इति नेत्यर्थः। हि यतः देहिनां प्राणिनां क्व नाम कुत्र नाम विपदो न विपत्तयो न? अपि तु प्राणिनो विपदा परिभूयन्त एव। अनेनेति निर्विसर्गपाठेन विद्यते इनः यस्य यस्माद्वा स अनेनः चक्रवर्त्तित्वात् तस्य सम्बोधनं हे अनेन तथा च सार्वभौमत्वभानं न कार्य्यमिति भावः। त्वया ऽनेन कुब्जशरीरेण समयप्रतीत्तया ऋतुपर्ण आश्रयणीयः प्राणिनां विपद्भवत्येवेति समाश्वासयदिति भावः। कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम्। नामप्रकाश्यसम्भाव्यक्रोधोपक्रमकुत्सने। गर्हासमुच्चय प्रश्नशंकासम्भावनास्वपि॥ २०॥

व्रजसुखमायाह्नीनश्रीरित्यन्तर्हितः शमायाह्नीनः ।
स्निग्धोमायाह्नीनःस्याज्जनतायाःक्व नोत्तमायाह्नीनः॥

व्रज सुखं आयाहि इनश्रीः इति अन्तर्हितः शमाय अह्नीनः ।
स्निग्धः मायाह्नीनः स्यात् जनतायाः क्व न उत्तमायाः हि इनः ॥२१

व्रजेति । हे नल कथम्भूतः इनश्रीः ? इनस्य सूर्य्यस्य श्रीरिव श्रीर्यस्य सूर्य्यकान्तिः अथ वा इनश्रीरिति सर्पविशेषणं युक्तञ्चैतत् नलस्य विषेण तदानीं विरूपत्वात् व्रज गच्छ उद्दिष्टमृतुपर्णसमीपमिति यावत् । किमर्थं ? शमाय शान्त्यै सुखं आयाहि आप्नुहीत्युक्त्वाऽह्नीनः सर्पराजो ऽन्तर्हितः । एनमेवार्थमुपोद्घातयति । हि यत उत्तमाया जनताया उत्कृष्टस्य जनसमूहस्य मायाहीनो निर्द्दम्भः इनः समर्थः स्निग्धो मित्रं क्व कुत्र न स्यात् ? अपि तु सर्वत्रैव स्यात् । कर्कोटको नलं व्रज सुखञ्च लभस्व इत्युक्त्वा अन्तर्द्दधे सज्जनस्य सुहृन्मिलत्येवेति भावः । स्निग्धो वयस्यः सवयाः । इनः पत्यौनृपार्कयोरिति मेदिनी । स्यादस्ते र्विधिलिङि । जनतेति ग्रामजनबन्धुसहायेभ्यस्तल् ॥ २१ ॥

प्रीतिवशादनवनतःकृत्वातद्वसनमात्मसादनवनतः।
वज्रमांसादनवनतःसोऽस्मादृतुपर्णमाससादनवनतः ॥

प्रीतिवशात् अनवनतः कृत्वा तद्वसनं आत्मसात् अनवनतः ।
वज्रमांसादनवनतः सः अस्मात् ऋतुपर्णं आससाद न वनतः ॥ २२ ॥

प्रीतीति । अर्थात् स नलः प्रीतिवशात् अनवनतः न नवनं स्तुतिः अनवनं तस्मात् पञ्चम्यास्तसिल् तथा च प्रीतिवशादेव तद्वस्त्रं गृहीतं न तु स्तवं कृत्वेत्यर्थः । तद्वसनं वस्त्रं आत्मसात् कृत्वा गृहीत्वा अस्माद् वनतः अरण्यात् ऋतुपर्णं नामससाद ? अपि तु आससादैव काक्वर्थे नञ् । किम्भूतात् ? न अवनं रक्षणं यस्मिन् तस्माद् रक्षाहीनाद् वह्नमांसादनवनतः बहुतरा ये मांसादना व्यालाः सिंहशार्दूलराक्षसास्तेषां वनतः वन्यते सम्भक्ष्यते ऽस्मिन्निति वनं तादृशाद् बहुक्रव्याद् सम्भक्षात् समूहात् । वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् । तदधीनवचन इति सातिः । वनषणसम्भक्ताविव्यस्य वनत इति । आससादेति सदेर्लिटि ॥ २२ ॥

अकृतमुदायन्तारन्तममनुतसोऽध्वनोयदायन्तारं ।
ध्वनिसमुदायन्तारन्दधतोऽस्यहयाश्चतन्तदायन्तारं॥

अकृत मुदा यन्तारं तं अमनुत सः अध्वनः यदा अयं तारं ॥
ध्वनिसमुदायं तारं दधतः अस्य हयाः च तं तदा अयन्त अरं ॥ २३

अकृतेति । स ऋतुपर्णः तं नलं मुदा हर्षेण यंतारं सारथिं अकृत । सोऽयं नलो यदा ऽध्वनो मार्गस्य तारं तारणं अमनुत मेने अंगीकृतवान् तदा तस्मिन् काले तारमत्युच्चं ध्वनिसमुदायं ह्रेषासमूहं दधतः कुर्वन्तो ऽस्य ऋतुपर्णस्य हया अश्वा अरं अतिशीघ्रमायन्त आजग्मुः । यदा ऋतुपर्णात् लब्धसारथ्यो नलो मार्गे त्वां यथेष्टं तारं यामीत्यङ्गीकृतवान्

तदा ह्रेषमाणा ऋतुपर्णवाजिनो ऽतिशीघ्रं चेलुरित्यर्थः। नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः। तारो ऽत्युच्चैस्त्रयस्त्रिषु इत्यमरः। अय गतावित्यस्यात्मने पदिन आयन्त ॥ २३ ॥

अथ सहसादमयन्त्या सादमयन्त्यात्मशर्म निद्रामुमुचे
जीवितसादमयन्त्यासादमयन्त्यागमकृत सचयदातस्याः

अथ सहसा दमयन्त्या सा दमयन्त्या आत्मशर्म निद्रा मुमुचे।
जीवितसादं अयन्त्या सादमयं त्यागं अकृत सः च यदा तस्याः ॥ २४

अथेति। अथ नलापगमानन्तरं आत्मशर्म स्वसुखं दमयन्त्या उपतापयन्त्या दमयन्त्या भैम्या सा निद्रा शयनं सहसा शीघ्रं मुमुचे त्यक्ता। कीदृश्या ? जीवितसादं जीवितस्य सादमवसादं विनाशम् अयन्त्या गच्छन्त्या प्राणान् जहत्येति यावत्। स च नलः सादमयं दुःखमयं त्यागं परित्यागं तस्याः दमयन्त्याः यदा यस्मिन् काले अकृत कृतवान् नले ऽपयाते वनप्रदेशे सुप्तया दमयन्त्या निद्रा मुक्ता। कदा अयं नलः दुःखप्रचुरं तत्याग ? यदा ऽकार्षीत्। दमु उपतापे ऽस्य ण्यन्तस्य शत्रन्तस्य स्त्रीत्वे दमयन्त्येति रूपम्। साद्यते ऽवसाद्यते ऽनेनेति सादो दुःखम्। त्यजहानावित्येतद्धात्वर्थत्वेन कंठोक्त एवार्थः। अकृतेति कृञो लुङि। जीवितसादमित्यत्र धीहिंसादमिति पाठे धीहिंसाबुद्धिनाशस्तं ददातीति सः तं नलं

अयन्त्या नलः क्व गतः अहं वा क्व गच्छामि कुत्र तं पश्यामीति भावयन्त्या अयधातो गत्यर्थकत्वात् ज्ञानार्थकत्वमित्यर्थः ॥ २४ ॥

सात्र ससादारामा सीतेव चासमाससादारामा।
या प्रासादारामानुपेत्य भर्त्रा रतिं रसादारामा॥

सा अत्र ससादा रामा सीता इव चासं आससाद अरामा।
या प्रासादारामान् उपेत्य भर्त्रा रतिं रसात् आर अमा ॥ २५ ॥

सेति। अत्र भयङ्करे वने सा रामा दमयन्ती ससादा सदुःखा चासं भयं आससाद प्राप्तवती। का इव? अरामा रामरहिता सीतेव। या दमयन्ती पूर्वं प्रासादारामान् प्रासादान् नृपगृहान् आरामान् उपवनानि उपेत्य आगत्य रसात् स्नेहात् भर्त्रा नलेन अमा सह रतिं क्रीडां आर प्राप। प्रासादो देवभूभुजाम्। आरामः स्यादुपवनं। सुन्दरी रमणी रामा। अमा सह समीपे चेत्यमरः ॥ २५ ॥

तत्र पदेव्यालीनामथ विभ्रान्तं वने च देव्यालीनां।
तरुवृन्देव्यालीनान्ततिन्दधाने तयास्पदेव्यालीनां॥

तत्र पदे व्यालीनां अथ विभ्रान्तं वने च देव्या अलीनां।
तरुवृन्दे व्यालीनां ततिं दधाने तया आस्पदे व्यालीनां ॥ २६ ॥

तत्रेति। अथानन्तरं तत्र तस्मिन् अरण्ये तया देव्या दमयन्त्या च पुनः बहु विभ्रान्तं बहुविधं भ्रमितं पर्य्यटितम् नलमन्वेषयन्तीति शेषः। कीदृशे वने ? व्यालीनां सर्पिणीनां पदे स्थाने। पुनस्तरुवृन्दे व्यालीनां हस्तिनामासक्तां अलीनां भृङ्गानां ततिं समूहं दधाने धारयति। पुनः व्यालीनां वयः पक्षिणस्तेषामालीनां पङ्क्तीनामास्पदे प्रतिष्ठा-स्थले। आलीसख्यावली अपि। षट्पदभ्रमरालयः। देवी कृताभि-षेकायाम्। विभ्रान्तमित्युदितोवेतीड् विकल्पः। प्रतिष्ठास्थानमा-स्पदम्॥ २६॥

वेगबलापासितया वेण्या भैमी युता ललापासितया
नृपसकलापासितया हत्वारीन्बान्धवान्किलापासितय

वेगबलापासितया वेण्या भैमी युता ललाप असितया।
नृप सकलापासितया हत्वा अरीन् बान्धवान् किल आपासि तया॥ २७

वेगेति। वेगबलेन धावनबलेन अपासितया विस्तृतया अपगता आसिता उपवेशनत्वं अथवा असिता विद्यमानता यस्याः सा तया त्रुटितया असितया श्यामलया वेण्या युता सहिता भैमी दमयन्ती ललाप विललाप। किं विललापेत्याह हे नृप हे राजन् तया सक-लापासितया कलापस्तूणीरः असिः खड्गः ताभ्यां सहितः सकला-पासिः तस्य भावस्तत्ता तया करणेन। यद्वा वेगबलापासितया वेगश्च

बलञ्च आप्नोतीति वेगबलापः सचासिश्च वेगबलापासि र्यस्य स तस्य भावस्तत्ता तया दृढखड्गवत्तया। कथम्भूतया ? सकलापासितया सकलानां अर्थात् शत्रूणां आपासितया अपहृतखड्गतया अरीन् हत्वा बान्धवान् बन्धून् आपासि रक्षसि किलेति वार्त्ता। त्वयि खड्गधारिणि सति अन्येषां हस्तात् खड्गाः स्वयं पतन्तीति भावः। स त्वमेकाकिनीं मां वने त्यक्त्वा कथं गतोसि पुनर्नायासीति भावः। वार्त्तासम्भाव्ययोः किल। कलापो भूषणे बर्हे तूणीरे संहतेपि च। आपासीति पा रक्षणे इत्यस्य लटि ॥ २७ ॥

सकथंमानवनानान्यायविदाचरसिसेव्यमानवनानां।
धृतसीमानवनानान्दाराणान्त्यागमनुपमानवनानां॥

सः कथं मानवनानान्यायविद् आचरसि सेव्यमानवनानां।
धृतसीमानवनानां दाराणां त्यागं अनुपम अनवनानां ॥ २८ ॥

सेति। प्रेमकरुणादिकमनुस्मरन्ती आह। हे मानव नानान्यायवित् मनुः प्रजापतिस्तत् प्रणीतो यो नाना बहुप्रकारो न्यायो धर्मशास्त्रं तद् वेत्तीति तादृक्। यद्वा मानवा मनुष्यास्तेषां नानान्यायो व्यवहारस्तं वेत्तीति ज्ञातसकलधर्मशास्त्रमानुषव्यवहाराभिज्ञः। हे अनुपम निरुपम। स त्वं अनवनानां अवनं रक्षणं तद्रहितानां सेव्यमानवनानां सेव्यमानमाश्रीयमाणं वनमरण्यं यैस्तादृशानां वनमध्यगतानां धृतसी-

मानवनानां धृतं सीमायाः कुलमर्य्यादायाः नवनस्त्वं यैस्ता दृशानां दाराणां स्त्रियाः त्यागं परित्यागं कथमाचरसि करोषि? अदुष्टभार्य्या-त्यागे दोषं कथं न विचारयसीति भावः। स कथं? मानवनानामिति सानुस्वारपाठे। हे न्यायवित् एतस्मिन् कर्मणि धर्मो ऽधर्मो वेति विचारपण्डित हे। किम्भूतानां दाराणां? मानवनानां मानानां वनं गहनं येषां तेषां मानगहनानामित्यर्थः। पुम्भूम्नि दाराः॥ २८॥

परकृतमेतत्त्वेनः स्मरामियन्न स्मृतोऽसिमेतत्त्वेन।
दोषसमेतत्वेन प्रदूषये नात्र संभ्रमेतत्त्वेन॥

परकृतं एतत् तु एनः स्मरामि यत् न स्मृतः असि मे तत्त्वेन।
दोषसमेतत्वेन प्रदूषये न अत्र सम्भ्रमे तत् त्वा इन॥ २९॥

परेति। हे इन स्वामिन् नल यत् यस्मात् एतन् मत्परित्यागरूपमेनः पापं परकृतं परेण कलिना कृतं स्मरामि जानामि। तु पुनः त्वं मे मया तत् तस्मात् तत्त्वेन सत्स्वरूपत्वेन याथार्थ्येन न स्मृतोसि न ज्ञातोसि। अपि तु तत्त्वतो ज्ञातोसि। त्वं स्वबुद्ध्या एवं नाचरसि। अत्र संभ्रमे दुःखे दोषसमेतत्वेन सदूषणत्वेन त्वा त्वां न दूषये न दूषयामि कलिकृते अपराधे त्वां कथं दूषयामि? त्वं सर्वदा दूषणरहित इति भावः। नञ् काक्वर्थे। समौ संवेगसंभ्रमौ। दूषय इति दोषेणावित्यूत्वे रूपम्॥ २९॥

हृदयाकायस्तेन स्थीयेत यथैव पावकायस्तेन।
यावत्कायस्तेन त्यज्येत स्वहृदि चाधिकायस्तेन॥

हृदयौकाः यः ते न स्थीयेत यथा एव पावकायः तेन।
यावत् कायः ते न त्यज्येत स्व हृदि च अधिकायस्तेन ॥ ३० ॥

हृदेति। दमयन्त्यात्मानं प्रत्याह। हे स्व आत्मन् यावत् यत्काल-पर्य्यन्तं ते त्वया कायः न त्यज्येत न मुच्येत तावत् यस्ते तव हृदयाकाः हृदयमोकः आश्रयो यस्य स हृदयवासी नलः तेन नलेन हृदि हृदये अधिकायस्तेन अधिकमायस्तेन व्याकुलेन न स्थीयेत अपि तु स्थातव्यमेव। किमिव? यथैव पावकायः पावके ऽग्नौ अयो लौहमिव दहनगतलौहमिव। हे आत्मन् यावत् त्वमिमं कायं न जहासि तावत् विरहानलप्रदीप्ते मत्हृदि नलः स्थास्यति। यथाग्नौ लौहमेवं तस्य मत्प्रि-यस्य दुःखं भवतीति त्वं शीघ्रं कायं जहीहीति भावः। स्वोज्ञातावात्मनि। स्थीयेतेति घ्रामास्थागापाजहातिसां हलीति दीर्घः। पिण्डं कालाय-सायसी। आयस्तेति आङ्पूर्व्वकयसुप्रयत्ने धातोः क्तः ॥ ३० ॥

यस्य पदेशंकमितःस्वजनोयं प्राप्य जनपदेशंकमित।
अरविन्देशंकमितस्मित सत्वमुपागतोसिदेशंकमितः॥

यस्य पदे शं कं इतः स्वजनः अयं प्राप्य जनपदेशं कमित।
अरविन्दे अशङ्कमितस्मित सः त्वं उपागतः असि देशं कं इतः ॥ ३१

यस्येति। अयं स्वजनो बन्धुवर्गः यस्य पदे तव राज्ये यं त्वां जनपदेशं राष्ट्राधिपं प्राप्याधिगम्य शं कल्याणं कं सुखं इतः प्राप्तवान्। हे कमित कान्त अरिवृन्दे शत्रुसमूहे अशंक शंकारहित मितस्मित मितपरिहास त्वं इतो वनात् कं देशं कां भुवं उपागतोसि गतवानसि । अदौ यं स्वपदेशमिति पाठे स्वपदेशं शोभनोऽपदिश्यत इत्यपदेशो नाम तादृशं शोभनाख्यं यं जनपदेशं प्राप्य स्वजनः कं सुखं अयः पुंभावहविधिं इतः प्राप्तः। यद्वा स्वपदे स्वस्थाने स्थानान्तरं। कथम्भूतं? अशं अकल्याणं इत्यर्थः। दमयन्ती विलपन्तीदमाह हे नल यं त्वां राज्याधिपं प्राप्यात्मीयलोकः सुखं प्राप्तवान् समान्दुःखजलधौ मज्जन्तीमुपेक्ष्य अस्माद् वनात् कं देशं गत-वान्। पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु। शं सुखं। कमुकान्तावि-त्यस्यके। बन्धुस्वस्वजनाः समाः। स्वोज्ञातावात्मनि स्वस्त्रिष्वात्मीये स्वोस्त्रियान्धने। स्वपद इति निमित्तसप्तमी ॥ ३१ ॥

यद्यशसानुरुरोदःकुहरं योद्वेष्टुरंजसानुरुरोदः ।
अद्रेःसानुरुरोदः किमापदयितोममेतिसानुरुरोद ॥

यद्यशसा अनुरु रोदःकुहरं यः द्वेष्टुः अञ्जसा नुः उरोदः।
अद्रेः सानु रुरो अदः किं आप दयितः मम इति सा अनुरुरोद ॥ ३२

यदिति। हे रुरो हे चित्रमृग यद्यशसा यस्य कीर्त्या रोदः कुहरं द्यावा भूम्यन्तरं एकोक्त्या रोदः शब्दः सान्तः स्वर्गभूमिवाची तयोः

कुहरं विवरं अनुरु अविपुलं अल्पं कृतं अपमानितमिति भावः। यस्य द्वेष्टुः द्वेषं कुर्वतो नुः पुरुषस्य अञ्जसा झटिति उरोदः उरोवचो द्यति खण्डयतीति तादृक् द्विषद्वचोविदारणशरवर्षीत्यर्थः। स मम दयितो वल्लभो नलो ऽदोऽद्रेः सानु गिरेः समभूभागं किं आप प्राप्तवान्? इत्युक्त्वा ऽनुरुरोद पश्चात् अरोदत्। वने दमयन्ती मृगं पृच्छति वने चरन् चीणः यत् कीर्त्या द्यावा भूमीपूरिते। यस्य द्विषद्वनदावानलः किङ्गिरिसानुं प्राप्तवानित्युक्त्वा रुरोद। वड्डोरुविपुलम्। द्यावाभूमीच रोदसी। पुरुषाः पूरुषा नरः। स्नुः प्रस्थः सानुरस्त्रियौ। उरोद इति उरोद्यतीति दो अवखण्डनेधातोरातोऽनुपसर्गे क इति कः। कृष्णसाररुरुन्यंकुरंकुशंवररौहिषाः आपेत्यापेर्लिटि। पश्चात् सादृश्ययोरनु। रुरोदेति रुदिर् अश्रुविमोचन इत्यस्य लिटि॥ ३२॥

अयकलनामानन्तेत्ययञ्जनोददतिचाङ्गनामानन्ते।
हार्दे नामानन्ते जनमेनमशोककुरु सनामानन्ते॥

अय कलनां आनन्त इति अयं जनः ददति च आङ्गनाः मानं ते।
हार्दे नाम अनन्ते जनं एनं अशोक कुरु सनामानं ते॥ ३३॥

अयेति। दमयन्त्यशोकमुपगम्याह। हे अशोकवृक्ष अयं जनो मल्लक्षण आनन्त प्रणमतीति कलनाम्बुद्धि पूजां वाश्रय आश्रय गृहाण। अङ्गनाः स्त्रियस्य ते तव मानं पूजां दोहदं वा ददति ददते। स्त्रीसं-

स्पर्शात् तव पुष्पोत्पत्तिरिति भावः। नामसम्भावनायां। अतो अनन्ते बहुतरे हार्द्दे प्रेमणि सति एनं जनं ते तव सनामानं स्वनामाख्यम् अशोकं शोकरहितं कुरु। हृदः कर्म्महार्द्दं। हायनान्तयुवादिभ्योऽणिति अण्। हे अशोक त्वां नौमि मामपि शोकरहितं कुर्विति भावः॥ २३॥

उच्चशिरोदारावालप्यति वने सुबन्धुरोदारावा।
द्रुतिमकरोदारावारुच्चं मरुतलमथोसरोदारावा॥

उच्चशिरोदारौ आलप्य इति वने सुबन्धुरा उदारावा।
द्रुतिं अकरोत् आर अवाः रुच्चं मरुतलं अथो सरोदारावा॥ २४॥

उच्चेति। सुबन्धुरा अत्यन्तसुन्दरी उदारा वा उदारा आवा गति र्यस्याः तादृशी दमयन्ती। उच्चशिरोदारौ उच्चशिरसो दारवो देवदारुद्रुमा यस्मिन् तादृशे वने इति पूर्वोक्तमालप्याभाष्य विलप्य वाद्रुतिं वेगं अकरोत् गतिं वा। यद्वा उच्चशिरा उच्चग्रीवा उदारावा उत् ऊर्द्ध आरावः शब्दो यस्याः सा उच्चस्वरा उच्चैः विलप्येति यावत्। यद्वा एवार्थे वा शब्दः उदारा दक्षिणा। उदारो दातृमहतो र्दक्षिणेप्यभिधेयवत् इति मेदिनीकरः। अस्ति चादन्तोपि शिरशब्दः पिण्डं दद्याद्गयाशिरे इति दर्शनादित्यर्थः। अथावेगकरणानन्तरं स रोदारावा। रोदनशब्द-सहिता रुदन्ती रुचं शुष्कं अवाः जलहीनं न विद्यते वाः जलं यस्मिन् तादृशं मरुतलं मरुदेशं आर गतवती। क्वचिदतिसुन्दरे वने विलप्य

दमयन्ती निर्जलं मरुदेशं गतवती रुदतीति भावः । दारुशब्दस्य वृक्षे वृक्षत्वप्रवृत्तिनिमित्तत्वाद् भाषितपुंस्कत्वेन तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति पुंवद्भावात् घेरात्वादि । वृक्षत्वप्रवृत्तिनिमित्तत्वे चास्य पुंस्त्वाश्रयणात् । भद्रदारुद्रुकिलिमं पीतदारुच दार्विंत्यमरः । वागतिगन्धनयोरित्यस्यावेति । वा समुच्चय एवार्थे इति हैमः । ऋगतावित्यस्यारेतिच ॥ ३४ ॥

मृगकुलमारव्याधिप्रचुरं विभ्रद्वनं समारव्याधि ।
वीथ्या मारव्याधिष्ठितभुजगम्भीमजेयमारव्याधि ॥

मृगकुलं आरवि आधिप्रचुरं विभ्रत् वनं समारव्याधि ।
वीथ्या मारव्या अधिष्ठितभुजगं भीमजा इयं आर व्याधि ॥ ३५ ॥

मृगेति । इयं भीमजा दमयन्ती मारव्या मरोरियं मारवी तया वीथ्या मार्गेण समारव्याधि मारस्य कामस्य व्याधिः मारव्याधिः तत्सहितं आरवि सशब्दम् । यद्वा आरवि आराः इतस्ततो जङ्गमा वयः पक्षिणो यत्र तत् । आधिप्रचुरं मानसीव्यथाबहुलं मृगकुलं विभ्रद् धारयद् वनम् आर गतवती । कीदृशं वनम् ? व्याधिव्याधो लुब्धकस्तत्सहितं अधिष्ठितभुजगं अधिष्ठिताः भुजगाः सर्पा यस्मिन् तत् । समारव्याधिरिति सविसर्गपाठे दमयन्तीविशेषणम् । पुंस्याधिर्मानसीव्यथा

स्त्रीरुग्रुजापोपतापरोगव्याधिगदामयाः। आरेति ऋगतावित्यस्य लिटि। वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः । वीथीपदव्यपीत्यमरः ॥ २५ ॥

सास्रवनासारासावेगमना भीमनन्दनासारासा।
सुनयननासारासावजगरमग्रासि चामुनास्सारासा॥

सास्रवनासारा सावेगमनाः भीमनन्दना सारासा।
सुनयननासा आर असौ अजगरं अग्रासि च अमुना सारा सा ॥ २६ ॥

सास्रेति । सास्रवनासारा अस्रवनं अश्रुजलं तस्या सारो वेगवर्षणं तत्सहिता सा वेगमना आवेग उद्वेगः तत्सहितं मनो यस्या स्तादृशी सारासा आरासो रोदनरव स्तत्सहिता । यद्वा असारासा असारः अस्थिरः आस उपवेशनं स्थिति र्वा यस्याः सा भावे घञ्। असौ भीमनन्दना दमयन्ती अजगरं सर्प्पं आर प्राप्तवती । अमुना चाजगरेण सारा श्रेष्ठा सा दमयन्ती अग्रासि ग्रस्ता। कीदृशीं? सुनयननासा नयनं च नासा च नयननासं शोभनं नयननासं यस्याः सा तादृशी सुनेत्रनासिकेति यावत्। मरुतलमटन्ती दमयन्ती अजगरं अद्राक्षीत् तेन चाजगरेण सुमुखी कवलिता इति भावः । वनं सलिलकानने। आसारो वेगवर्षणम्। नन्दिग्रहिपचादिभ्यो ल्युणि न्यच इति ल्यानन्दनेति। द्वंद्वश्च प्राणितूर्य्यसेनांगानामिति नयननासमित्येकवद्भावः । आरेति ऋगता-

वित्यस्य लिटि । अजगरेशयुर्वाहस इत्युभौ । असुग्लसु अदने लुङि चिणिवृद्धौ अग्रासीति । अश्रुनेत्राम्बुरोदनं चास्रमस्रुच । मारो बले स्थिरांशेच न्याय्ये क्लीबे वरेत्रिषु ॥ २६ ॥

अथशवरोहास्यन्तंस्वास्त्रंस्तदस्त्रंश्चरिपुतरोहास्यन्तं।
समधिरुरोहास्यन्तंन्यस्यतदास्येऽकरोत्खरोहास्यन्तं॥

अथ शवरः हास्यन्तं स्वास्त्रन् तदस्त्रन् च रिपुतरोहा अस्यन्तं।
समधिरुरोह अस्यन्तं न्यस्य तदास्ये अकरोत् खरः हास्यं तं॥ २७ ॥

अथेति । अथाजगरग्रसनानन्तरं रिपुतरोहा रिपूणां तरो बलं हन्तीति रिपुतरोहा शत्रुबलघातकः शवरः किरातः स्वास्त्रन् स्वप्राणान् हास्यन्तं जिहासतं । तदस्त्रंश्च तस्या दमयन्त्या अस्त्रन् प्राणान् स्यन्तं विनाशन्तं अजगरं समधिरुरोह आरूढवान् । तं हास्यं हासयोग्यम् अकरोत् अकार्षीत् । किं कृत्वा तदास्ये तस्याजगरस्यास्ये मुखे अस्यन्तं खड्गाग्रं न्यस्य निक्षिप्य । शवरः किम्भूतः? खरस्तीक्ष्णस्वभावः । शवरो दमयन्तीप्राणान् विनाशयन्तं मारयिष्यन्तं तमजगरं खड्गाग्रभिन्नमुखं अमारयदित्यर्थः । रिपुतरोहेति ब्रह्मभ्रूणवृत्रेषु क्विविति सूत्रेण ब्रह्मादिष्वेव हन्तेः प्रयोगार्थचिन्त्यमिदम् । यद्वा शवरः कथम्भूतः? रिपुतरः । हा इति कृत्वा । हा विषादे च शोके च कुत्सादुःखार्थयोरपीति मेदिनी । हास्यन्तमिति । ओहाक्त्यागे ऽतोल्टटः शद्वेतिशता । पुंसिभूम्यसवः प्राणाः । तरसो

बलरंहसी। योंतकर्म्मणीत्यस्य स्यन्तमिति। समधिरुरोहेति लिटि। हास्यमिति। तदर्हतीति यः। २७॥

तान्पुनरेकामयतः कृशां किरातः स्मरातिरेकामयतः।
कान्तारेकामयत स्त्रियं न कांचेदुपह्वरेकामयतः॥

तां पुनः एकां अयतः कृशां किरातः स्मरातिरेकामयतः।
कान्तारे अकामयत स्त्रियं न कांचेत् उपह्वरे कामायतः॥ ३८॥

तामिति। तां दमयन्तीं एकां एकाकिनीं सहायरहितां अयतः शुभदैवात् कृशां तनुं दैववशात् दुर्बलामित्यर्थः। स्मरातिरेकामयतः स्मरस्य कन्दर्प्पस्यातिरेकं आधिक्यं स एवामयो व्याधिस्तस्मात् कन्दर्प्पाधिक्यव्याधे र्हेतोः किरातः कान्तारे महावने अकामयत अचीकमत् स्त्रीत्वेनेति शेषः त्वं मम भार्य्या भवेति कामनाम् अकरोदिति भावः। अत्र हेतुमाह कामयतः कामेन यतः संयतः। कामातुरः उपह्वरे रहसि स्त्रियं न आकांचेत् न इच्छेत् किं? नञ्काकार्थः। अपि कांचिदेव। उपह्वरं रहसि सन्निधौ इति हेमचन्द्रः॥ ३८

धृतवनमह्यन्तेन चातासि मया ननु त्वमह्यन्तेन।
मानिनिमह्यन्तेनप्रसीदशरणागताःकमह्यन्तेन॥

धृतवनमह्यन्तेन चाता असि मया ननु त्वं अह्यन्तेन।
मानिनि मह्यं तेन प्रसीद शरणागताः क मह्यन्ते न॥ २९॥

कोपपुरःसरं मा सर स्वगृहात् मा गच्छ आसर परावृत्त्य आगच्छ सा तव स्त्री सरमा सलक्ष्मीका भवत्वित्यर्थः। तथा च क्रुद्धः सन् गृहात् मा गच्छेति भावः। दमयन्ती वृकमाह हे वृक त्वं मां आसर नलादृच्छते मम किं सुखं जीवितेन वा किं प्रयोजनं? अतो मां भक्षयित्वा स्वस्त्रिया सहैव स्थीयतां मा विरही भवेति तात्पर्य्यार्थः। तरक्षुस्तु मृगादनः वृकोपि। आसरेति सर्त्तेर्लोटि। मा शब्दोऽयन्नमाङ्। सरमा शुनी। प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु। पृथग्विनान्तरेणर्त्ते हिरुक् नाना च वर्जने ॥ ४२ ॥

अयिराक्षसभक्षयमांक्षुधितोनवसानवसानवसानवसाः
रुजमुज्झजनेत्रचहेकरुणान्तरदान्तरदान्तरदान्तरदां

अयि राक्षस भक्षय मां क्षुधितः न वस अनवसान वसान वसाः।
रुजं उज्झ जने अत्र च हे करुणान्तरदान्तरदान्तरद अन्तर् अदां ॥ ४४

अयीति। भैमी राक्षसं दृष्ट्वाह। अयि अहो राक्षस वसाः मेदांसि वसानाच्छादय अनवसानमरणहीनक्षुधितो बुभुक्षितस्त्वं न वस न तिष्ठ मां भक्षय। अत्र च जने मल्लक्षणे करुणान्तरदान्तरदान्तरद करुणान्तरं करुणावकाशस्तेन दान्तं उपशान्तं रदान्तरं दन्तान्तरं ददातीति तादृक्। करुणा हीन रदनान्तरप्रदायक रुजं पीडां उज्झ त्यज मयि पीडां त्यज। अहं अन्तः हृदयं अदां दत्तवती। यद्वा करुणां तर सन्तर मद्विषये दयां

धृतेति। शबरो भैमीमाह। ननु भो मानिनि दमयन्ति धृतवनमह्यन्तेन धृतः श्रितो वनमह्यन्तो वनभूमिप्रान्तं येन तादृशेन अहंतेन सर्पनाशकेन मया त्वं त्रातासि रक्षितासि। तेन हेतुना मह्यं प्रसीद प्रसन्ना भव। शरणाय आत्मत्राणाय आगताः प्राप्ता जनाः क्व कुत्र न मह्यंते न पूज्यंते। हे दमयन्ति अजगरं विनाश्य मया रक्षितासि। अथ शरणागताय मे प्रसीद। मह्यन्त इति। मह पूजायामित्यस्य कर्म्मणि लटि। शरणं गृहरक्षित्रोरित्यमरः। नन्वाक्षेपे परिप्रश्ने प्रत्युक्तावधारणे। वाक्यारम्भेप्यनुनया मन्त्रणानुज्ञयोरपीति हेमः। अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः। अवयवेपीति हेमः॥ ३९॥

सुमुखनिशापेतेनः स्मर दासानिति प्रोच्य वशापेतेन।
दत्ते शापेतेन स्थितयासान्त्वेन चलदृशापेतेन॥

सुमुखनिशापे ते नः स्मर दासान् इति प्रोच्य वशापेतेन।
दत्ते शापे तेन स्थितया असान्त्वेन चलदृशा पेते न॥ ४०॥

सुमुखेति। हे सुमुखनिशापे सुशोभनं मुखं सुमुखं तदेव निशापः चन्द्र इव यस्याः सा सुमुखनिशापा तस्याः संबोधने हे शोभनमुखचन्द्रे ते तव नोऽस्मान् दासान् स्मर जानीहि। इत्यनेन प्रकारेण प्रोच्य उक्त्वाऽसान्त्वेन क्रोधेन स्थितया चलदृशा चञ्चलाक्ष्या शापे दत्ते वशापेतेन वशामेदस्तया ऽपेतेन हीनेन सता मदनज्वलनदह्यमानमेदसा तेन

शवरेण किन्नपेते अपि तु मूर्च्छितमेव। मञ्चकाकार्थः। क्रुद्धया दमयन्त्या शापे दत्ते शवरो भूर्च्छितो ऽभूदिति भावः। सुमुखि विशापे तेनेति पाठे हे शोभनमुखि ते तव नः अस्मान् दासान् स्मरेति विशापे शापाभावे शापपूर्व्वमित्यर्थः प्रोच्यतेन न पतितमिति काकुः। ह्वनेदस्तु वपावसा। सामसान्त्वमुभे समे। पेते इति पततेः कर्म्मणि लिटि ॥ ४० ॥

दग्धसरागाह्वितयादमयन्त्याविपिनभूःपरागाह्वितया।
उच्चतरागाह्वितया दृश्या घोराच कन्दरागाह्वितया॥

दग्धसरागाह्वितया दमयन्त्या विपिनभूः परा अगाह्वि तया।
उच्चतरागाह्वितया दृश्या घोरा च कन्दरा अगाह्वि तया॥ ४१॥

दग्धेति। दग्धसरागाह्वितया दग्धः सरागः सकामो ऽह्वितः शत्रुः शवरो यया सा तादृश्या तया दमयन्त्या ऽपरा ऽन्या विपिनभू र्वनभूमिरगाह्वि अवगाह्विता। उच्चतरागाह्वितया उच्चतरा ये अगा वृक्षा स्तैराह्वितया आरोपितया दृश्या च घोरा भयावहा कन्दरादरी अगाह्वि। कन्दरागा ह्वितयेत्येकं पदं वा। कन्दरायुक्ताद्रैा आह्वितया चित्रयेत्यर्थः। अत्र पक्षे घोरेति भूविशेषणम्। यद्वा परागाह्वितया पुष्पधूलिव्याप्तया दृश्या वनभूः अगाह्वि विलोडितेत्यर्थः। दग्धं शवरया

तया भैम्या अन्या ऽटवी अवगाहिता घोरा कंदरा चादर्शि इति भावः। गाह अवगाहने स्मात्सुङि चिणि ॥ ४१ ॥

पदवापदवापदवापदवारयतोऽद्रिवनंविललापचसा।
तरसान्तरसान्तरसान्तरसान्वयदुःखवृणीष्वसखेमरणं॥

पदवा अपदवापद् अवापद् अवार् अयतः अद्रिवनं विललाप च सा।
तरसा अन्तर सान्तरसान्तर सान्वयदुःख वृणीष्व सखे मरणं ॥ ४२ ॥

पदवेति। अयतः शुभदैवात् पदवा पदाभ्यां वातीति पदवा सा दमयन्ती अपदवापत। अपगता दवापत् दवाग्निजन्यदुःखं यस्मात् तं तादृशमद्रिवनं पर्वतवनं अवापत् लेभे। रयतो वेगादवापदिति वा। कीदृशम्? अवाः न विद्यते वा जलं यस्मिन् तत् जलरहितं विललाप च पर्यदेवीच। हे सान्तरसान्तर। सान्तं अन्तरसहितं रसान्तरं करुणातिरिक्त रसो यस्मात् तादृशं। हे सान्वयदुःख अन्वयः सन्तान स्तत् सहितं दुःखं यस्मिन् तादृशं। सान्तरदुःख इतिपाठे अन्तःकरणदुःखसहित हे। हे अन्तर आत्मन् सखे मित्रतर सा वेगेन मरणं वृणीष्व वरय। पदचारिणी दमयन्ती दैवविपद्रहितं जलशून्यं गिरिवनगता विलापं चाकार्षीत्। हे आत्मन् सपरिवारदुःखाकुल। मरणमिदानीं वरय। साम्प्रतं कियत् सहे मम मरणमेव वरमिति भावः। अवापदिति

आपेर्खेदिलादङ् । रपलपजल्पव्यक्तायां वा चीत्यस्थलिटि ललापेति। अन्तरं अवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये । छिद्रात्मीयविना वहिरवसरमध्येऽन्तरात्मनि चेत्यमरः॥ ४२ ॥

वृककोपपुरः सरमा सरमा सरमा सरमा भवताननुसा
किमृते दयितादयतोदयतोदयतोदयतोऽस्तिममेह सुखं

वृक कोपपुरःसरं आसर मा सर मा सरमा भवता ननु सा।
किं ऋते दयितात् अयतोदयतोदयतः अदयतः अस्ति मम इह सुखं॥ ४२

वृकेति । वने गच्छन्ती कंदरातो निःसृतं व्यात्तमुखं वृकं दृष्ट्वाह। हे वृक तरक्षो कोपपुरस्सरं क्रोधपूर्वकं मा मां आसर आगच्छ माम्भक्षये-त्यर्थः। मा सर दूरतो मा गच्छ। ननु भोः सा तव स्त्री वृकी भवता त्वया सरमा सलक्ष्मीका भवतु तथाच मां भक्ष्य स्वस्त्रिया सह स्थीयता-मिति भावः । यद्वा सासरमाश्वापदत्वात् शुनी तव स्त्री त्वया सर-माभवत्वितिशेषः। अतो मा सर अन्यत्र मा गम्यतां मामेव भक्षयेत्यर्थः। अयतोदयतोदयतः अयं शुभदैवं तस्य तोदः क्षेपस्तत्र यतो रत् उदयो ऽभ्युदयो वा यस्य तादृशात्। अदयतः निष्करुणाद् दयितात् स्वीयात् नलाद् ऋते विना इहावसरे मम किं सुखमस्ति स्वास्थ्यमस्ति। यत्तु हे अयतोदयतेति भिन्नम्पदं अयोदैवं तेन या पीडा तया यतः बद्धः दैव-पीडित उदयत उद्गच्छतः। अपरं तथैवेति ध्येयम् । यद्वा हे वृक

त्यजेत्यर्थः । हे दान्तरदान्तरद दान्तः समर्थः रदो दन्तः तस्यान्तरेण द्यति खण्डयतिस । हे राक्षस मयि स्त्री अवध्येति रुजं त्यक्त्वा मां भक्षय तुभ्यमहं शरीरं दत्तवतीत्यवोचदिति भावः । अदामितिददाते लुङि । यदपि वहेः करुणान्तरदान्तरदान्तरदान्तरद इति पाठः । आन्तरं चित्तं द्यति खण्डयति तां रुजं त्यज । त्वमत्र जने करुणां वहेः । हे रदान्तद दन्तान्तर प्रद । दान्तं संसारं तर इति तदर्थः ॥ ४४ ॥

करमाकरमाकरमाकरमाकलयव्यसनंममपाहिहरे ।
दरतोदरतोदरतोदरतोविरुतैर्मरुतांसुकरत्वमपि ॥

क रमाकर माकरं आकरं आकलय व्यसनं मम पाहि हरे ।
दरतः अदरतोदरतोदरतः विरुतैः मरुतां सुकर त्वं अपि ॥ ४५ ॥

करमेति । हे रमाकर लक्ष्मीप्रद । कं ब्रह्मन् मम व्यसनं विपदं माकरं आकरं मकराणामयं माकरस्तादृशमाकरं खनिं आकलय मम शोकं समुद्रं जानीहि । मरुतां देवानां सुकर अक्लिष्टकर हे हरे कृष्ण नामोच्चारणेन हरति पातकानि इति हरिः तस्य सम्बोधनं त्वमपि अदरतोदरतोदरतः अदरो ऽनल्पो यस्तोदो दुःखं तत्र रतं उदरमभ्यंतरं यस्य तादृशात् दरतो भयात् विरुतै राश्वासनवचनैः पाहि रक्ष । यद्वा शं सुखं रमा लक्ष्मी स्तयोराकरः उत्पत्तिभूमिः स चासौ माकरः शोभाकरश्च तत् सम्बोधनं माकरं मकरसम्बन्धिसमुद्रसदृशं मा लक्ष्मीः तस्याः आकरः

उत्पत्तिस्थानं समुद्रमिवेति वार्थः। हे ब्रह्मन् मम शोकः समुद्र इव प्रवृद्धः। देवभयापहारिन् हे कृष्ण त्वमपीदृशे कष्टे मामाश्वास वाग्भिः रक्षेत्याहेति भावः। मारुते वेधसिब्रध्ने पुंसि कः। खनिः स्त्रियामाकरः स्यात्। एकत्र करोतीत्याकरः। ऋदोरप्। व्यसनं विपदि भ्रंशे दोषे कामजकोपजे। पाहीति पारक्षणेस्य लोटि। सुकरेति ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्। दरोस्त्रियाम्भये श्वभ्रे। एवं कस्य ब्रह्मणो रमाकर लोकाधिपत्यकर हरे सुकर शोभनहस्त। दरतोदरतोदरतः दरो भयं तस्य तोदो नाशस्तत्र रतमुदरं यस्य तस्य दरतः शंखस्य। मरुतां वायूनां विरुतै मां पाहि रक्षेति ध्येयं ॥ ४५ ॥

त्वदरिर्निषधेश सम्ट्द्धिमनारमयारमयारमयारमयाः
व्यसनन्त्वमुपैमिकदानुसभीशमनाशमनाशमनाशमनाः

त्वदरिः निषधेश सम्ट्द्धिं अनारमया रमया आर मया अरं अयाः।
व्यसनं त्वं उपैमि कदा नु सभीशमना शं अनाशं अनाशमनाः ॥ ४६ ॥

त्वदरिरिति। हे निषधेश नल त्वदरिः पुष्करः अनारमया अनवसानया रमया लक्ष्म्या रमण्या वा सम्ट्द्धिं हर्षमार प्राप्तवान्। त्वं मया सह अरं शीघ्रं व्यसनं विपत्तिं अयाः गतवानसि। अनाशमनाः आशेच्छा तद्रहितं मनो यस्यास्तादृशी। यद्वा त्वदरिः कथम्भूतः ? अनाशमनाः न विद्यते नाशे विनाशे मनो यस्य स तथेत्यर्थः। सभीशमना भीर्भयं

तच्छमनं शान्तिस्तत् सहिता शांतभीतिः। अनाशं नाशरहितं शं सुखं कदा उपैमि कस्मिन् काले उपगच्छामि। नुपृच्छायां। कदा सुखं लप्से इति व्यलपत्। यातेर्लङिमयाः। उपैमीतीणः विभाषा कदा कर्ह्योरिति भविष्यति लट्। नुपृच्छायां विकल्पे च॥ ४६ ॥

यमनायमनायमनायमनागभिवीक्ष्य रतन्द्रवतीह परः
सरुषोनिषधक्षितिनाथगलन्नवमानवमानवमानवमाः

यं अनायमनाः यमनाय मनाक् अभिवीक्ष्य रतं द्रवति इह परः।
सः रुषः निषधक्षितिनाथ गलन्नवमानवमान वम अनवमाः ॥ ४७ ॥

यमनेति। अनायमना अनीतिमना अनीतियुक्तः नय एव नायः अन्यायपर इत्यर्थः। यद्वा आयो धनागमस्तद्रहितमनाः सन् परः शत्रु र्मनागीषत् यमनाय जीवापहारणाय रतमासक्तं यं त्वां वीक्ष्येह लोके परः शत्रु र्द्रवति दूरादेव पलायते। हे निषधक्षितिनाथ निषधेश नल गलन्नवमानवमान गलन् स्खलन् नवमानवाः तरुणास्तेषां मानो गर्वो यस्मिन् तादृक् सत्वं अनवमाः अवमाः अधमाः न अवमाः अनवमाः श्रेष्ठाः रुषः क्रोधान् वम उद्गिर। हे नल यं त्वां कृतानीतिः शत्रु र्हन्तुमुद्यतमीषदप्यालक्ष्य पलायते स त्वं परहृतसर्वस्वःता गिरः कथं नोद्गिरसि? वने वने किमटसीति भावः। किञ्चिदीषन्मनागल्पे। द्रु गताविव्यस्य लटि द्रवतीति। रुट्क्रुधौ स्त्रियौ। टुवमउद्गिरणे अस्माल्लोटि उद्गिरेति। निकृष्टप्रतिकृष्टाऽर्वरेफयाप्यावमाधमाः ॥ ४७ ॥

नयमानयमानयमानयमावसएत्यनिवासममुम्भवता।
भवनीयमपायमरीनुदयान्नयतानयतानयतानयता॥

नयमानयमान् अयमान यं आवसः एत्य निवासं अमुं भवता।
भवनीयं अपायं अरीन् उदयान् नयता अनयतानयतान् अयता॥ ४८

नयमेति। नयमानयमान् नयो नीति र्मानोऽभिमानो यमो विश्रमो नियमो वा तान्। अयमानः प्राप्नुवान् तस्य सम्बोधने हे नयमानयमानयमान नीतिमभिमानं नियमञ्च धारयन्। यं निवासं राष्ट्रमेत्य प्राप्य आवसः यस्मिन् राष्ट्रे ऽतिष्ठः। अमुं निवासं अयता प्राप्नवता उदयानुद्गतो ऽयो ज्ञानं येषां तादृशान् अनयतानयतान अनयो ऽन्यायः तस्य तानो विस्तारस्तत्र यतान् अन्यायासक्तान् अरीन् शत्रूनपायं नाशं नयता प्रापयता भवता त्वया भवनीयं भवितव्यं। हे नल यन्निजराज्यं प्राप्य पूर्वमास्थाः पुनस्तदेव राज्यं गच्छता त्वया शत्रून् विनाशयितुं समर्थेन भवितव्यमिति तदेव निजपुरं गच्छति व्यलपदिति भावः। आवस इत्यस्याधारस्य निवासमित्यस्योपन्वध्याङ्वस इति कर्मत्वम्॥ ४८॥

सनयासनयासनयासनयाह्यसुहृद्धटयाविपदंस्वपदं।
ह्वितदेह्वितदेह्वितदेह्वितदेत्यलपद्वहुधानरदेवसुता॥

सनयासनया सनया सः न याहि असुहृद्घटया विपदं स्वपदं।
ह्वितद ईह्वितदेह्वि तद् एह्वि तद्दति अलपत् बहुधा नरदेवसुता॥ ४९

सनयेति। हे हितद हितमीप्सितं वस्तु ददातीति हितद नल स त्वं सनयासनया नयो नीतिस्तस्या असनं त्यागस्तत्सहितया त्यक्तनीत्या असुहृदटया अनुकरिसमूहेन विपदं नाग्नं न याहि मा गमः। दृहितदेहि दृहिता दृष्टा उपकर्त्तारो देहिनो जना यस्मिन् तादृशं तत्स्वपदं स्वनगरमेहि आयाहि। इत्यनेन प्रकारेण सनया नीतिसहिता नरदेवसुता भीमभूपपुत्री बहुधा बहुप्रकारं व्यलपत् विललाप। यद्वा हितदेहितदेहीत्येकं पदं हितदं दृहितं चेष्टितं येषां ते तादृशा देहिनो यत्र तत् स्वपदं राज्यमेहि। हे नल एवमेकाकी शत्रुहस्तं मा गच्छेः। शत्रव एकाकिनं त्वां दृष्ट्वाऽपकुर्युस्तस्मात् स्वकीयमेव नगरं गच्छेति नानाशंकाकुला भैमी तस्मिन् वने विललापेति भावः। करिणां घटनाघटा। या प्रापणेऽस्य लोटि याहीति। पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु। एहीतोणोलोटि। अलपदिति लपव्यक्तायां वाचीत्यस्य लङि। बहुधा संख्यायाविधार्थेधा। सप्तभिः कुलकम्॥ ४९॥

सा विधराधावन्तं रत्नौघं क्वापि निरपराधावन्तं।
सार्थं राधावन्तं प्रैक्षिष्टापच्च सुतन राधावन्तं॥

सा विधुरा धावन्तं रत्नौघं क्वापि निरपराधा अवन्तं।
सार्थं राधावन्तं प्रैक्षिष्ट आपत् च सुतनुः आधौ अन्तं॥ ५०॥

सेति। विधुरा विरहिता सुतनुः शोभनाङ्गी सा दमयन्ती निर-

पराधा ऽपराधरहिता क्वापि कस्मिन्नपि देशे रत्नौघं रत्नसमूहं अवन्तं रक्षन्तं सरत्नसमूहं राधावन्तं राधा समृद्धिस्तत् सहितं धावन्तं गच्छन्तं सार्थं जनसमूहं प्रैक्षिष्ट दृष्टवती । आधौ मनःपीडाया अन्तं अवसानञ्च प्रापल्लेभे । वने ऽटंतीसार्थमासाद्य मनःपीडां जहाविति भावः । धावुगतिशुद्ध्योरित्यस्य धावन्तमिति । राधसाधसंसिद्धावित्यस्य षिद्भिदादिभ्यो ऽङित्यङि राधेति । प्रैक्षिष्टेतीक्षदर्शनाङ्कनयोरित्यस्य लुङि । आप लृङि आपदिति । संघसार्थौ तु जन्तुभिः । पुंस्याधि र्मानसीव्यथा ॥ ५० ॥

व्याकुलयेवारितयाविधेर्गतिरनेनसिद्धयेवारितया ।
अपिचययेवारितयायथाशफर्य्याजलोच्चयेवारितया॥

व्याकुलया इव अरितया विधेः गतिः अनेन सिद्धये अवारि तया ।
अपि च यये वारितया यथा शफर्य्या जलोच्चये वारितया ॥ ५१ ॥

व्याकुलेति । विधे र्दैवस्यारितया शत्रुत्वेन व्याकुलया इव अत्रापि विधाना शत्रुरभूदिति उद्भ्रान्तयेव तया दमयन्त्या सिद्धये नलान्वेषण रूपकार्यस्य भीमपुरप्राप्तये वा अनेन सार्थेन सह गति र्गमनमवारि भेजे वृता वा । वारितया का त्वं ? कुत्र यासि ? इति । निवारितयापि च यये गतम् । कया ? यथा वारितया वाः जलमितया प्राप्तया सफर्य्या जलोच्चये जलवृद्धौ यथा । जनोच्चय इति पाठे जनसंघे तया

ययै इत्यर्थः। अवारितया इत्यकारप्रश्लेषे अनिषिद्धयेत्यर्थः । अवाः जल रहितं निर्जलमितया शफर्य्येव । अहमपि भवत्संगे समेष्यामीत्युक्त्वा निषिद्धयापि भैम्या गतमिति भावः। भाग्यं स्त्रीनियति विंधिः । इन्नसंभक्तावित्यस्य लुङि चिण्वारीति। या प्रापणे इत्यस्य भावे लिटि ययै। वा वारि सलिलं कमलं जलमित्यमरः। अत्रेयं भारतवार्त्ता। तत्र वने गच्छन्तं वणिक्सार्थं सा ददर्श तांश्च दृष्ट्वा तेषां मध्ये कश्चित शुचिनामा वणिक् का त्वं? कस्यासि क्व यासि? इत्याह। ततस्तया भीतया स्ववृत्तान्तं कथितं कुत्रापि भवद्भि र्नलो दृष्ट इति पृष्टाः। न वयं नलं विद्म इत्यूचुः। ततः क्व यास्यथ? इत्युक्ताः सुबाहुनाम्नश्चेदिराजस्य देशे वाणिज्यार्थं यास्यामः इत्यूचुः। ततः तैः सार्द्धं सापि ययौ इति ॥ ५१ ॥

प्रतिषिद्धान्यायस्य प्रापि सुबाहोश्च राजधान्यायस्य।
बहुधनधान्यायस्यप्रबभुर्वृन्दानिबहुविधान्यायस्य॥

प्रतिषिद्धान्यायस्य प्रापि सुबाहोः च राजधानी आयस्य।
बहुधनधान्या यस्य प्रबभुः वृन्दानि बहुविधानि आयस्य ॥ ५२ ॥

प्रतीति। आयस्य पदगमनेन आयासं कृत्वा। प्रतिषिद्धान्यायस्य प्रतिषिद्धो निराकृतो ऽन्यायो ऽनीति र्येन तादृशस्य सुबाहोः सुबाहुनाम्नो राज्ञः राजधानी नगरी प्रापि च प्राप्ताच। कीदृशी बहुधनधान्या बहुतरं धनधान्यं यस्याः सा यस्य सुबाहोः आयस्य धनागमस्य बहुविधानि

नानाप्रकाराणि वृन्दानि समूहाः प्रबभुः रेजिरे। एवं सार्थेन सह व्रजन्त्या भैम्या आयासेन सुबाहुपुरी प्राप्तेति भावः। प्रापेत्यापेर्लुङि चिणि। प्रबभुरिति भातेर्लिटि ॥ ५२ ॥

सञ्छन्नामात्रासानन्दं राज्ञोभृताच नामात्रासा।
शोकेनामात्रासावसद्धृतदेहयापनामात्रासा॥

सञ्छन्ना मात्रा सानन्दं राज्ञः भृता च नाम अत्रासा।
शोकेन अमा अत्र असौ अवसत् धृतदेहयापनामात्रा सा ॥ ५३ ॥

सञ्छन्नेति। असौ दमयन्ती सञ्छन्ना वपुर्मालिन्यात् दमयन्तीति ज्ञातुमशक्या राज्ञः सुबाहोर्मात्रा सानन्दं यथा स्यादेवं भृता नाम पोषिता। नाम सम्भावनायां। अत्र सुबाह्वन्तःपुरे अत्रासा त्रासरहिता धृतदेहयापनामात्रा धृतं देहयापना शरीरस्थितिमात्रं यया सा तादृशी देहधारणार्थं भुङ्क्ते नतु सौख्यार्थमिति भावः। शोकेन अमा शोकसहिता सा भैमी अवसत् वासमकरोत्। यद्वा धृता देहनिर्वाहमात्रे आशा यस्येति सा धृतदेहयापनामात्राशेत्येकं पदम्। अत्र पक्षे यमके शसयोरभेदो न दोषाय। यमकश्लेषचित्रेषु रलयो र्डलयो र्नभित्। नानुस्वारविसर्गौ च चित्रभङ्गाय संमतौ इतिवत्। असौ भैमी सुबाहुमात्रा दमयन्तीत्यनभिज्ञाय सानन्दमपुषत् सा च शरीररक्षामात्राहाराभूदिति भावः। अवसदिति वसेर्लङि। अत्रेयं भारतवार्त्ता। सायाह्ने भैमी

वणिग्भिः सार्द्धं सुबाहुनगरं प्राप्ता। अथ प्रासादस्था राजमाता तां दृष्ट्वा धात्रीद्वारा स्वसमीपमानीय का त्वमिति प्रोवाच। ततः दमयन्त्याः परिचारिकाहमिति भैम्याह। राजमातोवाच अत्र तिष्ठ। ततो भैमी निर्बन्धं चकार पादसेवनमुच्छिष्टफेटनं न करिष्यामीति॥ ५३॥

पदा पदापरिभ्रमन्नयेनयापदा पदा।
वना वना वनाथवत्सजीवना वनाभवत्॥

पदा पदा परिभ्रमं नयेन या अपत् आपदा।
वनावनौ अनाथवत् सजीवनावना अभवत्॥ ५४॥

पदेति। अपदा अत्राणा अस्थाना वा या दमयन्ती नयेन नीत्या कृत्वा आपदा विपत्त्या पदा चरणेन वनावनौ वनभूमौ अनाथवत् परिभ्रमं पर्यटनं आपत् लेभे। सा सजीवनावना जीवनं तस्य अवनं रक्षणं तत्सहिता सजीवितरक्षाभवत्। या भैमी विपदि चरणाभ्यां वनभूमौ पर्य्यभ्रमीत् सा जीवनरक्षणं प्रापेति भावः। पदंघ्रिश्चरणोऽस्त्रियाम्। आपदित्यापे र्लङि। विपत्त्यां विपदापदौ। अभवदिति भवतेर्लङि॥ ५४॥

इतिसुबोधिनीटीकासहिते श्रीकालिदासकृते नलोदये सत्काव्ये तृतीयोच्छ्वासः॥

॥ नलोदयः ॥

अथतुङ्गोपायस्य श्रवणेन नलस्य सानगोपायस्य।
वशगा गोपायंस्य स्वमनोभीमश्चिरं जुगोपायस्य ॥

अथ तुङ्गोपायस्य श्रवणेन नलस्य सानुगः अपायस्य ।
वशगाः गोपाः यस्य स्वमनः भीमः चिरं जुगोप आयस्य ॥ १ ॥

अथेति । अथानन्तरं तुङ्गोपायस्य तुङ्ग उच्च उपायः सामादि यस्य तादृशस्य नलस्य अपायस्यापक्रमणस्य दुःखस्य वा श्रवणेन सानुगः अनुगच्छन्तीत्यनुगा स्तैः सहितः सानुचरः चिरं बहुकालं आयस्य प्रयासं कृत्वा नलान्वेषणाय भीमः स्वमनः स्वस्य मानसं जुगोप रक्षितवान् । यस्य भीमस्य गोपाः गां भूमिं पान्तीति गोपाः राजानः ग्रामौघाधिकारिणो वा गोपजातीया वा वशगा आयत्ताः । नलापगमनं श्रुत्वा तदन्वेषणार्थं बहुधा आयस्य शोकसहितं स्वहृत्कथञ्चिदरक्षत् । गोपो गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि । ग्रामौघाधिकृते पुंसीति मेदिनीकरः । स्वायुक्तोधिकृतो ग्रामे गोपोग्रामेषु भूरिषु इत्यमरश्च ॥ १ ॥

निशिचदिवाचार्य्यस्यत्ततस्यनलविचिन्तयेथवाचार्य्यस्य।
भृशमेवाचार्य्यस्य द्विजोत्तमैः शिष्यकैरिवाचार्य्यस्य ॥

निशि च दिवा च अर्य्यस्यत्ततस्य नलविचिन्तये अथ वाचा आर्य्यस्य।
भृशं एव अचारि अस्य द्विजोत्तमैः शिष्यकैः इव आचार्य्यस्य ॥ २ ॥

निशीति। अस्य भीमस्य वाचा वचनेन द्विजोत्तमै ब्राह्मणश्रेष्ठै नलविचिन्तये नलान्वेषणाय निशि रात्रौ च दिवा च दिवसे भृशमेव अत्यर्थमेव अचारि नानादेशसञ्चरणमकारि। कीदृशस्यास्य? अर्य्यस्यत्ततस्य अरेः असयः अर्य्यसयस्तैः शत्रुखड्गैरताडितस्य। एवमार्य्यस्य श्रेष्ठस्य आचार्य्यस्य गुरो वंचसा शिष्यकैरिव शिष्यैरिव स्वार्थे कः शिष्या यथा गुरोराज्ञया ऽहर्निशं सञ्चरन्ति तथेत्यर्थः॥ २ ॥

अथनयनेत्रासादिप्रचरापूःकेनचिज्जनेत्रासादि।
यत्रसुनेत्रासादिग्भ्रमेणदुःखङ्गतावनेत्रासादि॥

अथ नयनेत्रा सादिप्रचुरा पूः केनचित् जने अत्र असादि।
यत्र सुनेत्रा सा दिग्भ्रमणेन दुःखं गता वने त्रासादि॥ ३ ॥

अथेति। अथानन्तरं अत्र जने विषये केनचिदनिर्वचनीयचतुरेण सुदेवनाम्ना द्विजेन नयनेत्रा नीतिनिपुणेन सादिप्रचुरा सादिनो ऽश्ववाराः प्रचुरा यस्यां सा पूः असादि प्राप्ता। सा का? यत्र पुरि सा सुनेत्रा

भैमी वर्त्तत इति शेषः। कीदृशी सा ? वने दिग्भ्रमेण दिग्भ्रान्त्या त्रासादि त्रासपूर्वकं दुःखं गता प्राप्ता। दिग्भ्रमेणेत्यत्र आदिक्रान्त्या इतिपाठे यत्र पुरि आदिक्रान्त्या प्रथमप्रवेशेन जने लोके त्रासादि भवति यत्र पुरि वने. दुःखङ्गता सा सुनेत्रा आसीदित्यर्थः ॥ ३ ॥

सहदीनायततेनस्वगृहञ्चभैमीययेमुनायततेन।
स्वनयेनायततेनप्राप्त्यैस्वासोश्चशोभनायततेन ॥

सह दीना आयत तेन स्वगृहं च भैमी ययेअमुना आयततेन।
स्वनयेन अयततेनप्राप्त्यै स्वासोः च शोभना यतते न ॥ ४ ॥

सहेति। दीना दुःखिता भैमी तेन द्विजेन सह स्वगृहं आयत गतवती। चेदिपुरीनिलयं ब्राह्मणं गृहीत्वा स्ववासस्थाने गतवती। आयत तेन धनागमव्याप्तेन अमुना द्विजेन सह भैम्या यये भीमगृहम्प्रतीति शेषः। चेदिराजदत्तधनवता द्विजेन सह भैमी भीमगृहमगादिति भावः। यद्वा नलान्वेषणाय भीमदत्तबहुधनवता विप्रेण भैम्या सह चेदिगृहं यये इत्यर्थः। शोभना सा भैमी स्वनयेन स्वनीत्या अयत-तेनप्राप्त्यै अयः शुभविधिस्तेन ततो व्याप्तो य इनः स्वामी नलस्तस्य प्राप्त्यै यतते स्म यत्नमकरोत्। स्वासोः स्वकीयप्राणस्य प्राप्त्यै न यतते स्म। अत्रेयं भारतवार्त्ता सुनन्दान्तःपुरे समागतं सुदेवं ब्राह्मणं दृष्ट्वा दम-

यन्ती रुरोद। सुदेव उवाच। अहं तव भ्रातुः सखा सुदेव नामा भीमवचनात् त्वामन्वेष्टुमागतः तव बान्धवास्त्वां विना मृता इव तिष्ठन्ति। ततो राजमातरं सर्ववृत्तान्तमकथयत्। सुबाहुमाता च नलपत्नीं दमयन्तीं ज्ञात्वा आलिङ्ग्य सान्त्वयामास सुनन्दा तु निश्चयार्थं तस्या गात्रमलं दूरीकृत्य शिरस्यर्द्धचन्द्राकारकुण्डलाङ्कनं ददर्श। तच्चिह्नेन सुदृढं ज्ञात्वा मम भगिन्याः कन्या त्वं इत्युक्त्वा राजमाता तामलंकृत्यामात्यैः सुदेवेन च सहितां दमयन्तीं पितृगेहं प्रापयत् तत्र सा पुत्रादिभिः सह युयोज। भीमश्च सुदेवाय पुनः पुनः प्रणामं कृत्वा बहुधनानि ददौ। ततो नलान्वेषणार्थं पुनर्ब्राह्मणान् प्रेषयामास इति ॥ ४ ॥

वसनांशस्यस्तेनक्वासिममायंविधिर्यशस्यस्तेन।
क्वद्मविशस्यस्तेनस्वजनेनभृतेनभवसिशस्यस्तेन ॥

वसनांशस्य स्तेन क्व असि मम अयं विधिः यशस्यः ते न।
क्वद्म विशसि अस्तेन स्वजनेन भृतेन भवसि शस्यः तेन ॥ ५ ॥

वसनेति। नयमेवाह। हे वसनांशस्य वस्त्रखण्डस्य स्तेन चौर नल त्वं क्वासि मम दमयन्त्या अयं विधिः। वनगमनादि स्ते यशस्यो न यशसे न। हे प्रिय अस्तेन त्यक्तेन स्वजनेन स्वबन्धुना कृत्वा क्वद्म कपटं विशसि प्राप्नोषि। भृतेन पालितेन तेन स्वजनेन शस्यः स्तुत्यो भवसि। स्वबन्धुपालनेन कीर्त्तिरुदयस्तत्तु त्वया न कृतमिति भावः ॥ ५ ॥

कोप्यूचेदिति। तेष्वन्वेषकेषु मध्ये कोप्यन्वेषकजनः इतनयायाः इतः प्राप्तौ ज्ञातौ वानयौ यया तादृश्याः ज्ञातनौते र्नृपस्य भीमस्य तनयायाः पदं स्थानमेत्य ऊचे उक्तवान्। हे दमयन्ति त्वां भीर्भयं मुञ्चेत् त्यजेत्। अर्त्तिः पीडा च न यायात् न गच्छेत् भयमर्त्तिश्च न भविष्यतीति यावत्। या अर्त्तिः चेतनया बुद्ध्या दुःसहा सोढुमशक्या। हे दमयन्ति त्वां भयं पीडा च हास्यति। नलो मया लक्षित इत्यवोचदिति भावः। पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु। भीतिर्भीः साध्वसम्भयम्। मुच्लृ मोक्षण इत्यस्यात्मने पदे शेमुचादीनामितिनुमि मुञ्चेतेति रूपम्। मति र्मनीषा बुद्धिर्धी र्द्धिषणा ज्ञप्तिचेतने इति हेमचन्द्रः। अर्त्तिः पीडा धनुः कोट्योरित्यमरः॥ ७ ॥

निजधामेतंसमयामृतुपर्णंआवितोऽर्थमेतंसमया।
सचिवसमेतंसमयागिरोत्तरंनाजनिष्टमेतंसमया॥

निजधामेतं समयां ऋतुपर्णं आवितः अर्थं एतं सः मया।
सचिवसमेतं समया गिरा उत्तरं न अजनिष्ट मेतं समया॥ ८ ॥

निजेति। हे दमयन्ति निजधामेतं निजस्थानमयोध्या तत्रेतं तत्र स्थितं अयोध्याधीशम् ऋतुपर्णम् ऋतुपर्णनामानं राजानं समया समागतः। स च मया एनं अर्थं वसनस्तैन्यादिरूपमर्थं वाच्यं समया सश्रीकया समया अनतिनिम्नोन्नतया गिरा वाचा आवितः सचिवसमेतं मन्त्रिसमेतं तथा

मेतं मां लक्ष्मीं इतं प्राप्तं ऋतुपर्णं समया मन्त्रिसहितस्य ऋतुपर्णस्य समीपे उत्तरं प्रतिवाक्यं नाजनिष्ट न जातम्। हे भैमि वमनस्त्वेयादिकं त्वदुक्तं श्रावित ऋतुपर्णः। मन्त्रिसहितस्य तस्य समीपे उत्तरञ्च नावाप्तमिति भावः। अभितः परितः समयेति द्वितीया ऋतुपर्णमिति। मन्त्री धी सचिवोऽमात्यः। समयामिति यातेर्लङि। समयान्तिकमध्ययोरिति मेदिनीकरः। अजनिष्टेति दीपजनेत्यादिना चिण् तद्विकल्पे रूपम्॥ ८॥

दीनानायतनस्थोनानायतनक्षमोऽस्यसौत्येधिकृतः।
नानायतनकरो लीनानायतनः पथ्युवाचाथ रहः॥

दीनानायतनस्थः नानायतनक्षमः अस्य सौत्येधिकृतः।
ना अनायतनकरः लीनान् आयत नः पथि उवाच अथ रहः॥ ९॥

दीनेति। अथानन्तरमस्य ऋतुपर्णस्यायतनं गृहं तत्रस्थितः सौत्ये सारथ्येऽधिकृतः। अनायतनकरः न आयतौ दीर्घौ करौ हस्तौ यस्य तादृशः कुब्जो ना पुरुषः पथि लीनान्मार्गे लग्नान् गच्छतः नोऽस्मान् दीनान् दुःखितान् रहः विविक्ते आयत आगतवान् इति उत्तरश्लोके वक्ष्यमाणं च उवाच अवादीत्। कीदृशः? नानायतनक्षमः नानाप्रयत्नसमर्थः त्वदुक्तं श्रावयित्वाऽप्राप्तोत्तरान्मार्गे गच्छतोऽस्मान् सङ्कुचितकरस्तत् सूतो रहसि एत्येदं उवाचेति भावः। गुणवचनब्राह्मणादिभ्यः कर्मणि चेतिष्यञि

सौत्यः । सूतस्त्वष्टरि सारथौ । आयतेत्ययगताविल्यस्य लङि । मङ्गला-नन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ । रहोन्तिकमुपह्वरे । यद्वा दीनानायतन-स्य इतिनलविशेषणं निश्वासौ अनायतनस्थः असम्यगायतनस्थस्येति ता-दृश इत्यर्थः ॥ ९ ॥

दीनायानायतयाविवाससेऽस्मैविहीनयानायतया ।
नखलुधियानायतयाक्रोधव्यन्धर्म्मनिश्चयानायतया॥

दीनाय अनायतया विवाससे अस्मै विहीनयानाय तया ।
न खलु धिया अनायतया क्रोधव्यं धर्म्मनिश्चयान् आयतया ॥ १० ॥

दीनेति। आगत्य किमुवाचेत्याह। दीनाय दुःखिताय अनायतया अयो धनागमः। न आयो यस्यासौ अनायस्तद्भावस्तत्ता तया धनागमर-हितत्वेन । विवाससे वस्त्रहीनाय तस्मै वसनहीनाय। एवं विहीनं त्यक्तं यानं येन तादृशाय । अनायतया अदीर्घतया अविचारपूर्व्विकया धिया बुद्ध्या तया दमयन्त्या न क्रोद्धव्यं क्रोधो न कर्त्तव्यः। खलनुनये। तया कया? या धर्म्मनिश्चयान् धर्म्मनिर्णयानयत गतवती याति धार्म्मिकी। धनागमरहितत्वेन दीनाय वसनहीनाय च तस्मै नलाय तया दमयन्त्या क्रोधो न करणीयः । दैववशादेतत् सर्व्वमभूदिति भावः। क्रुधद्रुहेर्ष्या सूयार्थनायां । यं प्रति कोप इति सम्प्रदानत्वात् चतुर्थी अस्मै इति। आयतेत्ययगताविल्यस्य लङि॥ १० ॥

कृतकर्म्मानन्त्वागतोऽस्मिवचसेतितस्यमानेनत्वा।
वेदयमानेनत्वा विप्रे च धनेषु दीयमानेनत्वा॥

कृतकर्म्मा अनेन तु आगतः अस्मि वचसा इति तस्य मानेन त्वा।
वेदयमाने नत्वां विप्रे च धनेषु दीयमानेनत्वा ॥ ११ ॥

कृतेति। प्रेष्यद्विज आह। हे दमयन्ति मानेन प्रमाणेन सत्येन तस्य पुरुषस्य अनेन वचसा वचनेन कृतकर्म्मा कृतकार्य्योऽहं त्वा त्वां प्रत्यागतोस्मि इति वेदयमाने बोधयति द्विजे ब्राह्मणे नत्वा नमस्कृत्य धनेषु दीयमानेनत्वा दीयमानमिनत्वं स्वामित्वं यथा तादृशी। धनेषु दत्तस्वामित्वासासीदित्यर्थः। अहं तस्य पुरुषस्य सत्येन वचसा कृतकृत्यस्त्वत्समीपमागत इति वदति विप्रे नमस्कृत्य बहुधनस्वामित्वं अकार्षीदित्यर्थः। इनः सूर्य्ये प्रभौ राज्ञि। अत्रेयं पुराणवार्त्ता। दमयन्ती च नाना स्तुतिं कृत्वा पर्णादनामानं ब्राह्मणम् ऋतुपर्णराजसारथिनिकटे श्लोकचतुष्टयं दत्वा प्रेषयामास स च तत्र गत्वा तस्मै श्लोकान् ददौ। श्लोका यथा।

क नु त्वं कैतवश्छित्वा वस्त्रार्द्धं प्रस्थितो मम।
उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय॥ १ ॥
सा वै यथा समादृष्टा तथास्ते त्वत्प्रतीक्षिणी।
दह्यमाना भृशं बाला वस्त्रार्द्धेनाभिसंवृता॥ २ ॥

अस्या रुदन्त्याः सततं तेन शोकेन पार्थिव ।
प्रसादं कुरु वै वीर प्रतिवाक्यं ददस्व च ॥ ३ ॥
मा कुरुष्व प्राणनाथ विफलं जीवनं मम ।
यदि तिष्ठन् न वक्तासि स्त्रीहत्या त्वामभिस्पृशेत् ॥ ४ ॥

इति पर्णादब्राह्मणाद् वृत्तान्तं श्रुत्वा नल उवाच ।

क्व नु सा क्षुत्पिपासार्त्ता श्रान्ता शेते तपस्विनी ।
स्मरन्ती तस्य मन्दस्य कं वा साद्योपतिष्ठते ॥

इति कथयित्वा श्लोकपञ्चकं प्रस्थापयामास । यथा

वैधव्यमपि संप्राप्य गोपयन्ति कुलस्त्रियः ।
आत्मानमात्मना सद्यो जितस्वर्गा न संशयः ॥ १ ॥
रहिता भर्त्तृभिः सद्यो न क्रुध्यन्ति कदाचन ।
प्राणांश्चारित्रकवचान् धारयन्ति कुलस्त्रियः ॥ २ ॥
विषमस्थेन मूढेन परिभ्रष्टसुखेन च ।
यत्तातेन परित्यक्ता न तत्र क्रोद्धुमर्हसि ॥ ३ ॥
प्राणयात्रां परिप्रेप्सोः शकुनै र्हृतवाससः ।
आधिभि र्हन्यमानस्य न श्यामा क्रोद्धुमर्हसि ॥ ४ ॥
सत्कृतासत्कृता वापि पतिं दृष्ट्वा यथागतम् ।
राज्यभ्रष्टं श्रिया हीनं न श्यामा क्रोद्धुमर्हसि ॥ ५ ॥

इति श्लोकपञ्चकं नीत्वा आगत्य दमयन्तीं श्रावयामास पर्णाद इति ॥ ११ ॥

तत्रापर्णायततस्तनयाद्भैमी तपस्यपर्णायतत ।
तुलितसुपर्णायततस्तस्यागमनायसर्त्तुपर्णायततः ॥

तत्र अपर्णाय ततस्तनयात् भैमी तपसि अपर्णा अयतत ।
तुलितसुपर्णाय ततस् तस्य आगमनाय सर्त्तुपर्णाय ततः ॥ १२ ॥

तत्रेति । ततस्तदनन्तरं तत्र तस्मिन् काले ततो ऽयोध्यायाः पञ्चम्यास्तसिल् सर्त्तुपर्णाय ऋतुपर्णसहिताय तस्य नलस्यापर्णाय अपगतमृणं यस्मिन् तादृशाय नलप्रेरितहयानामेकदिवसेन बहुयोजनाध्वलंघनादृणापगमः । तुलितः सुपर्णो गरुडो येन तादृशाय आगमनाय तपसि शरीरसन्तापलक्षणे एकभक्तोपवासादौ अपर्णापार्वती इव भैमी दमयन्ती ततस्तनयात् ततो विस्तृतो यः स्तनयः स्तनीति स्तस्मादयतत यत्नं समास्थितं । तदनन्तरं दमयन्ती बहुविशालस्तनीते रयोध्यातो नलस्य सर्त्तुपर्णस्यागमनाय यत्नं कृतवतीति भावः । स्यादृणं पर्युदञ्चनम् । ऋणमाधमर्ण्य इति निपातः । यतीप्रयत्न इत्यस्य लङि ॥ १२ ॥

साकृतसामान्येनश्रावितवत्यमुमनन्यसामान्येन ।
स्वंरहसामान्येनस्वयंवरंस्मरतिनाञ्जसामान्येनः ॥

सा कृतसामा अन्येन श्रावितवती अमुं अनन्यसामान्येन ।
स्व रहसा मान्येन स्वयंवरं स्मरति न अञ्जसा मानी एनः ॥ १३ ॥

साकृतति। कृतसामा कृतं साम सान्त्वं यया तादृशी सा ऽनन्यसामान्येन अन्यासाधारणेन । अन्येनापरेण मान्येन पूज्येन विप्रेणामुं ऋतुपर्णं रहसा एकान्तेन स्वं स्वकीयं स्वयंवरं आवितवती अशिश्रवत् पूर्वपरिणीता परिणयनान्तरं कर्त्तुं कथं प्रवर्त्तते तत्राह। मानी अभिमानी अक्षमा झटिति एनः पापं न स्मरति । सा दमयन्ती अन्येन केनापि द्विजेन स्वं स्वयंवरमुपह्वरे ऋतुपर्णं आवितवती। यतो मानी झटिति पापं न स्मरति। ऋतुपर्णः स्वयंवरं श्रुत्वा शीघ्रमेष्यति तेन सह नलोप्यागमिष्यतीति भावः । स्वाग्झटित्यञ्जसाह्नाय द्राक मंक्षुसपदि द्रुते । स्वोज्ञातावात्मनि स्वास्त्रिष्वात्मीये स्वोस्त्रियान्धने इत्यमरः । अत्रेयं पुराणवार्त्ता । दमयन्ती मातरमुवाच। सुदेवो यातु ऋतुपर्णं वदतु भैमी पुनःस्वयंवरं करिष्यति स तु स्वोभावी यदि द्रष्टुमिच्छा तदागच्छ तत् श्रुत्वा तन्माता तथाकरोत्। ऋतुपर्णोऽपि सुदेवात् तच्छ्रुत्वा गमनं निश्चित्य नलेन परामृषत इति ॥ १३ ॥

रहसितदासन्नाहस्थितःस्मसनलंयुतोमदासन्नाह।
श्रीस्तुमदासन्नाहस्फुटंप्रयामोव्रजेदितिव्युदासन्नाहः॥

रहसि तदा सन्नाहस्थितः स्म सः नलं युतः सुदा सन् आह ।
श्रीः तु मदासन्ना ह स्फुटं प्रयामः व्रजेत् इति व्युदासं न अहः ॥ १४ ॥

रहसीति । तदा सुदेवात् स्वयंवरवृत्तान्तश्रवणकाले स ऋतुपर्णः

सन्नाहस्थितः सन्नाहे कवचे स्थितः बद्धकवचः मुदा हर्षेण युतः रहसि एकान्ते नलं इति आह उवाच इतीति किं ? हे सन् पूज्य अह्नः दिनं व्युदासं नाशं न व्रजेत् न गच्छेत् वयं दमयन्तीपुनःस्वयंवरे स्फुटं प्रव्यक्तं प्रयामो गच्छामः । श्रीस्तु लक्ष्मीस्तु दमयन्ती लाभात् तद्रूपा वा मदासन्ना मदन्तिकगता भवेत् । ह सम्बोधने । रहसीत्यत्र हरसीति पाठे त्वं हरसि चेद्वहसि चेत्तदा स्फुटं प्रयाम इत्यर्थः । क्वचित्तु द्वितीय-चरणे स्मरयुतो नलं मुदा सन्नाह इति पाठस्तत्र स्मरयुतः सन् कामार्त्तः सन् मुदा हर्षेण नलं आह इत्यर्थः । हे नल मां चेद्धरसि तदाद्य प्रयामो भीमपुरं दिवसो न नाशं व्रजेत् । अद्यैव मां नय दमयन्तीं वरितुं गन्तव्यमेवेति भावः । असगताविव्यस्यानेकार्थत्वात् । हरसि हृञो लटि । व्रजेत् व्रजेर्लिङि । समीपे समयासन्नसंनिकृष्टसनीडवत् ॥ १४ ॥

सावनिताबध्वानःस्वगुणैःकर्षतिकेहृताश्वबध्वान ।
समहस्तावद्ध्वानःश्वइतियोजनशतंमितावध्वानः ॥

सा वनिता बध्वा नः स्वगुणैः कर्षति के हृताः च बध्वा न ।
समहः तावत् ध्वानः श्वः इति योजनशतं मितौ अध्वा नः ॥ १५ ॥

सेति । सा वनिता भैमी स्वगुणैरात्मगुणै र्बध्वा संयम्य नोऽस्मान् कर्षति आकर्षति । यमके ववयोरैक्यं न दोषाय । डलयो रलयोश्चैव शसयो र्बवयोस्तथा । वदन्त्येषां हि सावर्ण्यमलंकारविदो जनाः इत्यालंकारिकवचनात् । च पुनर्बध्वा स्त्रिया केन हृताः । अपि तु

सर्व एव हृता इति भावः। स मह स्तावत्सखयम्वरोत्सवः तावत् श्वः आगामि दिवसे इत्यनेन प्रकारेण ध्वानः लोकध्वनिः लोकवार्त्तास्तीति यावत्। नः अस्माकं अध्वा मार्गः योजनशतं मितौ प्रमाणे वर्त्तते। हे वाङ्क भैमी-स्वयंवरः श्वो भवितेति लोकवार्त्ता अस्माकं मार्गः शतयोजनमितः अतः शीघ्रं रथं सज्जीकुरु इति भावः। नारी सीमन्तिनी बधूः। बध-बन्धन इत्यस्मात् क्त्वा बध्वेति। कृषविलेखन इत्यस्माद्ग्रीवादिकात्सटि कर्षतीति। मह उद्भव उत्सवः। ह्योगते ऽनागते ऽह्नि श्वः परश्वस्तु परेद्यवि। अयनं वर्त्ममार्गाध्वपन्थान इत्यमरः ॥ १५ ॥

तत्त्वरयामायामः प्रणयेर्यदिमानितत्रियामायामः।
नलजायामायामस्त्वेत्यूचे क्व दुर्द्धियामायामः ॥

तत् त्वरया अमा यामः प्रणयेः यदि मा अनितत्रियामायामः।
नलजायामायां अस्त्वा इति ऊचे क्व दुर्द्धियां आयामः ॥ १६ ॥

तत्त्वरेति। हे सूत तत् तस्मात् अनितत्रियामायामः अनितो ऽप्राप्तः त्रियामाया रात्रे र्यामः प्रहरो येन तादृक् त्वं त्वरया संभ्रमेण मा मां यदि प्रणये र्नयसि तदा अमा समीपं सह वा यामो गच्छाम इति। अनेन प्रकारेण नलजायामायां नलजाया या दमयन्त्याः मायां व्याजमस्त्वा अविचिंत्य ऊचे। यतो दुर्धियां दुष्टाः कामक्रोधवशा

क्रान्ताश्च ता धियश्चेति तासां दुष्टबुद्धीनामायामो दैर्घ्यविचारपरम्परा क्व कुत्र ? अपि तु कुत्रापि न । अथवा दुष्टाः धियो येषां ते तादृशानां पुंसामायामो विचारदैर्घ्यं क्व ? क्वचित्तु दुर्द्धियामित्यत्र युवधियामिति पाठः तत्र यूनां तरुणानां धियां बुद्धीनां क्व आयामो दैर्घ्यं ? अपि तु क्वापि नेत्यर्थः । रात्रिप्रहरमध्ये मां यदि नयसि तदा भैमीस्वयंवरं व्रजामीत्युक्तवान् । दमयन्तीव्याजमजानान एवेति भावः । दैर्घ्यमायाम आरोहः । अस्मदो द्वयोश्चेत्येकत्वे बहुवचनम् । संभ्रमस्त्वरा । अमा सह समीपे च । प्रणयेरिति णौञोलिङि । मान्तामौ द्वितीयाया इति मादेशः ॥ १६ ॥

मां भजमानाश्वःस्यान्नूनमसौ तत्प्रणोद्यमानाश्वःस्यां ।
इतिमतिमानाश्वस्यान्यायमनाशंक्यविक्रतिमानाश्वस्यां।

मां भजमाना श्वः स्यात् नूनं असौ तत्प्रणोद्यमानाश्वः स्यां ।
इति मतिमान् आश्वस्य अन्यायं अनाशंक्य विक्रतिमान् आशु अस्यां ॥ १७

मामिति । आदिकुलकं तत्प्रचोद्यमानाश्वः तेन बाहुकेन प्रचोद्यमानाः प्रेर्यमाणा अश्वा यस्य एतादृक् चेत् स्यां भवेयं तदा ऽसौ दमयन्ती श्वो नूनं निश्चयेन मां भजमाना आश्रयन्ती स्यादिति मतिमानेवं बुद्धिसहितः स ऋतुपर्णः अस्यां दमयन्त्यां अन्यायं परस्त्यभिलाषलक्षणमनाशंक्य आश्वस्य आश्वासं प्राप्य आशु शीघ्रं विक्रतिमान्

मनोविकारवानित्यूचे इति पूर्वश्लोकेनान्वयः। यद्यसौ मां नयति तर्हि श्वः सा मां वृणोतेति परस्त्यभिलाषमबुध्वा विकारवान् नलं तथोवाचेति भावः। नूनं तर्केऽर्थनिश्चये। यद्वा मतिमान् नलः मनसि आश्वस्य स्वयंवरवार्त्तां श्रुत्वा उत्पन्नकोपं विचारेण शमयित्वा अस्यां दमयन्त्यां अन्यायं अनाशङ्क्य अमत्वा चेत् यदि प्रचोद्यमानाश्वः स्यां तदा असौ दमयन्ती श्वः प्रातःकाले भजमाना स्यात् इति हेतोः आशु शीघ्रं विकृतिमान् रोमाञ्चितः स्यात् बभूवेत्यर्थः॥ १७॥

अथरथमारावन्तंशस्त्राणिनलःशुभाश्वमारावन्तं।
सजगामारावन्तंनृपतिमारोप्यचगुरुतमारावन्तं॥

अथ रथं आरावन्तं शस्त्राणि नलः शुभाश्वं आर अवन्तं।
सः जगाम अरौ अन्तं नृपतिं आरोप्य च गुरुतमारावं तं॥ १८॥

अथेति। अथ वचनानन्तरं नलः आरावन्तं आ समन्तात् अरं शीघ्रगं अवन्तं। यद्वा अरनं आरः शीघ्रगतिः तं अवन्तं रक्षन्तं। यद्वा आ समन्तात् अरं शीघ्रं अवन्तं गच्छन्तं। यद्वा अस्य विष्णोः अरं चक्रं आरन्तमिव अवन्तं गच्छन्तं अतिशीघ्रगमित्यर्थः। तं शस्त्राण्यायुधानि अवन्तं रक्षन्तं शुभाश्वं शोभना अश्वा यस्मिन् तादृशं गुरुतमः गरिष्ठतम आरावः शब्दो यस्य तादृशं रथं आर गतवान्। च पुनः अरौ शत्रौ अन्तं नाशकं तं नरेन्द्रमृतुपर्णं रथमारोप्यारोप्य जगाम

भीमनगरं गतवान्। ऋतुपर्णवचनोत्तरमृतुपर्णं रथमारोप्य कुण्डिन-नगरं अनयदिति भावः। जगामेति गमेर्लिटि अन्तोऽध्यवसिते मृत्यौ स्वरूपे निश्चये ऽन्तिके। अरं शीघ्रे च चक्राङ्गे शीघ्रगे पुनरन्यवत् इति मेदिनीकरः १८ ॥

स्वांसकृतावसनस्यक्षणदूरत्वेनसङ्गतावसनस्य।
भूभर्त्तावसनस्यव्यस्मयतरथद्रुतेर्धुतावसनस्य॥

स्वांसकृतावसनस्य क्षणदूरत्वेन सङ्गतौ असनस्य।
भूभर्त्ता वसनस्य व्यस्मयत रथद्रुतेः धुतौ असनस्य॥ १९ ॥

स्वांसेति। भूभर्त्ता ऋतुपर्णः स्वांसकृतावसनस्य स्वस्यांसे स्कन्धे कृतं आवसनमाच्छादनं येन तादृशस्य वसनस्य रथद्रुतेः रथवेगात् उत्पन्नस्य असनस्य वायो धुतौ कम्पे सति असनस्यासनवृक्षस्य सङ्गतौ सङ्गमे क्षण-दूरत्वेन क्षणादेव बहुयोजनान्तरितत्वेन व्यस्मयत विस्मितो बभूव। नलप्रेरितरथवेगवशोद्भवमरुद्धूतोत्तरीयस्य क्षणदूरत्वादृतुपर्णो ऽद्भुताय मानमना अभूदिति भावः। स्कन्धो भुजशिरोंऽसोऽस्त्रीत्यमरः। अस्यतीत्य-सनो वायुः समीरपर्य्यायः। यद्वा स्वांसकृता वसनस्येत्यस्य स्वांसे स्वस्कन्धे कृतं अवसनं अस्थिति येन तस्य रथवेगोद्भूतवायुनोड्डीयमान-स्येत्यर्थः। अचेयं पुराणवार्त्ता। स्वांसादुत्तरीये भ्रष्टे राजा वाहुकं

उवाच । अश्वान् संयच्छ वार्ष्णेयनामाऽपरसारथिः उत्तरीयमानयतु। बाहुक उवाच । बहुयोजनान्तरितं तदतो नानेतुं शक्यमिति ॥ १९ ॥

फलगणनादक्षस्यव्यधित तदासोश्वनोदनादक्षस्य।
तपसि च नादक्षस्य प्रहर्षणं हृदयबोधनादक्षस्य॥

फलगणनात् अक्षस्य व्यधित तदा सः अश्वनोदनादक्षस्य।
तपसि च ना दक्षस्य प्रहर्षणं हृदयबोधनात् अक्षस्य ॥ २० ॥

फलेति। स ना पुरुष ऋतुपर्णः अक्षस्य द्यूतस्य हृदयबोधनात् हृदयज्ञानाद्धेतोः अक्षस्य कलिद्रुमस्य फलगणनात् फलपरिसंख्यानात् अश्वनोदनादक्षस्य अश्वानां नोदना वाहनं तत्र दक्षस्य चतुरस्य तपसि च तपोविषये दक्षस्य दक्षप्रजापतिसदृशस्य नलस्य प्रहर्षणमाह्लादनं व्यधित चक्रे। यतोयं राजा फलगणनादक्षः अतः पाशकगणनाकोविदोपि स्यात् एतां विद्यां नीत्वा पुन र्जेष्यामीति कृत्वा नलस्य महाहर्षोभूदिति पर्यवसितार्थः। स ऋतुपर्णो विभीतकफलस्येयत्ता कथनादश्वहृदयज्ञस्य नलस्य प्रहर्षणं मन आह्लादयाञ्चकारेति भावः। त्रिलिंगस्तु विभीतकः। अक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः। व्यधितेति धाञो लुङि स्थाघ्वोरिच्चेतीत्वे ह्रस्वादिति सिज्लोपरूपम्। अत्रेयं पुराणवार्त्ता। ऋतुपर्णो विभीतकवृक्षं दृष्ट्वा बाहुकमुवाच। ममाच गणनाकौशलं पश्य अस्मिन् वृक्षे पतितं पत्रमेकाधिकशतं

फलञ्च तावदेव पतितं स्थितानि पत्राणि पञ्चकोट्यः फलानि द्वे सहस्रे। वाहुक उवाच । वार्ष्णेयरश्मीन् संयच्छ अहं राजगणितं गणयिष्यामि ततो नलस्तद्गणयित्वा आह अत्यद्भुतमिदं इमां विद्यां मह्यं देहि मत्तोऽश्वहृदयविद्यां गृहाण इति परिवर्त्तितम् । तदाह॥ २० ॥

बलजितदेवार्य्याभ्यां विद्याविनिमयोयुगपदेवार्य्याभ्यां ।
संमर्देवार्य्याभ्यां व्यधायि संस्पृश्य सम्पदेवार्य्याभ्यां॥

बलजितदेवार्थ्याभ्यां विद्याविनिमयः युगपत् एव आर्य्याभ्यां।
संमर्दे अवार्थ्याभ्यां व्यधायि संस्पृश्य सम्पदे वारि आभ्यां ॥ २१ ॥

बलेति। अथ रथवेगफलगणनकौतुकदर्शनानन्तरं बलजितदेवार्थाभ्यां बलेन सामर्थ्येन जितः पराजितो देवार्य्यः देवस्वामीन्द्रो याभ्यां तादृग्भ्यामाभ्यां नलर्त्तुपर्णाभ्यां संमर्दे रणे ऽवार्याभ्यां निवारयितुमशक्याभ्यां युगपदेव एकवारमेव वारि जलं संस्पृश्य सम्पदे श्रिये विद्याविनिमयो विद्यापरिवर्त्तनं व्यधायि विहितः। अथ नलर्त्तुपर्णौ रथादवतीर्य्य आचम्य विद्याग्रहणं परस्परञ्चक्रतुरिति भावः। व्यधायीति । धाञोलुङि चिणि आतो युक्चिण्कृतोरिति युकि सति रूपम् ॥ २१ ॥

तदनु द्रुतमक्षमतःस्वीकृत्याक्षदहनेधिकतमक्षमतः ।
कलिरुन्नतमक्षमतःस्फुटमेवगतोनलस्तुनतमक्षमत ॥

तदनु द्रुतं अक्षं अतः स्वीकृत्य अक्षदहने अधिकतमक्षमतः ।
कलिः उन्नतं अक्षं अतः स्फुटं एव गतः नलः तु न तं अक्षमत ॥ २२ ॥

तदिति । तदनु ततः पश्चात् स्फुटं प्रत्यक्षं अक्षदहने कलिदहने ऽधिकतमक्षमतः अत्यन्तसमर्थात् । अतोऽस्मात् नलसकाशात् कलिर्द्रुतमेव उन्नतं उच्चैस्तरं अक्ष विभीतकवृक्षं श्रितः प्राप्तः । पुनः नलः अतः ऋतुपर्णादक्षं स्वीकृत्य अक्षज्ञानं प्राप्य तं कलिं न अक्षमत न विषेहे । ऋतुपर्णादक्षहृदयं प्राप्य कलिं यावद् भस्मसात्करोति तावत् नलाद् विनिर्गत्य विभीतकतरुमभिश्रयत् नलस्तु तस्मै चुकोपेति भावः । पश्चात् सादृश्ययोरनु । लघुक्षिप्रमरन्द्रुम् । अक्षमतेति क्षमुष् सहने ऽस्मात् लङि ॥ २२ ॥

पतितमलसमेतस्याभैम्यारुषिविद्धिमानलसमेतस्याः ।
आर्त्त्यनलसमेतस्याश्रितस्यशरणप्रदोनलसमेतःस्याः ।

पतितं अलसं एतस्याः भैम्याः रुषि विद्धि मा अनलसमे तस्याः ।
आर्त्त्यनलसमेतस्य आश्रितस्य शरणप्रदः नल सः मे अतः स्याः ॥ २३ ॥

पतितमिति । कलि नलमाह । हे नल एतस्यास्तव हृदये विद्य-

मानायास्तस्या भैम्या अनलसमे ऽग्निसदृशे रुषि रोषे पतितमत एवालसं दुःखितं मां विद्धि जानीहि। आर्त्त्यनलसमेतस्य आसमन्ताद् या अर्त्तिः पीडा सैवानलस्तत्समेतस्य संयुक्तस्य आर्त्तिबलसमेतस्येति पाठे आर्त्तेः पीडाया बलेन आधिक्येन समेतस्येत्यर्थः। मे मम आश्रितस्य आश्रयवतः। अतः दमयन्तीक्रोधात शरणप्रदः प्राणत्राणदाता स त्वं स्याः भवेः आः पीडायां। दमयन्तीरोषाग्निना दह्यमानं माम्प्रति किं रोषं करोषि? भैमीकोपज्वलितस्य मे शरणं भवेति भावः। आस्तुस्यात्कोपपीडयोः। अर्त्तिः पीडा धनुः कोट्योः ॥ २३ ॥

कलिमितिनानामायंनमन्तममुञ्चन्महामनानामायं।
कीर्त्तिधनानामायंसदधातिहरन्तिरिपुजनानामायं ॥

कलिं इति नानामायं नमन्तं अमुञ्चत् महामनाः नाम अयं।
कीर्त्तिधनानां आयं सः दधाति हरन्ति रिपुजनानामाः यं ॥ २४ ॥

कलीति। इत्यनेन प्रकारेण नमन्तं प्रणमन्त नानामायं नानाव्याजं कलिं महामना महाशयोयं नलो ऽमुञ्चत् त्यक्तवान्। नामसम्भावनायाम्। यं पुरुषं रिपुजनानामाः शत्रुजननमस्काराः हरन्ति आकर्षन्ति स पुमान् कीर्त्तिधनानां यशोलक्षणद्रविणानामायं दधाति धारयति। एवं बहुधा नमस्कुर्व्वन् तं कलिं कारुणिकतया ऽत्यजत्। यतः शत्रुनतयोयं वशयति सयशो धनवान् भवतीति। मुञ्चमोचय इत्येतस्य लङि

अमुञ्चदिति। नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने। अत्रेयं भारत-वार्त्ता। अचहृदयं गृहीतवतो नलस्य देहात् कर्कोटकनागविषं वमन् कलिर्निःसृतः तं कलिं नलः शप्तुमुद्यतः। ततोऽतिभीतः कलि र्नलमुवाच त्वं मे शरणम्भव मा शपस्व ये जनास्त्वां कीर्त्तयिष्यन्ति तेषां मत्तो न भयं भवेत्। अहममुं विभीतकवृत्तं प्रविशामि ततः कारणात् नलस्तं अचमत। ततो विभीतकवृत्तं स प्रविवेश ततः प्रभृतिविभीतक वृक्षच्छायापि न गृह्यते इति॥ २४ ॥

अथनुन्नाश्वस्तेन प्रास्थित राजामहात्मनाश्वस्तेन।
साललनाश्वस्तेनस्यादितिहसताविरोधिनाश्वस्तेन॥

अथ नुन्नाश्वः तेन प्रास्थित राजा महात्मना स्वः ते न।
सा ललना आश्वस्तेन स्यात् इति हसता विरोधिना आशु अस्तेन॥ २५॥

अथेति। अथ कलिगमनान्तरं विरोधिना कलिना शत्रुणा आशु शीघ्रं अस्तेन त्यक्तेन। आश्वस्तेन विश्रान्तवता दुःखाद् वा आश्वस्तेन आश्वासं प्राप्तवता महात्मना महाप्रभावेण। सा ललना भैमी स्व आगा-मिदिने ते तव किन्नस्यादपि तु स्यादेवेति व्याजेन सा तव स्त्री न स्यात् न भविष्यतीति मनसि कृत्य हसता तेन नलेन नुन्नाश्वः प्रेरित-हयः स राजा ऋतुपर्णः प्रास्थित प्रचचालेति यावत्। विद्योपदेश-स्थानात् शेषमार्गमवगाहतेति भावः। नुन्ननुत्तास्तविष्णूता विद्धचिप्ते-

रिताः समाः । समवप्रविभ्यः स्थ इत्यात्मने पदे स्थाघ्वोरिच्चेतीत्वे सिचो लोपे लङि रूपम्प्रास्थितेति । उपसर्गेण धात्वर्थो बलादन्यत्र नीयत इति स्थित्यर्थस्य प्रपूर्वत्वे तद्विरुद्धार्थत्वम् । श्वोगते ऽनागते ऽह्नि श्व इत्यमरः ॥ २५ ॥

सोऽयमनेनायततामिष्ट इति नलः समन्वनेनायततां
वहति दिनेनायततां पुरीम्प्रियेणाश्रिताञ्जनेनायततां

सः अयं अनेना यततां इष्टः इति नलः समं तु अनेन आयततां ।
वहति दिने अनायततां पुरीं प्रियेण आश्रितां जनेन आयत तां ॥ २६ ॥

सोऽयमनेनेति । अयं कलिमुक्तो ऽनेना निष्पापो नलः यततां यतीनां इष्टः वल्लभः । यद्वा इष्टे ऽभीप्सिते दमयन्तीदर्शने यततां यत्नं करोतु इति हेतो र्दिने दिवसे ऽनायततां अदीर्घतां वहति सति धारयति सति स नलो ऽनेन ऋतुपर्णेन समं सह आयततां धनागमव्याप्तां प्रियेण जनेन दमयन्त्याश्रितां तां पुरीं कुण्डिनाख्यां आयत आगच्छत् आगत गतवान् । कलिमुक्तो नलो भैमीं पश्यत्वितीव सकरुणे दिने ऽस्तं गच्छति सति ऋतुपर्णेन सह नलः कुण्डिनपुरं प्रविवेशेति भावः । अयतेऽयगतावित्यस्य लङि । दैर्घ्यमायामः । वहप्रापण इत्यस्य शतरि-रूपं वहतीति ॥ २६ ॥

कर्त्तुम्मानन्तेनश्रमइतिनीतोभुवोऽयमानन्तेनः।
खन्धामानन्तेनप्रेम्णा भीमेन जितविमानन्तेन ॥

कर्त्तुं मानं ते न श्रमः इति नीतः भुवः अयं आनन्ता इनः।
खं धाम अनन्तेन प्रेम्णा भीमेन जितविमानं तेन ॥ २७ ॥

कर्त्तुमिति। तेन भीमभूपेन ते तव श्रमो मार्गोद्भवपरिश्रमो माभूदित्युक्त्वा स्वागतमाभाष्य आनन्ता कृतनति दर्शितनम्रतोऽयं भुवः भूमेरिनः प्रभु ऋतुपर्णो मानं पूजां संमानं वा कर्त्तुं विधातुं जितविमानं जितानि विमानानि व्योमयानानि येन तादृशं खं स्वकीयं धाम गृहम् । अनन्तेन बहुतरेण प्रेम्णा स्नेहेनानीतः प्रापितः। तदनन्तरं कृतानतिः ऋतुपर्णस्तेन भीमेन विमानसुन्दरं स्वसौधं पूजयितुमानिन्य इति भावः। इनः सूर्य्ये प्रभौ। प्रेम स्नेहः। व्योमयानं विमानोऽस्त्रीत्यमरः। धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोरिति हैमः। यद्वा तेन भीमेन अयं ऋतुपर्णः अर्थादस्य श्रमो मार्गोद्भवः श्रमः इति हेतोः स्वधाम नीतः कथम्भूतेन? मानन्तेन मायाः लक्ष्म्याः अन्तं विनाशाभावो यस्य तेन स्थिरलक्ष्मीकेणेति यावदित्यर्थः॥ २७ ॥

सज्जनतामहितस्यव्यग्रेतरलोकसूचितामहितस्य।
सहिषतामहितस्य द्रुतं पुरस्येक्षणात्ततामहितस्य ॥

सज्जनतामहितस्य व्यग्रेतरलोकसूचितामहितस्य ।
स द्विषतां अहितस्य द्रुतं पुरस्य ईक्षणात् ततामहितस्य ॥ २८ ॥

सज्जनतेति । स ऋतुपर्णः सज्जनतामहितस्य साधुत्वेन पूजितस्य । यद्वा जनानां समूहो जनता सती चासौ जनता चेति सज्जनता तया महितस्य पूजितस्य पूजितस्येत्यर्थः । द्विषतां शत्रूणां अहितस्यानिष्टस्य तस्य भीमस्य । व्यग्रेतरलोकसूचितामहितस्य व्यग्रेतरे अव्यग्रा ये लोकास्तैः सूचिता प्रकाशिता आ समन्तात् महिता उत्सववत्ता यस्य तादृशस्य पुरस्य कुण्डिनस्येक्षणाद् आलोकनाद् द्रुतं शीघ्रं ततामग्लानिं जगाम हि निश्चये । भीमपुरसमृद्धिदर्शनात् तमितो ऽभूदिति भावः । महउद्धव उत्सवः । तमुग्लानावित्यस्य लिटि ततामेति । यद्वा स नलः ततामग्लानिं प्राप स्वदैन्यस्मरणादिति भावः । हितस्य दृष्टस्य श्वशुरस्य पुरस्य दर्शनादित्यर्थः ॥ २८ ॥

प्रथिततमायामायां शुचिरथवसतावनुत्तमायामायां ।
चारुतमायामायान्नलः स्मरन्वासमसुसमायामायां ॥

प्रथिततमायाः मायां शुचिः अथ वसतौ अनुत्तमायामायां ।
चारुतमायाम् आयात् नलः स्मरन् वासं असुसमायाः मायां ॥ २९ ॥

प्रथितेति । अथानन्तरं शुचिः पवित्रः कर्कोटकवस्त्रपरिधानात् नलः मायां लक्ष्म्या शरीरशोभायां वा प्रथिततमायाः प्रसिद्धतमायाः

असुषमायाः प्राणसमायाः दमयन्त्याः आयां व्याजं स्वयंवरमृतुपर्णाह्वानस्यागमनप्रयोजिकां स्मरन् विचारयन्। अनुत्तमायामायां अनुत्तमः श्रेष्ठ आयामो दैर्घ्यं यस्यास्तादृश्यां चारुतमायां अतिशयरुचिरायां वसतौ गृहे वासं आयात् प्राप। नलो भीमोद्दिष्टर्त्तुपर्णनिवासं दमयन्त्या व्याजं स्मरन् उत्तमां वसतिं गतवानिति भावः। प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः। वसती रात्रिवेश्मनोः। सुन्दरं रुचिरञ्चारु सुषमं साधु शोभनम्। दैर्घ्यमायामः आयादिति याते लंङि। यद्वा नलः चारुतमाया अत्यन्तसुन्दर्य्याः दमयन्त्याः वसतौ गृहे वासं मा आयात् न प्राप किन्तु रथोपरि तस्थौ। अत्रेयं पुराणवार्त्ता। नलस्तावद्भीमगृहं न ययौ किन्तु रथोपरि तस्थौ। तच्छ्रुत्वा दमयन्ती प्रासादमारुह्य नलं समीक्ष्य अतिहृष्टा बभूव इति तदेवाह॥ २९ ॥

तंस्वनयानन्तरसान्निध्यगतमवेक्ष्यनुन्नयानन्तरसा।
अभ्युदयानन्तरसावधितमुदानैषधप्रियानन्तरसा॥

तं स्वनयानन्तरसान्निध्यगतं अवेक्ष्य नुन्नयानं तरसा।
अभ्युदयान् अन्तर् असौ अधित मुदा नैषधप्रिया अनन्तरसा॥ ३०

तमिति। स्वनयानन्तरसान्निध्यगतं स्वस्यात्मनो नयो नीतिः स्वयंवरघोषणस्य ऋतुपर्णश्रावणं तदनन्तरं तदुत्तरकालाविलम्बेन सान्निध्यं समीपं गतं प्राप्तं तरसा वेगेन नुन्नयानं प्रेरितहयं तं नलं

अवेत्य ज्ञात्वा अनन्तरसा अनन्तो बहुलो रसः शृङ्गारः स्नेहानुरागो यस्यास्तादृश्यसौ दमयन्ती नैषधप्रिया नैषधो नलस्तस्य प्रिया अन्तर्मनसि अभ्युदयान् श्रेयांसि सुखानि वा मुदा हर्षेण अधित धृतवती। स्वनीत्युत्तरकालमागतं नलं बुध्वा दमयन्ती बहुलमानन्दं अवापेति भावः। शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः। अधितेति धाञो लुङि सिचि ॥ ३० ॥

तन्नुन्नालीकेन स्थीयतइत्यत्र सुमुखनालीकेन।
किंहीनालीकेनस्वकमित्राक्कत्तरिपुजनालीकेन ॥

तन्नुन्नाली केन स्थीयते इति अत्र सुमुखनालीकेन।
किं हीनालीकेन स्वकमित्रा कृत्तरिपुजनालीकेन ॥ २१ ॥

तन्नुन्नेति। कृत्तरिपुजनालीकेन कृत्तानि छिन्नानि रिपुजनानां शत्रुजनानामाली पंक्ति स्तस्याः कानि शिरांसि येन तथा सुमुखनालीकेन शोभनमुखपद्मेन हीनालीकेन हीनं त्यक्तं अलीकं पापं येन तेन तथा स्वकमित्रा स्वकामुकेन नलेन किमत्र गृहे ऋतुपर्णावाससौधे केन सुखेन स्थीयत इति हेतो स्तन्नुन्ना दमयन्त्या प्रेरिता साली केशिनी स्वस्यस्या वयस्तिं स्वसखी दमयन्ती तस्या निवासवेश्मानयते त्युत्तरश्लोकस्थेन सम्बन्धः। ऋतुपर्णावासगृहे कथं नलस्तिष्ठतीति ज्ञातुं प्रेषिता सखी तं भैमीगृहमनयदिति भावः। छिन्नं छातं लूनं कृत्तं

दातं दितं छित वृक्णं। आली सखी वयस्या च। कं शिरोंबुनोः। स्त्रीयत इति घुमास्थागापाजहातिसां हलीतीत्वम। नालीकं शरपद्मयोः। अलीकन्त्वप्रिये ऽनृते ॥ २१ ॥

तंसाम्नामानयतःपरीक्ष्यबहुधागुणाभिरामानयतः।
स्वजनगिरामानयतःस्ववयस्यावसतिमपिपरामानयत॥

तं साम्ना अमा नयतः परीक्ष्य बहुधा गुणाभिरामाः न यतः।
स्वजनगिरा मानयतः स्ववयस्या वसतिं अपि परां आनयत ॥ २२ ॥

तमिति । भैमीप्रेरिता केशिनी तं नलं साम्ना ऽमा सांत्वेन सहितं नयतः नीतितः बहुधा नानाप्रकारेण परीक्ष्य नल एवायमिति ज्ञात्वा स्ववयस्याया भैम्याः वसतिं भवनमपि परां उत्कृष्टां स्वजनगिरा दमयन्ती स्वजनानां गिरा वाक्येनानयत आनीतवती । तं कं यतः यस्मात् नलात् मानयतः लक्ष्मीः प्रापयतः अर्जयतः अन्ये केपि गुणाभिरामा गुणरमणीया न भवन्ति ? यद्वा कीदृशो नलः ? मानयतः मानेन यतः नियतः मानोत्यर्थः। पुरुषश्रेष्ठं नलं निश्चित्य भैमीप्रेषिता तद्भवनं निनायेति भावः। बंधुस्वस्वजनाः समाः। अनयतेति नीञो लङः। अत्र परीक्षायाः पुराणवार्त्ता। भैमी केशिनीमुवाच गच्छ रथान्तिके बाहुकनामाक एष अत्र मम नानाशङ्का भवति। तत्र गत्वा पर्णाद-वाक्यं श्रावय। सा गत्वा बाहुकमुवाच त्वां दमयन्ती पृच्छति यूयं किमर्थ-

मागताः । बाहुक उवाच, तस्याः स्वयंवरं श्रुत्वा अयोध्यातो एकाहेनागताः । पुनः केशिन्युवाच कस्त्वं ? वाहुक उवाच । असौ वार्ष्णेयनामा नलसूत आसीत् नले राज्याद् भ्रष्टे ऋतुपर्णमाश्रितः अहमप्यस्य सूतः। केशिन्युवाच वार्ष्णेयो नलवृत्तान्तवित् त्वं वा ? वाहुक उवाच नलं न कोऽपि जानाति। ततः केशिन्या पर्णादानीतश्लोकपञ्चकं श्रावितं। तच्छ्रुत्वा तूष्णीमास एतत्सर्वं भैम्यै सा कथयामास। भैमी पुनः तामुवाच पुनर्याहि पाकार्थं जलाग्निं विना सामग्रीं देहि। केशिनी तथा कृत्वा नलदत्तश्लोकमेकं गृहीत्वा गता श्लोको यथा ।

मम राज्यं प्रणष्टं यत् तन्नाहं कृतवान् स्वयं ।
कलिनैतत्कृतम्भीरु यच्च त्वामहमत्यजम् ॥

स कलिरिदानीं मां विमुच्य गतः। तच्छ्रुत्वा भैमी सन्दिग्धा उवाच । पुन गत्वा तच्चेष्टामनुभव । सा तथा कृत्वागत्योवाच। ईदृक् पुरुषो न क्वापि दृष्टो न श्रुतः यत्स्पर्शे स्वल्पं द्रव्यं प्रचुरं भवति कदापि शिरो न नमति। दुष्करमप्यस्य सुकरं भवति। अपरञ्च तव पित्रा मांसं प्रेरितं तस्य प्रक्षालनार्थं शून्यकुम्भः प्रेरितः स कुम्भस्तत् स्पर्शात् वारिपूर्णो बभूव तेन गृहीते तृणे अग्निः जज्वाल। अग्निः स्पृष्टो न दहति। तत्करमर्दितमपि पुष्पं न म्लायति। ततः केशिनी इन्द्रसेनं तत्पुत्त्रं इन्द्रसेनाञ्च कन्यां नीत्वा ययौ । वाहुकस्तौ दृष्ट्वा क्रोडे कृत्वा रुरोद क्षणात् तौ त्यक्त्वा ममापि सुतावीदृशौ इति जुगोप सः। वाहुकेन

पक्वं व्यञ्जनं केशिनी द्वारा आनीयास्वाद्य नलोऽयमिति निश्चयं अकरोत्। ततः केशिनीं पुनः प्रस्थाप्य नानास्तुतिं कारयित्वा गृहमानयामासेति ॥ २२ ॥

तरसैवासावासस्वां विकृतिमहेर्वहन्सुवासावास।
स्थिरभावासावासस्निग्धश्चारंस्त नृपतिवासावासः ॥

तरसा एव असौ आस स्वां विकृतिं अहेः वहन् सुवासाः वासः।
स्थिरभावा असौ आस स्निग्धः च अरंस्त नृपतिवासावासः ॥ २३ ॥

तरसैवेति। सुवासाः शोभनं वासो वस्त्रं यस्य तादृगसौ नलः अहेः कर्कोटकस्य वासो वस्त्रं वहन् परिदधत् स्वां विकृतिं विकारं कुब्जत्वैरूप्यादिलक्षणं तरसैव झटित्येव आस जहौ। सा दमयन्ती वा स्थिरभावा निश्चलस्वाभिप्राया आस शुशुभे। नृपतिवासे भीमगृहे आवासो निवासो यस्य तादृक् भीमभूपसौधगतः स्निग्धः स्नेहवान् अरंस्त रेमे दमयन्त्या सहेति शेषः। वस्त्रमाच्छादनं वासः। आसेति असुक्षेपण इत्यस्य लिटि रूपम्। द्वितीयं असगतिदीप्त्यादानेष्वित्यस्य रूपम्। अरंस्तेति रमे र्लुङि ॥ २३ ॥

नृपधामनिशान्तेनव्यतीत्यभैमीसमागमनिशान्तेन।
द्विषतामनिशान्तेनस्वपुरोदृष्टःश्रितोत्तमनिशान्तेन ॥

नृपधामनि शान्तेन व्यतीत्य भैमीसमागमनिशां तेन।
द्विषतां अनिशान्तेन श्वशुरः दृष्टः श्रितोत्तमनिशान्तेन ॥ २४ ॥

नृपेति । नृपधामनि नृपस्य भीमस्य धामनि गृहे। शान्तेन क्षमायुक्तेन श्रितोत्तमनिशान्तेन श्रितमुत्तमं निशान्तं गृहं येन तादृशेन। द्विषतां शत्रूणां अनिशं अन्तो नाशो यस्मात् तादृशेन तेन नलेन। भैमीसमागमनिशां भैमी दमयन्ती तस्याः समागमो यत्र तां निशां रात्रिं व्यतीत्य व्युत्क्रम्य श्वशुरो भीमो दृष्टः । भीमगृहे दमयन्तीं समागमरात्रिं व्यतीत्य प्रातर्भीमं अद्राक्षीदिति भावः। निशान्तवस्त्यसदनं भवनागारमन्दिरमित्यमरः । धाम रश्मौ गृहे देहे इति हेमचन्द्रः। २४ ॥

धृतजडिमानेहासीदृतुपर्णोपिप्रदृश्यमानेहासी।
आत्मसमानेहासीदभिपूज्यैनंनलोरिमानेहासी॥

धृतजडिमाना इह आसीत् ऋतुपर्णः अपि प्रदृश्यमाने हासी।
आत्मसमाने अहासीत् अभिपूज्य एनं नलः अरिमानेहासी॥ २५ ॥

धृतेति । ना पुरुष ऋतुपर्णो ऽस्मिन् आत्मसमाने नले आत्मसदृशे प्रदृश्यमाने ज्ञायमाने सति इह भीमसदसि धृतजडिमा धृतजडभाव आसीत्। यद्वा धृतजडिमा न आसीत् अपि तु जडोऽभूदित्यर्थः। काक्वर्थे नञ्। अरिमानेहासी अरीणां शत्रूणां माने हसितुं शील-

मस्येति तादृक्। यद्वा अरिमानेहासी, षोन्तकर्मणि धातोः प्रयोगः अरिमानस्य शत्र्वभिमानस्य ईहा चेष्टा तस्या नाशक इत्यर्थः। हासी हासयुतो नल ऋतुपर्णं अभिपूज्य धनमानादिना सन्तोष्य अहासीत् व्यसर्ज्जयत्। प्रातः स्वसमाने नले दृश्यमाने ऋतुपर्णो जड इवाऽभूत् हास्ययुक्तश्च नलः ऋतुपर्णं सम्पूज्य व्यसर्ज्जयत्। पृथ्वादिभ्य इमनिज्वे-तीमनिच्। आसीदित्यस्तेर्लङि। अहासीदिति हाके र्लङि। यद्वा ऋतुपर्णः कथम्भूतः? अहासी हास्यरहितः अथ वा हा इति कृत्वा आसी आसः आक्षेपस्तद्युक्तः हा त्वयि ममापराधो जात इत्याक्षेपयुक्त इत्यर्थः॥ २५॥

सासुसमस्सामासस्स्वयमत्र पुरे नलोयमासामास।
स्त्रीणामासामासश्रममपुनानायिसुमुखमासामासः॥

सासुसमासामा सः स्वयं अत्र पुरे नलः अयं आसामास।
स्त्रीणां आसां आस अमं अमुना अनायि सुमुखमासा मासः॥ २६॥

सेति। स अयं नलः अत्र पुरे भीमपुरे स्वयं आसामास तस्थौ स्वयमित्यत्र स्वैरमिति पाठे स्वैरं स्वच्छन्दं आसामासेत्यर्थः। कथम्भूतः? सासुसमासामा असुना प्राणेन समा असुसमा दमयन्ती तस्याः साम-सान्त्वन्तेन सहितो दमयन्तीकृतसान्त्वः। आसां स्त्रीणां स्वावरोधवधूनां अमं आस चिक्षेप चिरविरहजं दुःखं अपनुनोद। कीदृशेन? मुख-तुलितमासा मुखेन तुलितः समीकृतो मासश्चन्द्रो येन तादृशेन।

अमुना नलेन मासोऽनायि निन्ये। स नलो विरहपीडितस्य स्त्रीगणस्य क्लेशमपाहार्षीत् । एवं मासो व्युचक्रामेति भावः । मास्तु मासे निशाकरे इति हेमः । आसेति असुक्षेपण इत्यस्य लिटि। आगादिति णो लुङि । अत्रेयं पुराणवार्त्ता । स ऋतुपर्णस्तच्छ्रुत्वा नलं ज्ञात्वा सापराधः सन् नलमुवाच मत्कृतमपराधं क्षमस्व दिष्ट्या भार्य्यया सङ्गतोऽसि। नल उवाच नापराधस्ते कलिकृतमेवैतत् । अश्वहृदयविद्यां गृहाण स ततस्तां गृहीत्वा अन्येन सारथिना अयोध्यां ययौ । नलस्तत्र मासमेकं स्थित्वा स्वपुरं गत्वा पुष्करमुवाच इति तदेवाह ॥ २६ ॥

अथमहदाराजितयास्वपुरञ्चम्वानलस्तदाराजितया।
सासिगदाराजितया पुष्करमभ्यधादुदाराजितया॥

अथ महत् आर अजितया स्वपुरं चम्वा नलः तदा राजितया।
सासिगदाराजितया पुष्करं अभ्यधात् उदाराजितया ॥ २७ ॥

अथेति । अथानन्तरं तदा नल आराजितया अरीणां समूह आरं तेन अजितया अपराजितया सासिगदाराजितया असिसहिता गदाः असिगदा स्तासां राजिः पंक्तिस्तया सहिता सासिगदाराजित्वेन राजितया शोभितया खड्गगदाराजियुक्तत्वेन शोभितया चम्वा सेनया महत् पुरं स्वनगरं आर गतवान् । उदाराजितया उदारा महती या आजिः संग्रामस्तस्य भावस्तत्वं तेन पुष्करं अभ्यधात्

अभिगतः । स नलस्तदनन्तरं महत्या सेनया पुष्करेण संग्रामं कर्त्तुं जगामेति भावः । आरमिति तस्य समूह इत्यणिमस्येति चेतीलोपे रूपम् । पृतनानीकिनीचमूः। आरेति ऋगतावित्यस्य लिटि। वीथ्यालिरावलिः पंक्तिः श्रेणी लेखास्तु राजयः । उदारो दातृमहतोः। स्त्रियः संयत्समित्याजिसमिद्युधः॥ ३७॥

मयिगहनामायासित्वयामनोनात्रमानिनामायासि।
धनुरवनामायासि द्यूतायालं क्व चेतनामायासि॥

मयि गहना माया आसि त्वया मनः न अत्र मानिनां आयासि।
धनुरवनामाय असि द्यूताय अलं क्व चेतनां आयासि॥ ३८॥

मयीति। नलः पुष्करमाह। हे पुष्कर त्वया मयि गहना निविडा माया व्याजः आसि क्षिप्ता । क्वचित्तु मयि नानामायासि इति पाठस्तत्र नाना विविधा माया आसि क्षिप्तेत्यर्थः । त्वयात्रास्मिन् विषये मानिनां मनोहृदयमायासि आयासयुक्तं दुःखितं कृतं न अपि तु दुःखीकृतम् । नञ्काक्वर्थः। धनुरवनामाय धनुरारोपणाय युद्धाय द्यूताय वा अलमसि समर्थोसि । क्व वा कस्मिन् विषये चेतनां बुद्धिमायासि आगच्छसि धनुरारोपणं वा द्यूतं वा त्वमेकं कुरु येन ते मनो ऽभिलाषः तत् वद इत्यर्थः । असुक्षेपणे इत्यस्य चिणि लुङि आसीति । यसूपतापे ऽयायासीति। अस्तेरसीति। यातेरायासीति।

अलम्भूषणपर्याप्तिशक्तिवारणवाचकं । द्यूतो ऽस्त्रियामक्षवती कैतवं पण इत्यपि । यद्वा हे नानामाय त्वया मानिना मनः मम चित्तं आसि चिप्तं मायया मम मनो भ्रामितमित्यर्थः। अतो मायासि मा पलायस्व आहूतो न निवर्त्तेत द्यूतादपि रणादपीति स्मृतेरिति भावः ॥ ३८ ॥

इत्युक्तोदेवनतःसोऽर्थ्यभवत्पुष्करःप्रमादेवनतः ।
येनसविभिदेवनतःपुरावनेःश्रममपिप्रपेदेवनतः ॥

इति उक्तः देवनतः सः अर्थी अभवत् पुष्करः प्रमादे अवनतः ।
येन सः विभिदे अवनतः पुरा अवनेः श्रमं अपि प्रपेदे वनतः ॥ ३९ ॥

इतीति। इत्यनेन प्रकारेण नलेनोक्ते गदिते प्रमादे अनवधानतायां ऽवनतः आनतः। यद्वा अवनतः रतः सर्वं द्यूतेनैव भविष्यतीति मन्यमानः स पुष्करः देवनतो द्यूतेन पञ्चम्यास्तसिल् अर्थी प्रयोजनवान् धनेच्छुर्वा ऽभवत्। येन पुष्करेण स नलः पुरा पूर्वमवनेः भूमेरवनतो रक्षणात् विभिदे भिन्नः कृतः। वनतो ऽरण्यात् श्रममपि प्रपेदे प्राप्तवान्। स पुष्करो द्यूतार्थ्येवाभूत्। येन पुष्करेण नलो भूरक्षणात् पृथक्कृतो ऽरण्ये दुःखञ्च लब्धवान्। देवनाः पाशकास्तु ते। प्रमादो ऽनवधानता। अवाग्रेऽवनतानतम्। पदगताविव्यस्य लिटि प्रपेदे इति ॥ ३९ ॥

सचराजायततेनद्यूतेऽसुपणेजितोव्यजायततेन ।
निर्व्याजायततेनत्यक्तश्चागस्सुगतरजायततेन ॥

स च राजा अयततेन द्यूते असुपणे जितः व्यजायत तेन ।
निर्व्याजायततेन त्यक्तः च आगस्सु गतरजाः यतते न ॥ ४० ॥

सचेति। स च पुष्करो निर्व्याजायततेन निर्व्याजो निष्कद्म आयो धनागमस्तेन ततेन व्याप्तेन निर्व्याजधनागमव्याप्तेन अयततेन शुभावहविधिव्याप्तेन तेन राज्ञा नलेन असुपणे असवः प्राणा एव पणो ग्लहो यस्मिन् तादृशे द्यूते जितः पराजितो व्यजायत अजनिष्ट। त्यक्तस्तेनोत्सृष्टस्च । कुत इत्यत आह गतरजाः गतं रजोगुणो मत्सरो यस्य तादृक् पुरुषः। आगस्सु अपराधेषु पापेषु वा न यतते न यत्नं करोति। प्राणपणे द्यूते नलेन पुष्करः पराजितः उज्झितश्चेति भावः। पणोऽक्षेषु ग्लहः। जनीप्रादुर्भावेज्ञाजनोर्जेति जादेशः अजायेतेति। रजोगुणेस्त्रीपुष्पेपि। पापापराधयो रागः। यती प्रयत्ने लटि यतते इति। अत्रेयं पुराणवार्त्ता। नलो गत्वा पुष्करमुवाच राज्यं त्यज नो चेद्युद्धं द्यूतं वा कुरु। इत्युक्तः द्यूतमकरोत् तेन पराजितः प्राणात्यये पादानतः प्राणप्रार्थको ऽभवत् ततो निष्कपटं ज्ञात्वा तेन सह सौहार्द्दमकरोदिति ॥ ४० ॥

अयिभवनेत्रायस्वस्वभुवंपुष्करमुदञ्जनेत्रायस्व।
युगबलनेत्रायस्वस्नेहायपुरेव विमलनेत्रायस्वः॥

अयि भवने त्रायस्व स्वभुवं पुष्कर मुदं जने अत्र अयस्व ।
युगबलनेत्राय स्वस्नेहाय पुरा इव विमलनेत्राय स्वः ॥ ४१

अथीति। नलः पुष्करमाह। अयि कोमलामन्त्रणे हे पुष्कर भवने गृहे निवसन् स्वभुवं स्वभूमिमस्मद् दत्तं चायस्व रचस्व। अत्र जने जनपद-लोके मुदं हर्षं अयस्व प्राप्नुहि। युगबलनेत्राय युगस्य युग्मस्य बलं सामर्थ्य नेत्रं नायकं यस्य तादृशाय विमलनेत्राय निर्म्मललोचनाय स्नेहाय स्वप्रेम्णे पुरेव पूर्वमिव स्वः भवावः। हे पुष्कर त्वं स्वभूमिं रच लोके स्निग्धो भव मम तव च स्नेहः पुरेव वर्द्धतामित्याहेति भावः। त्रैङ्पा-लन इत्यस्य लोटि त्रायस्व। अयस्वेति अयगतावित्यस्य। स्वः अस्तेर्लटि। यद्वा युगबलनेत्रा आवयोः सेनापतिभ्यां सह स्वभवने अयस्व गच्छस्व आवां पुरेव स्नेहाय स्वः भवावः कथम्भूताय ? विमलने-त्राय विमलानि नेत्राणि यस्मिन् तस्मै अन्यत्पूर्ववदित्यर्थः॥ ४१॥

हरिपवनयमानस्यस्वबलादितितुलयतोनुनयमानस्य।
स्नेहानयमानस्य प्रणतिमधात् पुष्करःसुनयमानस्य॥

हरिपवनयमान् अस्य स्वबलात् इति तुलयतः अनुनयमानस्य।
स्नेहान् अयमानस्य प्रणतिं अधात् पुष्करः सुनयमानस्य॥ ४२॥

हरीति। हरिपवनयमान् हरिरिन्द्रः पवनो वायुः यमो धर्म्म-राट् तान् स्वबलात् स्वसामर्थ्यात् तुलयतः समीकुर्व्वतः अनुनयमान-स्यानुमानयतः। स्नेहान् प्रीतीः अयमानस्य गच्छतः। सुनयमानस्य शोभन-नीत्यभिमानस्यास्य नलस्य पुष्करः प्रणतिं प्रह्वत्वं नमस्कारं वा इत्यनेन प्रकारेण अधात् अकार्षीत्। एवं बहुधा स्नेहं दर्शयतोऽतिवत्सलस्य

पुस्करः प्रक्षोऽभवदिति भावः । अधादिति दधाते र्लङि ॥ ४२ ॥

अरिसेनानाशस्याश्रितवत्सलतेऽस्तुचेतनानाशस्या ।
पूरितनानाशस्यास्तोकयशोभिःकदापिनानाशःस्याः ॥

अरिसेनानाशस्य आश्रितवत्सल ते अस्तु चेतना न अशस्या ।
पूरितनानाशस्य अस्तोकयशोभिः कदापि न अनाशः स्याः ॥ ४३ ॥

अरीति । पुष्करो नलमाह । हे आश्रितवत्सल . आश्रितेषु वत्सल कारुणिक । अस्तोकयशोभिः . अनल्पयशोभिः पूरितनानाशस्य पूरिता नाना आशादिशो येन तादृशस्य अरिसेनानाशस्य अरिसेनायाः नाशोऽवसानं यस्मात् तादृशस्य शत्रुबलातङ्कस्य ते तव अशस्या नशस्या प्रशस्या-स्तोतुं अयोग्या चेतना बुद्धिर्न अस्तु न भवतु । कदापि कस्मिन्नपि काले अनाशः आशारहितो न स्याः न भवः । हे आश्रित कृपापात्र तवास्तव्या धी र्माभूत् । कदापि आशाव्याघातस्तव मास्यादित्यर्थः । आशा तृष्णापि याचना । स्तोकाल्पक्षुल्लकाः । अस्तु अस्तेर्लोटि । स्निग्धस्तु वत्सलः ॥ ४३॥

इतिसननामनलस्यप्रणतोंघ्रौफुल्लवक्त्रनामनलस्य ।
अहितानामनलस्य प्रययौ साद्धैंतेननामनलस्य ॥

इति सः नानाम नलस्य प्रणतः अंघ्री फुल्लवक्त्रनामनलस्य ।
अहितानां अनलस्य प्रययौ साद्धैं तेन नामनलस्य ॥ ४४ ॥

इतीति । इत्यनेन प्रकारेण प्रणेता नम्रः स पुष्करः नलस्यांघ्री

चरणौ ननाम प्रणतवान्। नाम सम्भावनायां। कीदृशस्य नलस्य? फुल्लवक्त्रनामनलस्य फुल्लं विकसितं हर्षस्मेरं वक्त्रनाम वक्त्रनामकं रूपं वा नलं कमलं यस्य विकसितमुखपद्मस्य। कीदृशस्य? नामनलस्य नमन नामस्तस्मिन् नलस्य तृणस्य नतौ तृणप्रायस्य। यद्वा नामनं नमस्कारं लाति स्वीकरोति नामनलः तस्य ला आदाने डप्रत्ययरूपमित्यर्थः एवमहितानां अनलस्य शत्रूणामग्नेः। तेन नलेन सार्द्धं सह प्रययौ गतवान् नलानुवर्त्ती बभूव एवं विकसितवदनकमलस्य चरणौ ननाम नलेन सह गतवांश्चेति भावः। नलं पद्मं नलस्तृणे। नामप्रकाशसम्भाव्य-क्रोधोपगमकुत्सने। ननामेति नमे र्लिटि। क्वचित्तु प्रणत इत्यत्र प्रीत इति पाठस्तत्र सन्तुष्ट इत्यर्थः। प्रययौ सार्द्धं बलेन नामनलस्य इति पाठे नलस्य बलेन सैन्येन सार्द्धं समं प्रययौ इत्यर्थः ॥ ४४ ॥

मुदममुनामुक्तेन प्राप्य सुराज्यं महात्मनामुक्तेन।
धृतनानामुक्तेनराज्यञ्चिरमाशासिविघट्टनामुक्तेन ॥

मुदं अमुना आमुक्तेन प्राप्य सुराज्यं महात्मनां उक्तेन।
धृतनानामुक्तेन राज्यं चिरं प्राशासि विघट्टनामुक्तेन ॥ ४५ ॥

मुदिति। आमुक्तेन बद्धकवचेन त्यक्तेन वा अमुना पुष्करेण सह मुदं प्राप लेभे। महात्मनां महाशयानामुक्तेन वचनेन विघट्टनामुक्तेन विघट्टनावियोगः तेन मुक्तेन त्यक्तेन वियोगहीनेन। धृतनानामुक्तेन धृताः नानामुक्ताः मौक्तिकं येन तादृशेन नलेन राज्यं राष्ट्रं प्राशासि

प्रकर्षेण शिष्टं रचितम्। तदनन्तरं स कवचेन पुष्करेण सह हर्षं लेभे महात्मनां वाक्येन निजराज्यं वियोगहीनेनानुशिष्टं नलेनेति भावः। मुत्प्रीतिः। आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्। शासु अनुशिष्टावित्यस्य चिण्लुङि प्राशासीति। उक्तं भाषितमुदितम् ॥४५॥

अरिसंहतिरस्यवनेषुशुचाम्पदमापदमापदमापदमा।
सुखदञ्चयथैवजनायहरिंयतमायतमायतमायतमा॥

अरिसंहतिः अस्य वनेषु शुचां पदं आपदं आपत् अमा अपदमा।
सुखदं च यथा एव जनाय हरिं यतमायतमाय तं आयत मा॥४६॥

अरीति। अस्य नलस्यारिसंहतिः शत्रुपंक्तिः शत्रुसमूहो वनेषु अरण्येषु शुचां शोकानां पदं स्थानं आपदं विपत्तिम् आपत् लेभे। कीदृशी? अमा निःश्रीका। एवमपदमा अपदा स्थानरहिता मा लक्ष्मी र्यस्याः सा अस्थिरलक्ष्मीका इत्यर्थः। यद्वा अपगतो दमो यस्याः सा इत्यर्थः। यतमायतमाय यता गता माया कापट्यं यस्य स यतमायः अतिशयेन यतमायः यतमायतमः तस्मै जनाय सुखदं तं नलं मा राज्यलक्ष्मीरायत आगता। यथैव तादृशाय जनाय सुखदं हरिं कृष्णं मायाति तथेत्यर्थः। यद्वा यतमिति भिन्नं पदं यतं नियत-चित्तं तं। आयतमाय श्रेष्ठलाभाय आयत। यद्वा आयतमाय अतिशय-धनागमाय यतन्त आयतेत्यर्थः। नलस्य शत्रु र्वने वसन् दुःखितो बभूव। निर्व्याजलोकसुखदं तं नलं लक्ष्मीरागतवतीति भावः। आयते-

त्ययगतावित्यस्य लङि। इन्दिरालोकमाता मा। पदं व्यवसितित्राण-स्थानलक्ष्मांघ्रिवस्तुषु। विपत्त्यां विपदापदौ। यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिपिकभेकेषु हरिर्नाकपिलेचिषु॥ ४६॥

नलेन पुर्य्यता यता यता यता पुरेवसा।
सदायमुन्महा महा महा महा स्तसम्पदं॥

नलेन पुरी अतायत अयतायता पुरा इव सा।
सदा अयं उन्महाः महामहां अहास्त सम्पदं॥ ४७॥

नलेनेति। अथाशीर्वादव्याजेन नलोदयकाव्यसमाप्तिं सूचयति। नलेन नैषधेन सा पुरी स्वीया नगरी पुरेव पूर्वमिव अतायत विस्तारिता। कीदृशी पुरी ? अयतायता अयः शुभदैवम्। नलस्येति शेषः। तस्य भावो ऽयता तया आयता विशाला। यदा राज्ञो नलस्य शुभदैवमभूत् तदा यथा पूर्वं स्वनगरी विशालाभूदिति भावः। यद्वा कीदृशेन नलेन ? अयतायता अयेन शुभदैवेन तायति पालयति देवब्राह्मणादीनिति शेषः अयतायन् तेन। यद्वा अयं तायति विस्तारयति तेन सर्वदा स्वशुभशंसकेन तायृसन्तानपालनयोरित्यस्मात् कर्त्तरि शत। यद्वा अयो विद्यते यस्यासौ अयः अर्श आदिभ्योऽजित्यच्। तस्य भावो ऽयता शुभदैववत्त्वं तामेति प्राप्नोतीत्ययतायन् तेन। इणगतौ कर्त्तरि शतरीणोयणितियण्। अयं नलः उन्महा उद्गततेजाः सदा सर्वकालं सम्पदं लक्ष्मीं अहास्त प्राप। कीदृशीं

सम्पदम् ? महामहाम् महान्तो महा उत्सवाः यस्यां सा ताम्। सदै वोत्सवपरिपूर्णां सम्पदं लेभे इति भावः। अतायतेति तनुविस्तार इत्यस्माद् धातोः कर्म्मणि लङि। आत्मने पदे ते परे यकिच कृते तनोतेर्यकीति विकल्पेनात्वे च रूपम्। अहास्तेति ओहाङ्गतौ इत्यस्माद् ये गत्यर्थास्ते प्राप्त्यर्था ज्ञानार्थाश्चेति वचनेन प्राप्त्यर्थाल्लुङि। आत्मने पदे ते परे सिचि कृते रूपम्। पूर्य्यतेति दीर्घपाठे पूःपुरीयता प्राप्ता। कथम्भूता ? आयता विशालेत्यर्थः। पूःस्त्री पुरीनगर्य्यौ वा इत्यमरः॥ ४७॥

इति सुबोधिनीटीकासहिते श्रीकालिदासकृते नलोदये सत्काव्ये चतुर्थोच्छ्वासः।

मिश्रानन्दकरस्त्वासीत् महोपाध्यायलाञ्छितः।
पुण्यग्रामसभाजेता यष्टा वाणीमयः सुधीः॥ १॥
वेदेनैव विधिं कविं नयरुतै स्तर्केण वाचस्पतिं
वेदान्तेन शिवं मनुं स्मृतिमयै र्ज्योतिश्चयै र्भास्करम्।
व्याकृत्येन फणाधरं क्षितिधरं नागाधिपं छन्दसा
धर्म्मो यस्य विजेतुमञ्चति परं सांख्येन चार्वाकपम्॥ २॥
तत्सूनुः सुकृती क्षितीश्वरकृपापात्रः सुहृत्पालको-
नानाशास्त्ररतो महापदयुतोपाध्यायसंज्ञान्वितः।

सत्तर्कायतकाननोद्धतबलद्वादीन्द्रदन्तावल-
श्रेणीमर्द्दनचातुरीचणहरि र्विद्याकरो मैथिलः ॥ ३ ॥

तस्यात्मजोभूद्विबुधाग्रगन्ता प्रज्ञाकरः सज्जनतापहन्ता ।
गुणालयः श्रीशपदानुमन्ता शास्त्रेषु दक्षः कुधियां नियन्ता ॥ ४ ॥

स्वल्पेन वयसा तेन कृता टीका सुबोधिनी ।
पूर्वाचार्य्यकृती वीक्ष्य सुधियाम्पश्यतां मुदे ॥ ५ ॥

॥ अनुक्रमणिका ॥

	पृष्ठे
प्रथमसर्गसमाप्तिः	३३
द्वितीयसर्गसमाप्तिः	७६
तृतीयसर्गसमाप्तिः	१२२
चतुर्थसर्गसमाप्तिः	१६४